Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४४०२ - घ

Title उपाकृतितत्त्वम्

Author

Extent १५० Age १८४८

Subject धर्मशास्त्रम् . सम्पूर्णम् ।

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ४४०२-घ

उपाकृतितत्त्वम्

पत्राणि १६६ (किन्त्वत्र १०५तः १२० सं० पत्राण्यनुपलब्धानि

नं० ४४०२-घ

4402

missing

#105 to 120

=150

Fi

नं० ४४०२-घ

उपाकृति तत्वम

पत्राणि १६६ (किन्त्वत्र १०५तः १२० सं० पत्राण्यनुपलब्धानि

© Dharmartha Trust J&K. Digitized by eGangotri

१. ९२ उपाकर्म अध्यायनतोपि ते रत्ने: साग्ने रध्यान अध्यापयतो नाधिकार इति हरिहरः ५०
ति

गंगाधरशर्मणा लिखितेयं संक्षिप्त उपाकर्म तत्वविषयसूचिका सं १९५८ भाद्रे

१. १ उपाकर्मकाल निर्णयः
१३ उपाकर्मादिने ग्रहणं संक्रान्त्यादौ
हस्ताद्वत्तस्यापि वेदाध्याय नोऽधिकारः
१९ उपाकर्मतो नित्यत्वं ब्रह्मचर्यं व्रतत्वाधिकारि
२१ आश्वलायनोपाकर्मप्रयोगः
२४ उत्सर्गकालः
२५ मलमासे हि नूपाकर्म दिन एव ततः पूर्वं ... नैमित्तिकान्
२६ आश्वलायनानां तमपाकर्मप्रयोगः
आश्व २८ उत्सर्गकृत वेदविहितं ... पितृतर्पणानां तिलतर्पणं ... कर्तव्येव
२७ पुनरुपाकर्मकालनिर्णयः
२८ संक्रान्त्यादौ
३० बौधायनोक्त स्नानविधिः
४१ आपस्तंबीय स्नानविधिः
४३ तीर्थस्नानविधिः
४८ नैमित्तिकपरम्परातीर्थविधिः
५७ तत्प्रयोगः

८४ संक्षिप्तः प्रयोगः दुर्गासूर्यशिवादीनां ... प्रकारः सोमसूत्र प्रमाणं च
८८ ... स्थितशिवस्य सव्येन वप्रदक्षिणम्
८९ ... उपाकर्मतत्त्वे वेदोपाकर्मनिर्णयः
९१ तीर्थयात्राविधिः
९६ तीर्थयात्राश्राद्धादानुष्ठानक्रमः
९९ नर्मदाजामहासंकल्पः
१०० प्रायश्चित्तादि ... संकल्पानां सर्वादिकानि
१०० नामदीपिका
१०८ प्रयागविधिः
११२ गयाप्रकृतिः नर्मदा
११९ गौतमीविधिः
१००० ३
११५ समुद्रस्नानविधिः
११७ नर्मदास्वेदौ ग्रहणस्नानविधिः
ब्रह्मकर्मणि नर्मदायाः स्यादधिकारः ... वत्येव
११८ संकल्पः कार्यो न वा ... त्यो अपीति विचारः
११९ व्याकरणेति स्नानप्रयोगः

© Dharmartha Trust J&K. Digitized by eGangotri

॥श्रीगणेशाय नमः॥श्रीसूर्याय नमः॥श्रीम्हालसापतिं नत्वा खंडेरायं कपर्द्दिनं॥पाप
गुंडो बालकृष्णः प्राह तत्त्वमुपाकृतौ॥१॥तत्र तावत् विश्वरूपेंद्रस्वामिनः तत्र आपस्तं
बसूत्रे श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीत तैष्यां पौर्णमास्यां
रोहिण्यां वा विरमेदर्धपंचमांश्चतुरो मासानित्येके इति। पौर्णिमा च द्विधा। चतुर्दशीयु
क्ता अयुक्ता च। तत्र चतुर्दशीयुक्तायामुपाकर्म न कर्त्तव्यं। तदुक्तं कालिकापुराणे। चतु
र्दश्यां समुत्पन्नावसुरौ मधुकैटभौ। वेदान्स्वीकुर्वतः पद्मयोनेस्तौ जह्रतुः श्रुतीः। हत्वा
तावसुरौ देवः पातालतलवासिनौ। आहृत्य ताः श्रुतीस्तस्मै ददौ लोकपिता स्वयं। स
प्राप्तवान् श्रुतीर्ब्रह्मा पर्वण्योदयिके पुनः। अतो भूतयुते तस्मिन्नोपाकरणमिष्यत इ
ति। अयुक्ता च द्विधा। उदयादिसंगवांतकर्मकालव्यापिनी अव्यापिनी च। तत्राद्यैव

© Dharmartha Trust J&K. Digitized by eGangotri

श्रावणीपौर्णमासीतुसंगवात्परतोयदि।तदैवोदयिकीग्राह्यानान्यदौदयिकीभवेदिति
माधवीयेगार्ग्योक्तेः।यत्तुउदयेसंगवस्पर्शश्चेतोपर्वणिचार्कमे।कुर्युर्नभस्युपाकर्मऋ
ग्यजुःसामगाःक्रमादितिवचनात्तरंतत्प्रागुदाहृतमाधववचनैकार्थ्यात्तदर्थकमेव।
कर्मकालव्याप्तौसत्यांपूर्वेद्युश्चतुर्दशीयोगेसतिपरेद्युरेवकर्मकालव्याप्तौसत्यांक
र्तव्यम्यदातुपूर्वेद्युश्चतुर्दशीयोगःपरेद्युश्चकर्मकालव्याप्तपौर्णमास्यभावस्तदा
प्रौष्ठपद्यां।यदाप्यनावृष्ट्यादिनाओषधिप्रादुर्भावाभावस्तदापिप्रौष्ठपद्यामेव।नचश्रा
पस्तंबादिसूत्रेषुतस्यानाम्नातत्वादन्यपरमेवश्रवणौषधयइतितिवाच्यं।ग्रहण
संक्रान्तिशुक्रास्तादिदोषप्रतिपादकानामपितथात्वप्रसंगादितिदिक्।इत्याहुः।तत्रहर
दत्तः।मेषादिस्थेसवितरियोयोदर्शःप्रवर्त्तते।चांद्रमासास्तदंताःस्युश्चैत्राद्याद्वादश

© Dharmartha Trust J&K. Digitized by eGangotri

स्मृताः।तेषुयायापौर्णमासीसासाचैत्र्यादिकास्मृताकादाचित्केनयोगेननक्षत्रस्यतिनि
२ र्णयः।तदेवंसिंहस्थेसवितरियाऽमावास्यातदंतेचांद्रमसेमासेयामध्यवर्त्तिनीपौर्णमा
सीसाश्रावणीश्रवणयोगस्तुभवतुमावातस्यांश्रवणेनयुक्तायांअयुक्तायांवापौर्णमास्यां
2 वेदोपाकरणंकृत्वास्वाध्यायमधीयानोमासंप्रदोषेरात्रिप्रथमभागेनाध्ययनंकुर्यात्
।श्रवण्यामित्यनेनैवपौर्णमासीलाभात्तुश्रवणतद्योगस्यपाक्षिकत्वेनपुनःपौर्णमासी
ग्रहणंपौर्णमास्याएवमुख्यत्वार्थं।एवंतेषांपौर्णमास्यांरोहिण्यांवाविरमेदुत्सर्जनंकुर्या
त्।एतत्पक्षेश्रावण्युपाकर्मान्तरंपंचमासानधीतेप्रोष्ठपद्युपाकरणमितिमतंसूच
यन्नाहार्धंचेति।अर्धःपंचमोयेषांतेऽर्धपंचमाःसार्धचतुरोमासानधीतइत्येकेमन्यन्ते
एतत्पक्षेउत्सर्जनस्याप्रतिकर्षः।उत्सर्जनेचकृतेश्रावण्याःप्राक्शुक्लपक्षेषुसा २

© Dharmartha Trust J&K. Digitized by eGangotri

धारणाध्ययनं वेदस्य। कृष्णपक्षेषु व्याकरणाद्यंगाध्ययनं पुनः श्रावण्यामुपाकृ
त्यागृहीतवेदस्य ग्रहणाध्ययनमिति। तथा निर्णयसिंधौ कमलाकरभट्टाः। पौकर्मे
श्रवणस्याहस्त्ययसंयोगे हेमाद्रौ व्यासः। धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत्। त
त्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितं। श्रवणेन तु यत्कर्म उत्तराषाढसंयुतं। संवत्सर
कृतोऽध्यायस्तत्क्षणादेव नश्यतीति। प्रयोगपारिजाते गार्ग्योऽपि। उदयव्यापिनि स्वेव
विल्लृक्षे घटिकाद्वयं। तत्कर्म सफलं ज्ञेयं तस्य पुण्यत्वमूनतकमिति। पूर्वेद्युरुत्तराषाढा
योगे परेद्युः श्रवणाभावे घटिकाद्वयान्न्यूने वा पंचम्यादौ कार्यं न तु पूर्वविद्धायां संगव
मात्रेऽप्यपवादाभावात्। किंच। परेद्युः संगवास्पर्शे निषिद्धपूर्वाग्रहणे किं मानं। श्रवण
वाक्यं संगववाक्यं वेति चेत्। न हि स्त्रीहियववाक्यादश्वशफवाक्याच्च माषमिश्रणं

© Dharmartha Trust J&K. Digitized by eGangotri

मप्युपादानंस्यादितिमहत्यांडिल्यां।निषेधानुप्रवेशान्नैरपेक्षबाधान्नेतिचेत् इहापितु
३ ल्यं॥अध्यायानामुपाकर्मकुर्यात्कालेपराह्णिके।पूर्वाह्णेतुविसर्गःस्यादितिवेदविदो
विदुरितिहेमाद्रौगोभिलोक्तेः।वस्कन्नस्कमवेदुपाकृतिःपौर्णमास्यांपूर्वाह्णएवत्विति
3 प्रचेतोवचनात्सर्ववाक्यंसामगविषयं।तेषामपराह्णएवोक्तेः।याजुषास्तुपर्वणिकु
र्युः।तच्चतैत्तिरीयेरौदगिकंग्राह्यमन्येस्तुपूर्वं।पर्वण्यौदयिकेकुर्युःश्रावणंतैत्तिरीयकाः॥
बह्वृचाःश्रवणेकुर्युर्ग्रहसंक्रान्तिवर्जितेइतिगार्ग्योक्तेः।संप्राप्नवानक्ष्कतीर्ब्रह्मापर्वण्यौ
दयिकेपुनः।अतोभूतादिनेतस्मिन्नोपाकरणमिष्यतइतिकालिकापुराणात्।अथचे
द्दोषसंयुक्तेपर्वणिस्यादुपाक्रियादुःखशोकामयग्रस्तराष्ट्रेतस्मिन्द्विजातयइतिमद
नरत्नहेमाद्र्यादौगार्ग्येणदोषोक्तेश्च।पराशरमाधवीयेगार्ग्यः।श्रावणीपौर्णमासीतु ३

© Dharmartha Trust J&K. Digitized by eGangotri

संगवात्परतोयदि। तद्दैवौदयिकीग्राह्या नान्यदौदयिकी भवेत्। कर्मकालमाहका
लादर्शीनिगमः॥ श्रावण्यां प्रोष्ठपद्यां वाप्यतिपत् षण्मुहूर्तकैः। विद्धा स्यात्छंदसां तत्रो
पाकर्मोत्सर्जनं भवेत्। अत्र पौर्णमासी श्रवणहस्तयोरुपलक्षणं तेन तावपि संगवव्या
पिनौ। उदये संगवस्पृष्टे प्रक्रांतो पर्वणि चार्कभे। कुर्युर्नभस्युपाकर्म स्वस्वयजुःसामगाः
क्रमादिति वचनादिति पृथ्वीचंद्रः। तेनोदयसंगवव्यापिनी मुख्या। परेद्युः संगवाभा
वे पूर्वेद्युरुदयाभावे चैकैकसत्वे पूर्वेद्युश्चतुर्दशीवेधनिषेधात् सामान्यवाक्यादौद
यिकी कर्मपर्याप्ता ग्राह्या न पूर्वा। संगवनिमित्तपूर्वविद्धापवादाभावात्। अन्यदौदयि
कीत्वस्य पूर्वविद्धापरत्वाभावात्। तेन भाद्रादौ कालांतरे स्यान्नतु निषिद्धा। न हि व्रीह्य
लाभे निषिद्धमाषग्रहणं युक्तं। अत एव परेद्युः संगवव्याप्तौ पूर्वविद्धानिषेधः तदभा

© Dharmartha Trust J&K. Digitized by eGangotri

वेतुनेतिमूर्खव्यवस्थाप्ययुक्ता॥ विधिवैषम्यात्। माषनिषेधेपितथापत्तेश्च पूर्ववि
४ द्धावचनसत्वेहिसायुज्यते। एवंश्रवणेपिज्ञेयं। विष्णुऋक्षेघटिकाद्वयमितिपूर्वोक्तया वि
रोधाच्च। तेनप्राशस्त्यमात्रपरं। नत्वेतत्तु एतच्छुद्धाधिकपरं। तेनयथाग्निहोत्रादौसायंप्रा
५ तःकालबाधेसामान्येजीवनावच्छिन्नकालेदर्शादौवानुष्ठानं। यथावाव्रीह्यश्वश्रफा
घभावेयागाक्षिप्तनिषिद्धवर्जद्रव्येण। तथात्रसंगवाभावेनिषिद्धवर्जकर्मपर्यायोद
यिकेकालांतरेवानुष्ठानेननुकदापिनिषिद्धः। अपवादाभावेउत्सर्गस्यैवप्राप्तेः॥ का
त्यायनादीनांतुदिनद्वयेपर्वाह्णव्याप्तौएकदेशस्पर्शेवापूर्वेतिहेमाद्रिः। यदपिश्रावणी
दुर्गानवमीदूर्वाचैवहुताशनी। पूर्वविद्धाप्रकर्तव्याशिवरात्रिर्बलेर्दिनमितिब्रह्मवैवर्त्ते
तद्ब्रह्मपवित्रश्रवणकर्मादिदैवकर्मविषयमितिहेमाद्रिः। अतएववचनात्कुलधर्म ४

© Dharmartha Trust J&K. Digitized by eGangotri

व्रतादावपि पूर्वैव। मदनरत्नेप्येवं। मदनपारिजातेपि पूर्वविद्धायां श्रावण्यां वाजस
नेयिनामुपाकर्मेत्युक्तं। मदनरत्ने तु पर्वण्यौदयिके कुर्युः श्रावण्यं तैत्तिरीयका इति ब
ह्वृचपरिशिष्टाद्बह्वृचान्प्रतिकर्मविधानार्थं प्रवृत्ते तत्र तैत्तिरीयककर्मविध्ययोगा
त्पूर्वोक्तकालिकापुराणादौ सामान्यत औदयिकपर्वप्राप्तेस्तन्निषेधे न बह्वृचानां श्र
वणविधानात्तैत्तिरीयकपदमनुवादकत्वात्तस्य च प्राप्त्यधीनत्वात्प्राप्तेश्च यजुर्वेदि
मात्रपरत्वात्सर्वयजुर्वेद्युपलक्षणार्थं। अवपुत्यानुवादो वा न तु विधायकं। येन विशे
षविधिना उपसंहारः स्यात्। अनुवादत्वाल्लक्षणे न दोषः। अन्यथा औदयिकपर्वविशि
ष्टोपाकर्मोद्देशेन कर्तृविधौ कर्तृविशिष्टवा औदयिकपर्वविधौ वा रूपभेदापत्तेः। तस्मा
त्तैत्तिरीयकपदाविवक्षया सर्वयजुर्वेदिनामौदयिकमेव पूर्वमुक्तं तत्र न तावत्परिशि

© Dharmartha Trust J&K. Digitized by eGangotri

श्रवद्धृचान्यत्येवविधिः। धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितमित्यादि तदुदाहृते
५ एवपरिशिष्टे वेदान्तरधर्मविधीनां दर्शनात्। नाप्यनुवादोयं। कालिकापुराणे ह्वृचा
5 दीनामपि तदापत्तेः कुर्युरित्यपशस्यविधित्वेन तस्यैवार्थवादत्वे नैतत्प्राप्तानुवादत्वाच्च।
नच तैत्तिरीयकाणां ह्येतद्विधिरस्ति येनानुवादः स्यात्। नच वाक्यभेदः। तैत्तिरीयकमा
त्रस्य कर्ममात्रस्य वा उद्देश्यत्वायोगेन हविरात्रिवदष्टवर्षं ब्राह्मणमुपनयीतेतिवच्चा
गत्याविशेषस्योद्देश्यत्वात्। अन्यथोत्तरार्धे बह्वृचपदस्याप्यविवक्षापत्त्याश्रवणस्य
सर्वसाधारण्यापत्तेः। तस्माद्धेमाद्रिमतमेवयुक्तमिति दिक्। इत्याहुः तथा शंकरभट्टाः
कर्के उपाकर्मविधिर्देशविशेषे सामगविषय एवाद्यतरेषां कालवृद्ध्या उपाकर्मोत्क
र्षइति सिद्धं। अत्र केचिदाहुः पर्वणि ग्रहणे सति उपाकर्म न कार्यं तदयुक्तं। नित्ये नैमि ५

त्तिके जप्ये होमे यज्ञक्रियासु च। उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यत इति वचनात्
। हस्तश्रवणपर्वाणि चात्रौदयिकानि ग्राह्याणि। तथा च परिशिष्टे। धनिष्ठाप्रतिपद्युक्तं
त्वाष्ट्रऋक्षसमन्वितं। श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः। त्वाष्ट्रं चित्रा व्यासः
। श्रवणेन तु यत्कर्म उत्तराषाढसंयुतं। संवत्सरकृतो ध्यायस्तत्क्षणादेव नश्यति। ध
निष्ठासंयुतं कुर्यात् श्रावणं कर्म यद्भवेत्। तत्कर्म सफलं कुर्यादुपाकरणसंज्ञितं। निगमः।
ग्रहयोगो गुरुं हन्ति संक्रान्तिः शिष्यघातिनी। तपो हन्त्युत्तराषाढा उपाकर्मणि वै ध्रुवं। ध
निष्ठामिश्रितं कार्यमुपाकरणसंज्ञितं। कालिकापुराणे। चतुर्दश्यां समुत्पन्ना वसुरोम
धुकैटभौ। वेदान्स्वीकुर्वतः पद्म॰शंकया। अत्र भूतयुतपर्वणि उत्तराषाढायुतश्रवणस्य
निषेधश्चित्रायुतहस्तविधानाच्चार्थसिद्धः। उत्तरायुतहस्तनिषेधश्च त्रिमुहूर्त्तेण वचनतु

© Dharmartha Trust J&K. Digitized by eGangotri

दृश्यामितिवोत्तराषाढोत्तरासत्वेज्ञेयः।माधवेनकालनिर्णयेनक्षत्रप्रकरणउक्तं।साति
६ थिस्तत्त्वनक्षत्रंयस्यामभ्युदितोरविरितिविष्णुधर्मोत्तरमुपवासव्यतिरिक्तविषयमि
त्युक्तं।त्रिमुहूर्त्तपरिमाणस्यतिथोक्तप्रत्वात्तदेवाचानुसंधेयमिति।वृत्यत्रचेतनाः।
मवेदुपाकृतिःपौर्णमास्यापूर्वाह्णएवतु।ब्राह्मणान्भोजयेत्तत्रपितॄनुद्दिश्यदेवताः॥
भविष्योत्तरे।सप्राप्तेश्रावणस्यांतेपौर्णमास्यांदिनोदये।स्नानंकुर्वीतमतिमान्श्रुति
स्मृतिविधानतः।ततोदेवान्पितॄंश्चैवतर्पयेत्परमांभसा।उपाकर्मदिवैवोक्तंस्तृषी
णांचैवतर्पणं।कुर्वीतब्राह्मणाःश्राद्धंवेदानुद्दिश्यशक्तितः।अत्रचौदयिकेपूर्वण्युपाक
र्मविधिस्तैत्तिरीयविषयएवतथाचबह्वृचपरिशिष्टकारिका।पर्वण्यौदयिकेकुर्युः
श्रावणंतैत्तिरीयकाः।बह्वृचाःश्रवणेकुर्युर्ग्रहसंक्रांतिवर्जिते।श्रवणंत्वत्राप्यौद ६

© Dharmartha Trust J&K. Digitized by eGangotri

यिक इत्यनुषज्यते। इतरथाऽनुष्ठानं तु पूर्वविद्धमेव। श्रावणी दुर्गनवमी तथा दूर्वा
ष्टमी च या। पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दिनमिति स्मृतेः। ननु पर्वण्यौदयिके इ
त्यत्र भविष्योत्तरप्राप्तौदयिकत्वविशिष्टपर्वविशिष्टोपाकर्मोद्देशेन तैत्तिरीयकाण्वे
तिकर्तृनियमविधावुद्देश्यविशेषणविवक्षानिमित्तवाक्यभेदात्तैत्तिरीयकपदमविव
क्षितमिति तीतरेषामप्युपलक्षणीकृत्य सर्वेषामनुष्ठानस्यौदयिकत्वमात्रं विधीयतां। न
चौदयिकत्वमात्रविधावपि पर्वविशिष्टोपाकर्मोद्देशाद्वाक्यभेदान्न मोक इति वाच्यं प
र्वरूपविशेषणस्याप्यविवक्षायामुपाकर्मण्यौदयिके यो स्वस्वकाले इति विधिः स्या
त्। तावतैव वक्तव्यानत्यप्यौदयिकत्वविधिसिद्धेर्वक्तव्यौदयिके श्रवणे कुर्यु रिति
वाक्यानन्तरानर्थक्यापत्तेस्तत्परिहाराय पर्वविवक्षायाअवश्यवाच्यत्वात्। श्रावणीदु

© Dharmartha Trust J&K. Digitized by eGangotri

गेनवमीत्यस्यतुकर्मविशेषानुपादानाद्धिरणगर्भपवित्रारोपणंविषयः। उपाकर्मोग
७ भूतेनमाभ्युदपिकंश्रवणाकर्मचेति। मैवं। यथाहितम्नेपयसिद्ध्यानयति अष्टवर्षंब्रा
ह्मणमुपनयीतेतितत्राष्टवर्षत्वयोरुद्देश्यविशेषणयोरुद्देश्यविशेषणत्वेवाक्य
7 भेदाद्यथाश्रुतिचरुहविकृभयत्वसर्वत्रावान्नित्यवत्स्वरूपानुवादायोगात्पाक्षिकानु
वादस्यचक्वचिदप्यनभ्युपगमाल्लक्षणावश्यंभावेप्यतत्रसप्तवर्षादिलक्षणाप्र
माणाभावात्समभिव्याहारगम्यविशिष्टोद्देश्यपरत्वेनानागतिकत्वाष्टवर्षपदो
पादानवलादभ्युपेयते। एवंतौशिरीषपदेप्यविकल्पतन्न्यायानिषेधादिति। यद्वावि
शिष्टविधिरेवायंगृह्यादिविहितस्यापिपुनर्विधिर्गौरवभेदात्। अन्यथाएकविषया
नेकस्मृत्युच्छेदापत्तेः। नचविशिष्टविधौगौरवापत्तेस्तैत्तिरीयपदेलक्षणाराजारा

© Dharmartha Trust J&K. Digitized by eGangotri

जस्र्य येनेत्यादावपि त्रैवर्णिकाधिकारसिद्धेस्तल्लक्षणाप्रसंगात्। नच यथा वैश्वदेवेन
यजेतेत्यत्र देवतातद्धितपक्षे वैश्वदेवपदस्य कथंचिदेकदेशेऽपि प्राप्तिसंभवे लक्षण
याप्यनुवादत्वमेव स्वीकृतं न विधित्वं गौरवादेवं तैत्तिरीयपदेऽपि स्यादिति वाच्यं। तत्रा
नुवादस्य सार्थक्याऽगौरवतो लक्षणाया एवस्वभ्युपेयत्वात्। इह तु लक्षणयाऽनुवादत्वे
तैत्तिरीयपदवैयर्थ्यापत्तेस्ततो विधिगौरवस्यैवस्वभ्युपेयत्वात्। अन्यथा पंन्यायो राज
पदेऽप्यतिप्रसज्येतेति। तस्मादेवं व्यवस्था। यदैकस्मिन्नेव दिने कर्मकालव्यापिनः पर्व
श्रवणहस्तास्तदा सर्वेषां तत्रैवोपाकर्म। यदा तु दिनद्वयेऽपि कर्मकालव्यापिनो न वा त
दा तैत्तिरीयबह्वृचछंदोगानामोदयिकेषु पर्वादिषु अन्येषां त्वन्यत्रेति। कर्मकालस्त
सामगानां तावदपराह्णः। गार्ग्यवाक्ये छंदोगामिलिताः कुर्युरुपाकर्मापराह्णिकमि

© Dharmartha Trust J&K. Digitized by eGangotri

त्युक्तेः। यत्तु बह्वृचप्रचेतसः। भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव वेति। एतद्याजुषविष
८ यं। पौर्णमास्यां योपाकृतिः सा पूर्वाह्ण इति विधेः। बह्वृचानां तु यद्यपि न किंचिदुक्तं तथा
पि पूर्वाह्णे दैविकं कार्यमिति सामान्यवाक्यादेव पूर्वाह्णसिद्धिः। अनेनैव याजुषाणा
मपि पूर्वाह्णसिद्धेर्नित्यवदनुवादसंभवान्न प्रचेतोवाक्ये पूर्वाह्णो विधीयते। स्मृत्यं
8 तरतया कर्मविधिरेव पूर्वाह्णापवादतया पराह्णविधिरिति तत्त्वं। यत्तु गोभिलः। अध्या
पानामुपाकर्म कुर्यात्काले पराह्णके। पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति तत
द्गार्ग्यवाक्येन छंदोगविषये उपसंह्रियते। अतः कालादर्शे उपाकर्म पराह्णे स्यादुत्स
र्गः प्रातरेव चेति सामान्यत उपाकर्मणि पराह्णकालत्वाभिधानमुपेक्ष्य छंदोगवि
षयमेव वा व्याख्येयं। अत एव हेमाद्रिना सर्ववेत्तृभिः कालनिर्णयकारकैः सामान्य ८

© Dharmartha Trust J&K. Digitized by eGangotri

तदुक्तं अस्य च विधेः पूर्वाह्णः कालः स्मृत इति। यत्तु परिशिष्टवाक्यशेषो ग्रहसंक्रा
न्तिवर्जितइति। एवं स्मृत्यन्तरीयोपि पूर्वोपन्यस्तो ग्रहसंक्रान्तिनिषेधस्तत्र विशेषः प्र
योगपारिजाते वृद्धमनुः। अत्रार्द्धरात्रादर्वाक्चेद्ग्रहः संक्रम एव वा। नोपाकर्म तदा
कुर्याच्छ्रावण्यां श्रवणेन वेति। कात्यायनोपि। अर्द्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं त
दा। उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति। यत्तु वृद्धवाचाः श्रवणे कुर्युरित्युक्तं त
त्र विशेषः स्मृत्यर्थसारे। श्रवणे आदौ घटिकाचतुष्टयाभिजिन्नक्षत्रांशवर्ज्यमिति।
त्याहुः। अथ उपाकर्मविषये वाजपेयिनः। अत्र च सामगानामुत्सर्जनोपाकर्मणोर्यौ पू
र्वाह्णापराह्णौ तौ द्वेधाविभक्तदिनौ ग्राह्यौ। तद्वाक्ये द्वयोरेव निर्देशात्। येषां तु देवत्वे
नोपाकर्मणः पूर्वाह्णग्रहणं तेषां देवकर्मसु पंचधा त्रेधा चतुर्द्धा द्विधा विभागान्यत

© Dharmartha Trust J&K. Digitized by eGangotri

रविभक्तस्य पूर्वोक्तस्य मुख्यानुकल्पभावेन प्रयोगात्स्पष्टत्वमहत्त्वाभ्यां वा व्यवस्थितस्य
९ सर्वस्याप्यंगत्वादत्रापि तादृशस्य ग्रहणं। सर्वथापि हस्तश्रवणपर्वणि खंडत्वे औदयि
कानामेवात्र कर्मणि ग्रहणं। तथा च परिशिष्टं। धनिष्ठाप्रतिपद्युक्तत्वाष्ट्रक्षसमन्वि
तां श्रावणे कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः इति कर्मणो धनिष्ठादियुतत्वं धनिष्ठा
युते श्रवणे प्रतिपद्युक्तपौर्णमास्यां चित्रायुते च हस्ते यथाक्रममनुष्ठानात्। श्रवणेऽन्व
यव्यतिरेकविधया व्यासवचनमपि। श्रवणे न तु यत्कर्म उत्तराषाढसंयुतं। संवत्सर
कृतोऽध्यायस्तत्क्षणादेव नश्यति। धनिष्ठासंयुतं कुर्यात् श्रावणं कर्म यद्भवेत्। तत्कर्म
सफलं विद्यादुपाकरणसंज्ञितमिति। औदयिकानि च पर्वादीनि प्रातः संगवात्मकष
ण्मुहूर्तव्यापीनि ग्राह्याणि। श्रावण्यां प्रोष्ठपद्यां वा प्रतिपत्षण्मुहूर्तकैः॥ विद्धा स्या ९

च्छंदसां। तत्रोपाकर्मोत्सर्जनं भवेदिति निगमवचनात्। पर्वग्रहणं हस्तश्रवणयोरप्यु
पलक्षणं। अत एव पृथ्वीचंद्रोदये। श्रावणी पौर्णमासी तु संगवात्परतो यदि। तदैवौ
दयिकी ग्राह्या नान्यदौदयिकी भवेदिति गार्ग्यवचनं लिखित्वा उदये संगवस्पर्शे श्रु
तौ पर्वणि चार्कमे। कुर्युर्नभस्युपाकर्म ऋग्यजुःसामगाः क्रमादिति वचनांतरमपि लि
खितं। एवं सति कर्मकालव्याप्तिरपि द्वितीयदिने लभ्यते। सामगानां तु परा ह्युपाक
र्मणि वचनात् कालमुपपूर्वं हस्तं वा घित्वा त्तरदिन एव तदनुष्ठानं। तेन दिनद्वये क
र्मकालव्याप्तौ तदस्पर्शे वौदयिकानां हस्तादीनां ग्राह्यत्वं यत्केनचिदुक्तं तदयुक्तं। सं
गवस्पर्शि हस्तग्राह्यत्वविधानानुपपत्तेः। तदा पूर्वदिने कालव्याप्तेरावश्यकत्वादि
ति तेषामेव कारिकासु तिथिनक्षत्ररूपाश्च कालाः सर्वेप्यमी द्विजैः। उपाकर्मोत्स

र्जैनयोर्ग्रोह्यात्रोदपिकाःपरे। कार्त्स्न्येनावयवशो वा संगवस्पर्शिनो यदीति शंकरभट्टाः
१० ः। तस्मादेवं व्यवस्था। यदैकस्मिन्नेव दिने कर्मकालव्यापिनः पर्वश्रवणहस्तास्तदा सर्वेषां
तत्रैवोपाकर्म। यदा तु दिनद्वयेपि कर्मकालव्यापिनो न वा तदा तैत्तिरीयवह्वृचसामगाना
मौदपिकेषु पर्वादिषु अन्येषां त्वन्यत्रेति। भट्टोजीदीक्षितकारिका। दिनद्वये कर्मकालव्या
प्तावव्याप्तौ वा अपरत्रेति। दिनकरभट्टास्तु माधवीयगार्ग्यवाक्येनोपसंहारात्कालाद
र्शपिंगाभट्टपृथ्वीचंद्राद्युदाहृतवाक्यानां संगवाधिकविषयत्वमित्याहुः। अपरे त्वाहुः।
तत्र गोभिलः। पर्वण्यौदपिके कुर्युः श्रावणे तैत्तिरीयकाः। बह्वृचाः श्रवणर्क्षे तु हस्तर्क्षे सामवे
दिन इति। अथर्ववेदिनां तूपाकर्मकाल उक्तः कौशिकगृह्ये। अथ वेदस्याध्ययनविधिं वक्ष्या
मः श्रावण्यां प्रौष्ठपद्यां वोपाकृत्य अर्द्धपंचमान्मासानधीयीरन्नेव छंदांसि लोम्नां च। निव १०

© Dharmartha Trust J&K. Digitized by eGangotri

र्तयन्अर्द्धमासंचोपाकृत्यक्षपेरन्त्र्यहमुत्सृज्यआरंभःश्रावण्यामुक्तपौष्यामुत्स
र्गइति।यत्तुतेनैवसूत्रांतरेउक्तंअभिजितिशिष्याननुपनीयश्रोमःत्तेसंभारान्संभरतिद
धिसक्तूनित्यादि।तद्दृशेनपूर्वाभिजितोःसमुच्चयइतितन्न।अभिजितःपर्ववदुपाक
र्मान्वयाप्रतीतेः।उपनीयेतिचोपाकर्मार्थमाचार्यसमीपेशिष्याणांनयनमुच्यते।तथैव
संप्रदायविद्भिरंगीकारात्।गोभिलवाक्येचश्रावणमितिश्रावणेमास्यनुष्ठेयत्वंज्ञाप्य
ते।तथाचशौनकः।अथातःश्रावणेमासेश्रवणर्क्षयुतेदिने।श्रावण्यांश्रावणेमासिपंच
म्यांहस्तसंयुते।दिवसेविदधीतैतदुपाकर्मयथोदितमिति।गोभिलवाक्येचऔदयिक
त्वस्यश्रवणहस्तयोरप्यनुषंगः।अतएवोक्तंपरिशिष्टेधनिष्ठाप्रतिपद्युक्तेत्वाष्ट्रऋ
क्षसमन्विते।श्रावणंकर्मकुर्वीतऋग्यजुःसामपाठकाइति।त्वाष्ट्रंचित्रा।अत्रसामा

© Dharmartha Trust J&K. Digitized by eGangotri

न्यवाचकोपियजुःपाठकशब्दोगोभिलवाक्यैतैत्तियपरोवोध्यः। अतोवाजसनेयिभिः
११ पूर्वविद्धपौर्णमास्यामिदंकार्यं। तद्विषयमेवश्रावणीदुर्गानवमीदूर्वाचैवहुताशनी॥
पूर्वविद्धाप्रकर्त्तव्याशिवरात्रिर्वलेर्दिनमितिब्रह्मवैवर्त्तवचनमितिहेमाद्रिमदनपा
रिजातादयः। मदनरत्नेतुपर्वण्यौदयिकेकुर्युःश्रावणंतैत्तिरीयकाः। वह्वृचाःश्रवणे
कुर्युर्ग्रहसंक्रांतिवर्जितइतिवह्वृचपरिशिष्टवाक्येतैत्तिरीयग्रहणंयजुर्वेदमात्रोपलक्ष
णंपूर्व्वावाक्यस्यवह्वृचान्प्रतिऔदयिकश्रवणपरत्वात्। तैत्तिरीयाणांतुपूर्वंस्तुत्यर्थमु
पादानात्। अनुवादेचलक्षणयाऽदोषावहत्वात्। श्रावणीदुर्गानवमीत्यादिशास्त्र
तुश्रावण्यांपूर्णमास्यांविहितकर्मांतरविषयमित्युक्तं। तदयुक्तं। तैत्तिरीयशब्दस्य
प्रसिद्धार्थवाधप्रसंगात्। गोभिलवाक्यस्यवह्वृचान्प्रतिश्रवणविधानमात्रपरत्वेन ११

© Dharmartha Trust J&K. Digitized by eGangotri

नेतुमशक्यत्वाच्च। अथ तदपि सामगान्प्रति हस्तमात्रविधिपरमिति चेत् न होलाका
धिकरणे स्मृतीनां गृह्यग्रंथानां चाध्ययनव्यवस्थया प्रामाण्याव्यवस्थानान्नां दूरीकृत्य
सर्वान्प्रति प्रामाण्यस्य स्थापितत्वेन तत्तस्य परिशिष्टेन तच्छाखीयपुरस्कारेण प्रवृत्तत्वावि
धेर्विवक्षामंगीकृत्येतरशाखीयान्प्रति प्रतीयमानविध्यविवक्षांगीकारस्यानिर्हेतुक
त्वात्। यदा श्रावणे मास्योषधयो न प्रादुर्भवंति। तदा भाद्रपदे मासि श्रवणे पर्वहस्तेषु
वह्वृचादिभिरुपाकर्म कार्यं तथा च बह्वृचपरिशिष्टे श्रावण्यामोषधयस्तस्मिन्मासे तु
न भवंति चेत् तदा भाद्रपदे मासे श्रवणेन तदिष्यत इति। वसिष्ठोपि। श्रावण्यां प्रोष्ठ
पद्यां वाप्युपाकृत्य युक्तः छंदांस्यधीयीतेति। वृत्तिकारेणापि एतद्वार्षिकमित्याचक्षत
इति सूत्रव्याख्यानावसरे ओषधिप्रादुर्भावाभावे भाद्रपदे मासि श्रवणनक्षत्रे उपा

© Dharmartha Trust J&K. Digitized by eGangotri

कर्माभिधानाच्च। कातीयानां तत्र विशेषमाह कात्यायनः। अथातोध्यायोपाकर्मौषधीनां
१२ प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्यां पंचम्यां हस्तेन वेति। एतद्व्याख्यानावसरे च कर्कः
कालद्वयाभिप्रायेण स्वयं व्याख्याय तच्चतुष्टयाभिप्रायेण परव्याख्यानमुक्तवान्। एत
देवस्पष्टीचकार हरिहरः। अत्राध्यापयतोपि निरग्नेः साग्नेरप्यनध्यापयतोनाधिका
12 रः। औषधिप्रादुर्भावश्रवणे च पौर्णमास्या विशेषणे। तयोस्तत्र प्रायशः संभवात्। तस्मा
द्विशेषणाभावे पूर्णमास्यां भवति। एवं पंचम्यां हस्तोपि प्रायशो भवतीत्युपन्यस्तः। अतः
श्रावणी पूर्णमासी पंचमी वा विशिष्टाऽविशिष्टा वोपाकर्मकालः। एवं स्वमतेन व्याख्याय
परमतमुदाजहार। श्रवणेन पौर्णमास्यां वा पंचम्यां वा हस्तेन वेति। अत्र पूर्वव्याख्यायां
श्रवणाभावेऽप्यौषधिप्रादुर्भावाभावेपि पूर्णमास्यां कार्यमिति कर्कीयाभिमानः। प्रती १२

© Dharmartha Trust J&K. Digitized by eGangotri

यते। अत एव वरेणुकारिकायां कर्कमतानुवादपूर्वं मतांतरोपन्यासः। कर्कोक्त्या चैव
मुभयं पौर्णमास्या विशेषणं। अनादरस्तयोर्यस्मान्नित्यत्वादस्य कर्मणः। पंचम्यां प्रायि
को हस्त इत्युपाध्यायसंमतिः। पंचमी हस्तयुक्तैव याज्ञवल्क्यादिसंमता। अवष्ट्योषध
यस्तस्मिन्मासे पि न भवंति चेत्। प्रोष्ठपद्यां तदेतत्स्यादिति मन्वादिशासने। पूर्णिमा प्र
तिपद्युक्ता तत्रोपाकर्मणः क्रिया। उक्तोर्थो यं प्रसंगेन भविष्योत्तरसंज्ञक इति अत्रौष
धिप्रादुर्भावाभावे पि श्रावण्यां कार्यमिति मुख्यकर्कमतविरुद्धो षधिप्रादुर्भावाभावे प्रो
ष्ठपद्यां कार्यमिति मतोपन्यासेन सह परविद्धपूर्णिमायास्येत्युपन्यासात्। नात्रैव का
रिकाकारस्याभिमानो बोध्युः सामगानां तु भाद्रपदशुक्ले हस्तनक्षत्रे मुख्यः कालः। प्रो
ष्ठपदीहस्तेनोपाकरणमिति गोभिलसूत्रात्। प्रोष्ठपदीप्राप्येति व्याख्यातं हेमाद्रेः॥

© Dharmartha Trust J&K. Digitized by eGangotri

गोभिलसूत्रभाष्येतुप्रोष्ठपदीमितिद्वितीयाप्रतिशब्दाध्याहारार्था।तेनप्रतिवर्षमुपाक
१३ र्मकर्त्तव्यमितिज्ञाप्यतइत्युक्तं।उक्तेकालेअस्तादिनाउपाकर्मारंभासंभवेश्रावण्यांपौ
र्णमास्यामुपाकृत्यभाद्रपदशुक्लहस्तनक्षत्रपर्यंतेनपठेयुः।श्रावणीमेकउपाकृत्य
13 तेमासाविद्यात्कालेकांक्षितइतिगोभिलसूत्रात्।श्रावणीश्रावणीपूर्णमासी।सावि
त्रंहस्तः।श्रावणीमितिद्वितीयायाःप्रयोजनंप्रोष्ठपदीशब्देनव्याख्यानमितिव्याख्या
तंभाष्यकारेण।यदिश्रावणेमासिश्रवणनक्षत्रादिकालोग्रहसंक्रांतिदूषितस्तदा
श्रावणशुक्लेपंचम्यांतत्रैवहस्तयुक्तदिनांतरेवाउपाकर्मकार्यं।उपाकर्मप्रकुर्वीत
क्रमात्सामर्ग्यजुर्विदः।ग्रहसंक्रांत्युदुष्टेषुहस्तश्रवणपर्वसुइतिनिषेधद्योतना
तननतुगृह्यसूत्रेषुपंचम्यादिविधेःअनुकल्पत्वेनतत्कालविधिपरतायाःव्या १३

© Dharmartha Trust J&K. Digitized by eGangotri

ख्यातृभिर्निवंधृभिः स्वीकाराच्चात्र उक्तं च महार्णवे। संक्रांतिर्ग्रहणं वापि यदि पर्व
णि जायते। तन्मासहस्तयुक्ता या पंचमी वा तदिष्यते। बह्वृचगृह्यकारिकायां। अध्या
यानामुपाकर्म श्रावण्यां श्रवणेन तु। तन्मासहस्तयुक्ता या पंचमी वा तदिष्यत इति।
येषां गृह्यसूत्रे पंचमी नोक्ता तेषां ओषध्यप्रादुर्भाववद्भवश्रावणगतकालस्य ग्रहादि
दुष्टत्वेपि भाद्रपद एवोचितश्रवणादिकालेषूपाकर्मौचित्तं। एतद्वार्षिकमित्याश्वल
तद्दत्यादिवाक्यानां ओषध्यप्रादुर्भाववद्भवसंक्रांतिदोषेपि भाद्रपदप्रापकतायास्तुल्य
त्वात्। अत एव संक्रांतिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत्। उपाकृतिस्तु पंचम्यां का
र्या वाजसनेयिभिरिति महार्णववाक्ये वाजसनेयिग्रहणं तैत्तिरीयकोपलक्षणमंगी
कृत्य तैत्तिरीयाणामपि पंचम्यामुपाकर्तुमुचितमिति मतं दूषयित्वोपसंहृतं हेमाद्रौ।

© Dharmartha Trust J&K. Digitized by eGangotri

।ग्रहसंक्रांतिदुष्टायांश्रावण्यस्यपौर्णमास्यांतैत्तिरीयकैः प्रोष्ठपद्यामुपाकर्मकार्यमिति।
२४ बौधायनीयानांतुश्रावण्याःपौर्णमास्याःग्रहणादिदुष्टत्वेआषाढ्यांतदनुष्ठानसूचितं।श्रा
वण्यांपूर्णमास्यांआषाढ्यांवोपाकृत्यछंदांस्यधीयीतेतिबौधायनवचनात्।ग्रहसंक्रां
14 तियोगश्चोपाकर्मसंबंधिन्यहोरात्रेमाध्यर्द्धरात्रात्पूर्वंनक्षत्रपर्वणोर्विद्यमानस्तयोर्दू
षकः।नत्वर्धरात्रात्परस्ताद्विद्यमानः।तथाऽतीतादर्धरात्रात्परतोविद्यमानोदूषको
नतत्पूर्वः।नाप्युपाकर्मांगभूतनतिथिनक्षत्रयोःपूर्वोत्तरकालीनेतिथ्यंतरेनक्षत्रांतरेवा
विद्यमानः।अर्धरात्रात्परस्ताच्चेत्संक्रांतिर्ग्रहणंतथा।उपाकर्मनकुर्वीतपुरतश्चेन्नदो
षकृदितिगार्ग्यवचनात्।पूर्वार्धरात्रादर्वाक्तुग्रहःसंक्रांतिरेवतु।नोपाकर्मतदाकुर्यात्श्रा
वण्यांश्रवणेपिचेतिशास्त्रांतराच्चबह्वृचाःश्रवणेकुर्युर्ग्रहसंक्रांतिवर्जितेदस्यादौश्र २५

© Dharmartha Trust J&K. Digitized by eGangotri

वृण्णादिसामानाधिकरण्येनग्रहणादिपर्युदासश्रवणाच्चायानितुग्रहवाक्यानित्र
योदश्यादिनोवर्ज्योदिनानांनवकंक्रवांमांगल्येषुसमस्तेषुग्रहणेचंद्रसूर्ययोः।द्वा
दश्यादित्ततीयांतोवेधइंदुग्रहेस्मृतः।एकादश्यादिकःसौरेचतुर्थ्येनःप्रकीर्त्तितः।ख
ण्डग्रहेतयोःप्रोक्तमुभयत्रदिनद्वयमित्येवमादीनितानिनोपाकर्मविषयाणि।नित्येनै
मित्तिकेजप्यहोमयज्ञक्रियादिषु।उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यतइतिमदन
रत्नेवचनात्।पर्वादीनामोदपिकानामपिग्राह्यत्वेविशेषउक्तः।पृथ्वीचंद्रोदयोउ
दयेसंगवस्पर्शश्रुतौपर्वणिचार्कमेकुर्युर्नभस्युपाकर्मस्त्रग्यजुःसामगाःक्रमादि
ति।श्रुतौश्रवणे।अर्कमेहस्तेनभसीत्युपलक्षणंभाद्रपदस्यतथाचमदनरत्नेनि
गमेश्रावण्यांप्रोष्ठपद्यांवाप्रतिपत्षण्मुहूर्त्तकैः।विद्धास्याच्छंदसांतत्रोपाकर्मो

© Dharmartha Trust J&K. Digitized by eGangotri

त्सर्जनंभवेदिति। अत्रचौदयिकग्राह्यत्वानुवादेनसंगवस्पृक्ग्राह्यत्वविधानात्
पंचधाविभक्तदिनस्यप्रथमभागात्मकप्रातःकालमात्रव्यापिनांश्रवणादीनांअ
ग्राह्यत्वेप्रातःसंगवभागद्वयव्यापिनांतुग्राह्यत्वमित्येके। अन्येतुपृथ्वीचंद्रोदयोदाहृ
तवचनेसंगवस्पर्शइतिस्पर्शग्रहणात्संगवैकदेशव्याप्तिःप्रतीयते। निगमवाक्येतु
षण्मुहूर्त्तैः इतिपूर्णभागद्वयव्याप्तिः। नत्वधिकव्याप्तिरपिगार्ग्यवचनात्प्रतीयते।
श्रावणीपूर्णमासीतुसंगवात्परतोयदि। नदैवोदयिकीग्राह्यानान्यदौदयिकीभवेद
ति। एषांवचसांयथाश्रुतार्थपरत्वेसंभवतिनान्यतरस्यावपुत्यानुवादत्वंपाक्षिका
नुवादत्वंवावक्तुमुचितं। नापिविकल्पपरत्वंतस्याष्टदोषदुष्टत्वात्। अनेकश्रुतिक
ल्पनाप्रसंगाच्च। किंतुयेषांशाखिनांषण्मुहूर्त्तसाध्यमेवोपाकर्मनान्यत्रतिषण्मुहूर्त्ते

© Dharmartha Trust J&K. Digitized by eGangotri

व्याप्तिरेवग्राह्यत्वनियामिका।एवमितरेऽपिव्याप्तीनतत्तद्वाक्यविनःप्रतिग्राह्यत्वनि
यामिकेबोध्ये।अतएववक्ष्यमाणस्मृत्यर्थसारोक्तिः।तिथिखंडेसत्युदयव्यापिनीग्राह्यायोग
पर्याप्त्यानिथिरुपाकरणेऽग्राह्येति।एकवचनोक्तवचनेषुक्वापिस्वार्थत्यागः।नाप्यनेक
ग्रहतिकल्पनाप्रसक्तिः।सर्वेषांकर्मकालव्याप्तिशास्त्रप्रपंचनरूपत्वात्।नापियेषांमु
हूर्तत्रयमात्रसाध्यमुपाकर्मतेषामपिसंगवव्याप्तिप्रयुक्ताद्दृष्टांतरकल्पनापत्तिः।ना
पिसामगानांकर्मकालव्याप्तिशास्त्रबाधेनपरदिनेउपाकर्मप्रसक्तिः।तेषांहिअप
राह्णउपाकर्मकालः।सिंहेरवौतुपुष्यस्यपूर्वाह्णेविचरेद्धरिः।छंदोगामिलितांकुर्यु
रुत्सर्गंसर्वछंदसां।शुक्लपक्षेतुहस्तेनउपाकर्मापराह्णिकमितिगर्गवचनात्।यदि
केषांचित्सामगानांप्रातःसंगवावेवोपाकर्मकालत्वेनविहितौ।तदापिप्रायेणसंग

© Dharmartha Trust J&K. Digitized by eGangotri

वस्यकृत्यग्रहणं। यदि तु न विहितौ नदा कर्मकालव्याप्तिशास्त्रवशेन प्रसक्तस्य पूर्वदि
नगतापराह्णव्यापि हस्तयाः स्वत्वस्य बाधेन संगवस्पृग्ग्रस्तगोचरापूर्वं विधेः स्वगपजु
रथर्ववेदविहितलक्षणस्य परैरप्यभ्युपेयत्वात्। अस्मत्पक्षेपि सामवेदांशे कर्मकाल
व्याप्तिप्रपंचनरूपत्वत्यागेनापूर्वविधित्वोपगमनिमित्तं वैलक्षण्ये न दोषाय स्यात् कुः
। उक्तं गार्ग्येवाक्ये सिंहे रवावित्यस्योत्सर्जनोपाकर्मभ्यां द्वाभ्यामपि संबंधः। अत एव
स्मृत्यंतरे। वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ। उपाकर्म न कर्तव्यं कर्तव्यं सिंह
युक्तके इति। कुलीरः कर्कटः। यत्तु दृष्टं वाक्यं छंदोगातिरिक्तानां सिंहस्थे रवावुपाकर्म
कर्तव्यतापरमिति तन्न। छंदोगविषयत्वेऽस्य वाक्यस्योक्तगार्ग्यवाक्येन सहैकमूलभूतै
कश्रुतिकल्पनालाघवात्। नन्वेवं न भेदोत्तरभागे तु कर्तव्यं सिंहयुक्तके। कर्कटसं

© Dharmartha Trust J&K. Digitized by eGangotri

स्थितेभानावुपाकुर्यात्तुदक्षिणइतिव्यवस्थाविध्यनुपपत्तेः। एकपुरुषंप्रतिपक्ष
द्वयाप्राप्तेर्व्यवस्थाविध्यनुपपत्तेरितिचेन्नापूर्वार्द्धियत्तिंसहयुक्तेकार्यंतन्नर्मदोत्तर
इतिसामगान्प्रत्येवविध्युपपत्तेः। दक्षिणभागेकदाकार्यमित्यपेक्षायांचउत्तरार्द्धस्या
पितान्प्रत्येवप्रवृत्तेरितिकेचित् तन्नचित्यंप्रोष्ठपदीहस्तेनोपाकरणमितिगोभिल
गृह्यसूत्रेप्रोष्ठपदशुक्लपक्षेहस्तेनेत्यादिपरिशिष्टेचभाद्रपदशुक्लपक्षहस्तनक्ष
त्रएवोपाकर्मविधिवलेनकस्मिन्नपिदेशेसामगानांकर्केस्थेउपाकर्मानुष्ठाना
संभवात् गृह्यसूत्रस्योत्पत्तिशिष्टगुणविरुद्धगुणविधेःस्मार्त्तस्यासंभवात् अत
एवपूर्वार्द्धगतनियमवशेनअर्थप्राप्तस्यानुवादउत्तरार्द्धमित्यप्यपास्तंपूर्वार्द्धदेश
स्यविधेयत्वंउत्तरार्द्धेचानुवाद्यत्वमितिवाक्यार्थवैषम्यस्यान्याय्यत्वाच्चापरेतुन

© Dharmartha Trust J&K. Digitized by eGangotri

मेदोत्तरेत्यादिवृहस्पतिवाक्यस्यसिंहेरवौतुपुष्पर्क्षेइत्यादिगर्गवाक्येनसामगवि
१८ षयत्वेनोपसंहारइत्याहुः।तदपिचिंत्यं।अनारभ्याधीतसाम्नदर्शपवाक्यस्यसम्नद
र्शवैशपस्येत्यनेननवैश्यार्थत्वबोधकतयाऽसमानविषयेणानुपसंहारवल्लकर्त्तदेशा
17 त्मकपरस्पराधिकार्थतयाउक्तशास्त्रयोरप्यपरस्परोपसंहारसंभवात्।नचवृह
स्पतिवाक्येकैश्चिन्निबध्धमिनलिखितत्वेनानाश्वासउचितः।प्रयोगपारिजातपारा
शरमाधवाद्युदाहृतत्वेनतद्योगात्।तस्माद्येषांशाखिनांविहितकालस्यग्रहसं
क्रांत्यादिदुष्टत्वेसतिस्वगृह्योक्तपंचम्यादिकालस्यमुख्यभावेनशाशांतरीयेकालेऽत्र
वश्यपाश्रयणीयेश्रावण्यांशुक्लपंचम्याभाद्रपदेगनपर्वादिश्चाव्यवस्थितविकल्पप्रस १८
क्तिस्तेषांअर्थप्राप्तसिंहककर्कव्यवस्थापनेक्रियतइत्युचितं।नहिपत्रपक्षवद्नःप्राप्त

© Dharmartha Trust J&K. Digitized by eGangotri

तत्रैवतद्व्यवस्थापनमुचितंवार्त्रघ्नीवद्धन्वत्योःपूर्णमास्यमावास्याकालाभ्यांक
र्मभ्यांवासहशारदतःसंबंधानवगमेपित्र्यर्थेत्राप्तसंवंधोपजीवनेनैवव्यवस्थाद
र्शनादिति।प्रथमोपाकर्मेगुरुशुक्रास्तादौनकार्यं।यदुक्तंज्योतिर्निबंधेसंग्रहे।गुरु
भार्गवयोर्मौढ्येवाल्येवावार्द्धकेपिवा।तथाधिमाससंसर्पेमलमासादिषुद्विजः।प्रथ
मोपाकृतिर्नस्यात्कृतंकर्मविनाशकृदिति।तत्रादिशब्देनसिंहस्थगुर्वादिग्रहणं।द्वि
तीयाद्युपाकर्मतुअस्तादावपिकार्यमित्यभिप्रेत्योक्तंतत्रैवस्मृतिसारसमुच्चयेप
क्षोपवीतेनकर्त्तव्यंश्रावणेगुरुशुक्रयोः।मौढ्येपिवार्द्धकेबाल्येनित्यवत्कर्मनोदितमि
ति।द्वितीयादिप्रयोगोपित्वधिमासेनकार्यः।उपाकर्मतथोत्सर्गंप्रसवाहोत्सवाष्ट
काः।मासवृद्धौपराःकार्यावर्जयित्वातुपैतृकमितितत्रैवज्योतिःपराशरवचनात्।

© Dharmartha Trust J&K. Digitized by eGangotri

तात्रसवाहोत्सवोजातेष्टिः।यत्तुदशाहरासुनोत्कर्षेऽस्य तुर्वपियुगादिषु।उपाकर्म
१८ महाषष्ट्योर्हितादिष्टं वर्षादितइतिस्मृत्यंतरवचनं तच्छंदोगविषयं तेषां सिंहार्कए
वोपाकर्मविधानात्।इदं चोपाकर्म यद्यपि श्रावण्यां प्रोष्ठपद्यां वाप्युपाकृत्य यथा
विध्यायुक्तश्छंदास्यधीयीत मासान्विप्रोर्द्धपंचमानित्यादिशास्त्रपर्यालोचनयात्र
18 लणस्य ब्रह्मचारिणो ग्रहणाध्ययनांगत्वेन प्रतीयते।तथापि त्रयाणामपि वर्णानां
ब्रह्मचारिगृहस्थान्यतराश्रमिणां ग्रहणाध्ययनांगतया धारणाध्ययनांगतयावा
नुष्ठेयं।वानप्रस्थाश्रमिणामपि धारणाध्ययनांगतयाऽनुष्ठेयं।नच गृहस्थस्य ग्र
हणाध्यायनाभावः।समावर्त्तनो ब्रह्मचारिकल्पेन यथान्यायमितरे जायोपेयात्येक
इत्याश्वलायनसूत्रे गृहस्थानामपि ग्रहणाध्ययनविधानात्।व्याख्यातं ह्येतद् १८

© Dharmartha Trust J&K. Digitized by eGangotri

स्यंबद्व्रतिकारेण। ब्रह्मचारिधर्मैरित्यर्थः॥ स्वाध्यायकाले विहिता ये धर्माः मधुमांस
स्त्रीगमनखट्वादिवाशयनादिर्जनादयः तैर्युक्तोधीयीत समावर्त्तः। मेखलादयस्तु
न भवंति अस्वाध्यायधर्मत्वात्॥ इतरे ब्रह्मचारिण इत्यर्थः। अस्मिन्नध्ययने ब्रह्मचा
रिणामपि प्रवृत्त्यर्थमिदं। इतरथा समवर्त्तानामेवेति शंका स्यात्॥ समावर्त्तो जायां
गच्छेदित्येक आहुः॥ स तावेव गच्छेन्नानृता विनिवेदं व्रतानि वा पारंनीत्वा ह्युभयमेव य
वेत्यादिश्रुतिभिरपि वेदसमाप्तिभावेपि समावर्त्तनविधानेन गृहस्थानामपि वेदाध्य
यनस्य चनाध्वा। न च धारणाध्ययनांगत्वे मानाभावः॥ उपाकर्मोत्सर्जने च वनस्थाना
मपीष्यते। धारणाध्ययनांगत्वा उह्हिण ब्रह्मचारिणमिति गोभिलवचनात्। प्रत्यब्द
मनुष्ठेयं चेदं प्रत्यब्दं यदुपाकर्मसोत्सर्गं विधिवद्द्विजैः॥ क्रियते छंदसां तेन पुनरा

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यायनं भवेन्न अयातयामैश्छंदोभिर्यत्कर्म क्रियते बुधैः। क्रीडमानैरपि सदा तत्तेषां सिद्धिका
१९ रणमिति कात्यायनवचनात्। नोत्सर्जनं च वेदानामुपाकरणमेव च। अकृत्वा वेदजाप्यस्य
फलं नाप्नोति मानवः इति नित्यब्रह्मयज्ञोपयोगित्वेन नित्यत्वप्रतीतेश्च॥ द्विजैरिति त्रयाणा
मपि वर्णानामधिकारसिद्धिः। यत्तु मासान्विप्रोर्धपंचमानित्युदाहृतशास्त्रे विप्रग्रहणं तत्तु
19 ब्राह्मणस्यैव स्वतोधिकारः क्षत्रियवैश्ययोस्तदन्वारंभमात्रमेवेति ज्ञापनार्थं। अध्येष्य
माणोध्याप्यैरन्वारब्धव्यत्याश्वलायनसूत्रे अध्यापकपरेणाध्येष्यमाणपदेन अध्ययना
धिकृतब्राह्मणस्यैव स्वतंत्राधिकारप्रतीतेः॥ ब्राह्मणोपि यदान्यैः सह कर्म कुर्यात्तदालौ
किकाग्नौ अन्याग्नौ क्रियमाणेन कर्मणान्येषां फलासंभवाभावात्। यदा त्वेकः कुर्यात्तदास्व
गृह्याग्नौ कुर्यात्। बाधकाभावे गृह्यकर्मणां तत्रैवानुष्ठानौचित्यात्। अत एव जयंतः उ १९

© Dharmartha Trust J&K. Digitized by eGangotri

पाकर्मप्रयोगारंभे औपासनेविहृत्ये तौपासनसाध्यतामुक्त्वापिप्रयोगांते अध्याय्यैः
समन्वारब्धाः केचिल्लौकिकाग्नौ कुर्वंतीत्याहु। प्रधानभूतोप्याचार्यो बहुभिरपिचतुरव
त्तिभिःसहोपाकर्मकुर्वन्नेकस्यापिजामदग्न्यस्यानुरोधेन पंचावत्तमेवकुर्यात् आश्वलायने
जघन्यैकद्यावापृथिव्यानुरोधेनमुख्यानेकेंद्राग्न्यादीनांप्रसक्तमयनियमसाधकतया द्वाद
शाध्यायोक्तस्य कांस्यभोजिन्यायस्यप्रकृतेपितुल्यत्वात्। उक्तंहि चतुरवत्तिनेप्रत्यापिपाक्षि
कपंचावत्तानुष्ठानंकात्यायनेनतस्यद्विरवद्यतित्रिर्जामदग्न्यानांसर्वेषांचोभयमविरो
धादिति। व्याख्यातंचैतत्कर्काचार्यैर्देवयाज्ञिकैश्चशाखांतरेपंचावत्तेजमदग्नीनामित्युक्ते
स्तेषांपंचावत्तमेव अन्येषांचतुरवत्तंपंचावत्तंवेति। सत्यप्यत्राव्यवस्थितविकल्पप्रस
क्तौजामदग्न्यानुज्ञयैवाजामदग्न्याःपंचावत्तंकुर्यात्। अप्यजामदग्न्योजामदग्न्यमामंत्र्य

© Dharmartha Trust J&K. Digitized by eGangotri

पंचावत्तं कुर्वीत तस्यापस्तंबोक्तेः। अत एव तत्तनूनपान्नराशंसयोरिव चतुरवत्तपंचावत्तयोर्व्य
२० वस्थाभावात्। अजामदग्न्यानां जामदग्न्यैर्योः सहानधिकारशंकायश्च एतेन राजपुरोहितौ
सायुज्यकामो यजेयातामिति वचनात् कुलायय‍ज्ञ इव उपाकर्मणि चोत्सर्गे यथाकालं समे
20 त्य तु। स्वस्वीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्तत इति कार्ष्णाजिनिवचनात्सहाधिकार इति परि २
हारः। तदुभयमप्ययुक्तं वातमिवेत्युपेक्षणीयं न च कुलायदृष्टांतेन समाधानमप्युचितं व
सिष्ठशुनकादिगोत्रोत्पन्नेन पुरोहितेन सहैव राज्ञोधिकारं प्रतिपादयतो वचनस्योपप
त्तौ सत्रवत्कुलायेपि प्रयाजगोचरभिन्नकल्पाहीणसहाधिकारकल्पनानुपपत्तेः। सोम
चमसफलचमसाहर्त्वेन भिन्नकल्पयोर्विप्रक्षत्रिययोः सहाधिकारप्रतिपादकतया चा
स्याधिकरणस्य तुल्यकल्याधिकाराधिकरणापवादत्वसंभवादित्यालोचयितुमुचितं

© Dharmartha Trust J&K. Digitized by eGangotri

विद्वद्भिरित्युपाकर्मनिर्णयः। अथाश्वलायनोपाकर्मप्रयोगः। नूतनब्रह्मचारिणमुपा
कर्मार्थं तयानूतनकटिसूत्राद्युपकल्पनं स्वस्तिपुण्याहवाचनं नान्दीश्राद्धं च कृत्वा त
दशाब्रह्मचार्यभावेनूपकल्पनमात्रं कृत्वा आचम्य प्राणानायम्य देशकालौ संकीर्त्य अ
धीतानामध्येष्यमाणानां छन्दसां आप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थं एभिर्ब्राह्मणैः
सहोपाकर्म करिष्य इति संकल्प्य व्याहृतिभिरग्निस्थापनान्तं कुर्यात्। केवलं आचार्य इ
दं कर्म कुर्वन्नेभिर्ब्राह्मणैः सहेत्येतद्विहितं संकल्पं कृत्वा गृह्याग्नेरुपसमिंधनं कुर्यात्।
अन्वाधाने चक्षुषी आज्येनेत्यन्तं। सावित्रीं। ब्रह्माणं। श्रद्धां। मेधां। प्रज्ञां। धारणां। सदसस्प
तिं अनुमतिं छन्दांस्यृषीन्। एताः प्रधानदेवताः आज्येन। अग्निं अग्निं सोमं सूर्यान्। अग्नि
। प्राकृतं। अग्निं। मित्रावरुणौ। अग्निं। अयः। अग्निं मरुतः। अग्निं। देवब्रह्मणाः। अग्निं।

© Dharmartha Trust J&K. Digitized by eGangotri

इंद्रासोमौ। इंद्रं। अग्नीमरुतः पवमानसोमं। सोमं अग्निं। संज्ञानं। एताः प्रधानदेवताः द
२१ धिसक्तुद्रव्येणेति वृत्तिकृन्मते। उत्सर्जनप्रकरणस्थदेवताग्रहणेन अग्न्यादीनां सा
वित्र्यादिभिः सहितेनोक्तत्वात्। जयंतमते सावित्र्यादीनां प्रधानदेवतात्वेन न संकल्पः।
तत्र आज्यशेषात् स्विष्टकृते नावद्यति सावित्र्यादीनामंगत्वादिति तदुक्तेः शेषेण स्वि
21 ष्टकृते। इध्मसन्नहनेन रुद्रं। यज्ञोपवीतेन परमात्मानं। अपा समग्निमित्यादि। ततो
विशेषः कारिकायां। आज्यसंस्कारपर्यंतमुपवेषादि पूर्ववत्। आज्येन दधिसक्तूनां त्रिः
पर्यग्निकरणं भवेत्। उत्पूतमात्रमाज्यं चैतेषां त्रिः प्रोक्षणं भवेत्। इध्माभिधारणं तस्मा
दाज्यस्योत्पवनादिकं। अन्वारब्धोऽधुना शिष्यैः स्वयमेव न संति चेत्। प्रकुर्वीताज्यभागा
तमिध्माधानादि पूर्ववत्। इहाज्यभागौ नित्यौ स्तस्तथैवोत्सर्जनेपि तौ। हुत्वाज्येन वभि २१

© Dharmartha Trust J&K. Digitized by eGangotri

मंत्रैः सावित्र्याद्यैरतः परं। कृत्वावदानधर्मेणतान्सक्तून्दधिसंयुतान्। हुत्वाग्निमील
इत्याद्यैर्मंत्रैर्विंशतिभिः क्रमात्। शाकलानां समानीवइत्यृचोत्याहुतिर्भवेत् बाष्कलानां तु
तच्छंयोरित्यृचोत्याहुतिर्भवेत् इति। आज्याहुत्यंते चतुरवत्त्यपि आचार्यैः पंचावत्तिनं शिष्य
मामेत्यविंशतिकृत्वः पंचावत्तं कुर्वीत। प्रतिहोममध्ययनकालप्रसिद्धार्थो दिस्मरणं च कु
र्यात्। अग्निमीलेमधुच्छंदाग्निर्गायत्री। उपाकर्मप्रधानदधिसक्तुहोमे विनियोगः अग्निमी
ले०न्तमस्वाहा। अग्नयइदं। एवमग्निदेवत्येषु सर्वत्र त्यागः। सर्वत्र त्यागमाचार्य एव कुर्यात्।
प्राक्संस्थानुदक्संस्थानि वावत्तानि जुहुयादिति जयंतः। कुसुंभकस्तदगस्त्योक्षणः सूर्या
अनुष्टुप्। अक्षणः सूर्यैभ्य इदं। त्वमग्नेगृत्समदोग्निर्जगती। आवदन्गृत्समदः शकुंतोज
गती। शकुंतायेदं। सोमस्यमाविश्वामित्रोग्निस्त्रिष्टुप्। गणानाजमदग्निर्मित्रावरुणोगा

© Dharmartha Trust J&K. Digitized by eGangotri

यत्री। मित्रावरुणाभ्यामिदं। त्वां ह्यग्ने वामदेवोग्निरष्टी। धामंते वामदेव आपो जगती। अप्स्व
२२ ह्नदं। अबोधि बुधगविष्ठिरावग्निस्त्रिष्टुप्। गंतान एव यमकृतूमकृतोत्ति जगती। मरुद्भ्य इ
दं। त्वं ह्यग्ने भरद्वाजोग्निस्त्रिष्टुप्। यो नः स्वपायुर्देवब्रह्मवर्माण्यनुष्टुप् इति संप्रदायः। देवा
नो ब्रह्मणाश्च देवतात्वमिति तु युक्तं। अस्याः ऋचः देवाः ब्रह्म च देवतेति भाष्यकृताभिधानात्
22 । ब्रह्ममंत्रः। समे अंतरं शरणं निवारकं वर्मेवि द्यत इति व्याख्यानदशायामपि भाष्यकृ
तैव वर्मपदस्य ब्रह्मगतगुणाभिधायित्वेन स्वातंत्र्यनिराकरणाच्चाणं वेचस्तुष्यादि स्मर
णकाले पि देवब्रह्मण्यनुष्टुप् इत्येव पठितुमुचितं। त्यागश्च देवब्रह्मभ्य इदमिति। अग्निर्न
रो वसिष्ठोग्निर्विराट्। प्रति त्यं चक्षुर्वसिष्ठ इंद्रासोमावनुष्टुप्। इंद्रासोमाभ्यामिदं। मा चित्का एवः
प्रगाथ इंद्रो बृहती। इंद्रायेदं। आग्नेयाहि सोभरिरग्निमरुतोनुष्टुप्। अग्निमरुद्भ्य इदं। स्वा २२

© Dharmartha Trust J&K. Digitized by eGangotri

रिषयामधुछंदाःपवमानःसोमोगायत्री।पवमानायसोमायेदं।यत्तेराजन्कश्यपःसोमः
पंक्तिः।सोमायेदं।अग्नयेवहंन्निति।ग्निस्त्रिष्टुप्।समानीवःसंवननःसंज्ञानमनुष्टुप्।सं
ज्ञानायेदं।ततःस्विष्टकृत्।उपस्तीर्येआज्यस्यसक्तून्पंचावत्तिसत्वेद्विरवदापतथैवद
धिसक्तून्सकृद्विर्वावदायद्विरभिघारयेद्धुत्तिक्रमेतां।जयंतमतेतुनाज्यावदानं।ततो
विशेषःकारिकायां।अथस्विष्टकृतंहुत्वादधिसक्तुभिरेववादधिसक्तून्स्वयंत्रिष्याः।प्राश्या
चम्यततःपरंपरिस्तरणदर्भैःस्तैरंतर्दधतिचांजलीन्।अन्येनंसेचपित्वापस्तामिःकुर्वीतमा
र्जनमिति।स्विष्टकृदंतेध्यसन्नहनंहुत्वा।दधिक्राव्णोवामदेवोदधिक्रावानुष्टुप्।दधिक्रा
व्णइतिमंत्रेणप्राङ्मुखाःप्रत्येकंदधिसक्तून्प्राश्याचामेयुः।अग्नेःपश्चादेकधारणयोए
कैकःप्राङ्मुखउपविश्यमार्जनंकुर्यात्।ततोयज्ञोपवीतस्यहोमदानेकृत्वाधारणंकुर्या

© Dharmartha Trust J&K. Digitized by eGangotri

त्। कृत्वा यज्ञोपवीतानि नवानि वसुधाधिप। कृत्वाग्नौ गुरवे दत्वा पितृभ्यो धारयेत्ततः इति
२३ गालववचनात्। वेदारंभप्यतः पूर्वं सक्तुप्राशनं ततः परं। नवयज्ञोपवीतानि दद्याद्धारये
त्ततः इति कार्ष्णाजिनिवचनाच्चापि पितृभ्य इत्यस्यापि दत्वेत्यनेनान्वयः। होमधारणे च यज्ञो
23 पवीतमिति मंत्रेण। ब्रह्मचारी च नूतनमेखलादि धारयेत्। मौंजीयज्ञोपवीते च नवे दंडं
च धारयेत्। अजिनं कटिसूत्रं च नववस्त्रं तथैव च इति कालादर्शोदाहृतवचनात्। एषां धा
रणे क्रमो मंत्रः प्रकारश्चोपनयनवद्बोध्यः। ततः कर्तव्यं कारिकायां। पश्चादग्नेस्तु दर्भेषु प्रा
गग्रेषूपविश्य च। आसिच्यापः शरावादौ दर्भांस्तत्र निधाय च। प्रागग्रदर्भगर्भांस्तु कुर्युर्ब्रह्मां
जलीन्तथा। सव्याहृतिं वदेयुश्च सावित्रीं ब्रह्मयज्ञवत्। त्रिरभ्यसेयुरोंकारं व्याहृतीश्चात्र
कर्मणि। अग्निमीळे इदं सूक्तमनुवाकं यथाविधि। प्रारभेरन् सूक्तं वापि त्वध्यायमन्वाच २३

© Dharmartha Trust J&K. Digitized by eGangotri

पेद्गुरुः। आयश्चित्तादि सकलं होमशेषं समापयेदिति। शौनकोपि। ततोऽग्नेः पश्चिमे देशे
प्राक्कूलकुशसंस्तृते। कृत्वा ब्रह्मांजलीन्पूर्वमासीनः प्राङ्मुखो गुरुः। जपित्वा सकृदों
पूर्वाः समस्ता व्याहृतीर्गुरुः॥ प्रणवाद्यां च सावित्रीं सकृदुच्चारयेत्ततः। पश्चाद्वेदादिमार
भ्यादध्यायसूक्तमेव वा। तच्चैवाधीत्य तत्सर्वं शिष्यानध्यापयेत्तत इति। इत्युपाकर्मप्र
योगः आश्वलायनानां॥ अथोत्सर्जनकालः॥ तत्राश्वलायनः॥ मध्यमाष्टकायामेताभ्यो
देवताभ्योऽन्नेन हुत्वाऽपोऽभ्यवयंति एता एव देवतास्तर्पयंति आचार्यानृषीन्पितृंश्चे
तुदुत्सर्जनमिति। व्याख्यातं चैतत् वृत्तिकारेण मध्याष्टकाग्रहणं षण्मासांतलक्षणा
र्थं तेन तस्याः समीपे माघ्यां पौर्णमास्यामित्यर्थ इति। बौधायनस्तु पौष्यामप्युत्सर्जन
माह॥ श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य तैष्यां माघ्यां वोत्सृजेदिति। अत्र

© Dharmartha Trust J&K. Digitized by eGangotri

कातीयसूत्रे अर्धषष्ठान्मासानधीत्योत्सृजेयुः अर्धसप्तमान्वेति। तथा पौषस्य रोहिण्यां
२४ मध्यमायां वा अध्यायानुत्सृजेयुरिति। तत्र हरिहरः पौषे उत्सर्जनकर्तव्यतामभिधाय प्राह
ततस्त्रिरात्रानन्तरं शुक्लपक्षेषु छन्दांस्यधीयीरन् कृष्णपक्षेष्वङ्गानि। ततः पुनरर्धषष्ठा
25 नर्धसप्तमान्वा मासानधीत्य एवमेवोत्सर्गं विधाय त्रिरात्रमेकरात्रं वावस्थाय पयचेवं
विप्रतिष्ठेरन्। ततः पुनरुपाकृत्य अध्ययने यावदुत्सर्गमिति। अनेनोत्सर्गद्वयं कातीया
नां कर्तव्यमिति प्रतीयते। इदमेव स्पष्टीकृतं गृह्याधरेण। मध्यमाष्टकायां रोहिण्यां वा म
न्त्रब्राह्मणयोरुत्सर्गः पौषस्य रोहिण्यामिति सूत्रेण कर्तव्यः। तदूर्ध्वं शुक्लपक्षेषु मन्त्रब्रा
ह्मणयोरध्ययनं कृष्णपक्षेष्वङ्गानां यावदाषाढकृष्णदशमी श्रावणकृष्णदशमी वा आ
गच्छति तत उत्सर्गः अर्धषण्मासानिति सूत्रेण विहितः कार्य इति द्वयमुपन्यस्यमतो न

© Dharmartha Trust J&K. Digitized by eGangotri

रमप्युदाजहार। अपरे तु एकस्यैवोत्सर्गस्य कालचतुष्टयं मन्यंते तेनोत्सर्गद्वयमिति।
द्वितीयमतमेव चानुसृत्तरेण कारिकायां। पौषमासस्य रोहिण्यां कृष्णाष्टम्यामथापि
वा॥ माघस्यापि घतिथौ तत्र पूर्वाह्णे फाल्गुनस्य वा। उत्सर्गं विधिवत्कुर्याज्जलांते छंद
सां बहिरिति। अत्र द्वितीयमतमेव सूत्रस्वरसानुसारीति प्रतीयते। परिशिष्टे कात्याय
नः। उपाकृत्योदगयने ततोधीयीत धर्मवित् उत्सर्गश्चैक एवैषां तेष्वां प्रोष्ठपदे पिवेति
इदं च सामगविषयं तेषां ग्रामाध्येयसामाध्ययनांगमेकमुपाकर्म सिंहार्के हस्ते विहितं
। अरण्याध्येयसामाध्ययनांगमपरमुपाकर्म मकरार्के हस्ते विहितं। नत्वेवोत्सर्जनद्व
यप्रसक्तौ उत्सर्गश्चैक एषामित्युच्यते। प्रोष्ठपदग्रहणं च सिंहार्कपरं। सिंहे रवौ तु
पुष्यर्क्षे इत्युक्त गार्ग्यवचनात्। एवमुत्सर्जनोत्तरमध्ययनव्यवस्थोक्ता कारिकायां।

© Dharmartha Trust J&K. Digitized by eGangotri

अतआरभ्यषण्मासान्षडंगानित्वधीयते।शुक्लेवेदमधीयीतकृष्णेंगानीतिकेच
२५ नेति।आपस्तंबधर्मप्रश्ने।श्रावण्यांपूर्णमास्यामध्यायमुपाकृत्यमासंप्रदोषेनाधीयी
ततस्तैष्यांपूर्णमास्यांरोहिण्यांवाविरमेत्।अर्द्धपंचमांश्चतुरोमासानित्येकइति।अत्रोज्ज्व
लायांप्रदोषग्रहणाध्ययनेधारणाध्ययनेचनकुर्यात्।प्रदोषग्रहणंज्ञात्वावपूर्ध्वंत
25 द्दोषइतिव्याख्यायविरमेदित्यंतेऽनयोःपक्षयोःपंचमासानधीयीतेत्युक्ता।शिष्टस्तत्र
व्याख्यावसरेऽस्मिन्पक्षेप्रौष्ठपद्यांउपाकरणेशास्त्रांतरदर्शनात्उत्सर्जनंस्यात्प्रतिक
र्षइत्यके।अस्मिन्पक्षेपौष्यनंतरमाघ्यामुत्सर्जनमितिकेचित्।शास्त्रांतरसंवादेन
तदनंतराष्टम्यांत्तश्चितेकिंचिदूनत्वेपिपंचसंख्यावत्सार्द्धचतुःसंख्याया।अपिसंभवा
त।मिदमतिमिस्त्रपाकर्मदिनएवततःपूर्वमुत्सर्जनंकार्यंपुष्येतत्सर्जनंकुर्यादुपा

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मदिनेष्ववेति ख्यादिरगृह्यात् ॥ इत्युत्सर्जनकालनिर्णयः ॥ अथ आश्वलायनाना
मेतत्प्रयोगः ॥ स चोपाकर्मवत् ज्ञेयः । संकल्पे अधीतानां छंदसां आप्यायनद्वारा श्री
परमेश्वरप्रीत्यर्थमिति विशेषः । दधिसक्तुद्रव्येण तस्य स्थाने गृह्यसिद्धान्नद्रव्येणैत्य
न्वाधाने विशेषः । यज्ञोपवीतेन परमात्मानमित्यस्य लोपः । दधिसक्तुवत् गृह्यसिद्धा
न्नेस्य पर्यग्नीकरणादि न वाज्याहुत्यनंतरं गृह्यसिद्धान्नेनैव विंशत्याहुतयः । संन
हनहोमानंतरं नवप्राशनादि यज्ञोपवीतधारणांतं समानं वेदारंभादि । ततः कर्त्रैव प्रमु
क्तं कारिकायां । अथ तीरमपां गत्वा तेऽवगाह्यते तो जलं । सावित्र्याद्यास्तथान्या याद्देव
तास्तर्पयेत्तिच । सावित्रीं तर्पयाम्यग्निं तर्पयामीति तर्पयेत् । जपंतस्त्वग्निमीला दिमं
त्रैस्तर्पणमब्रवीत् । ब्रह्मयज्ञांगमुक्तं यत्तर्पणं स्यादिहापि चेति । अत्र अवगाहेत्यने

© Dharmartha Trust J&K. Digitized by eGangotri

नभस्मगोमयमृत्तिकास्नानानि शास्त्रांतरसिद्धानि विहितानीति शिष्टव्यवहारः। अत
२६ एव विवाहादूर्ध्वंकाले प्रसिद्धस्यापि पिंडदानं महास्नानं न कुर्यात्तिलतर्पणमित्यादिनिषेध
स्यनात्र प्रवृत्तिः। न चात्र नदीनां रजोदोषप्रसक्तिः। उपाकर्मणि चोत्सर्गे रजोदोषो न वि
26 द्यत इति गार्ग्यवचनात्। वेदाश्छंदांसि सर्वाणि ब्रह्माद्याश्च दिवौकसः। जलार्थिनोऽथ पित
रो मरीच्याद्या महर्षयः। उपाकर्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः। पिपासवोऽनुगच्छंति सं
हृष्टाः स्वशरीरिणः। समागमस्तु यत्रैषां तत्र हन्यादयो मलान्। नूनं सर्वे क्षयं यांति किमु
तैकं नदीरज इति छंदोगपरिशिष्टाच्च। स्नानानंतरं च ऋषिपूजा तर्पणे कार्ये। उपाकर्म
णि चोत्सर्गे यथाकालं समेत्य च। ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्तत इति स्मृतिचं
द्रिकोदाहृतवचनात्। तत्रत्यजलोपस्पर्शनपानाभ्याम् अभ्युदयप्राप्तिः। ऋषीणां सिंच २६

© Dharmartha Trust J&K. Digitized by eGangotri

मानानामंत्तराले समाश्रितः। संपिबेद्यः शरीरेण पर्षन्मुक्तजलच्छटः। विघ्नादीन्ब्राह्म
णः कामान्वरादीन्कन्यकातथा।। आमुष्मिकानपि सुखान्प्राप्नुयात्स न संशयः॥ दोणप
रिशिष्टात्। सुखयंतीति व्युत्पत्त्या सुखशब्दो विषयपरः। ततः प्रकृतदेवतातर्पणं ब्रह्मय
ज्ञांगतर्पणं स्वपित्रादितर्पणं च कार्यं। ततो यमतर्पणं कुर्यादिति शिष्टाः। तदित्थं। यमंत
र्पयामि। धर्मराजं। मृत्युं० अंतकं० वैवस्वतं० कालं० सर्वभूतक्षयं। औदुंबरं० दध्नं० नी
लं० परमेष्ठिनं० वृकोदरं० चित्रं० चित्रगुप्तं। इत्येतैस्तर्पयाम्यतः प्रत्येकमेकैकं जलांज
लिं दद्यादिति। ततो यमो निहंतेति श्लोकं दशवारं पठेयुः। इत्युत्सर्जनप्रयोगः इति।। अ
त्रेदं तत्वं। पर्वण्योदपिके कुर्युः श्रावणं तैत्तिरीयकाः बह्वृचाः श्रवणे कुर्युर्हस्तर्क्षे सामवे
दिन इति गोभिलवचनो श्रावणं श्रवणनक्षत्रयुक्तपौर्णमासीकर्म औदयिके इत्यस्य

© Dharmartha Trust J&K. Digitized by eGangotri

पर्वश्श्रवणहस्तेषु प्रत्येकं संबंधो बोध्यः। यदा पूर्वसूर्योदयादारभ्य श्रवणं पर्व हस्तनक्ष
२७ त्रं च प्रवृत्तं उत्तरदिने मुहूर्त्तत्रयमितं तदोक्तवचनाद्विशेषाद्दिनद्वये तत्कर्म प्राप्तौ धनि
ष्ठासंयुतं कुर्यात् श्रावणं कर्म यद्भवेत्। तत्कर्म सफलं विद्यादुपाकरणसंज्ञितं। धनिष्ठाप्र
27 तिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितं। श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः इति व्यास
परिशिष्टवाक्यान्मुत्तरदिने एवानुष्ठानं युक्तं सर्वेषां श्रवणनक्षत्रनिमित्तकं कर्म श्रा
वणं श्रवणपौर्णमासी तन्निमित्तको यो विधिः स श्रावणः नपुंसकमनपुंसकैत्येकशेषः ने
उभयविधं धनिष्ठासंयुतकाले यथा यथायं बह्वृचैस्तैत्तिरीयैः सामवेदिभिश्च कार्यमि
ति व्यासवचनस्यार्थः। धनिष्ठायोगः श्रवणस्य प्रतिपद्योगः पूर्णिमायाः त्वाष्ट्रपदेन
चित्रा तद्योगो हस्तस्य। एतत्त्रितयसंयुक्ते प्रत्येकं यद्धस्तत्र श्रावणमिति योजना। परि २७

© Dharmartha Trust J&K. Digitized by eGangotri

शिष्टस्येतिवोध्यं।यद्यपितैत्तिरीयसंहितायांचित्रायाःचित्रानक्षत्रमिंद्रोदेवतेत्य
नेनेंद्रदेवताकत्वमुक्तंनत्वष्टुःतथापिऋग्वेदांगज्योतिषेतद्देवतात्वोक्तेः।त्वष्टान
क्षत्रमभ्येतिचित्रामितित्वष्टावाअकामयतेत्यादीतिचतैत्तिरीयब्राह्मणेत्वष्टुस्त
स्य द्देवतात्वस्यैषमेवोक्तेश्च।यदोत्तरदिनेमुहूर्त्तत्रयात्किंचिन्न्यूनानतदास्त्कसौमू
र्वेदिनोःपूर्वैवपूर्वदिनस्यमुख्यत्वात्।तैत्तिरीयाणांतुअत्रखंडतिथित्वेचश्रावणीपौ
र्णमासीतुसंगवस्पृग्यदाभवेत्तदैवोदपिकंग्राह्यंनान्यदौदयिकंभवेदित्तिगार्ग्य
वचनान्निर्णयः।अथसंक्रांत्यादिविषयेसर्वेषांनिर्णयउच्यते।अर्द्धरात्रादधस्ताच्चे
त्संक्रांतिर्ग्रहणंतथा।उपाकर्मनकुर्वीतपरतश्चेन्नदोषकृदितिकात्यायनवचना
त्।यदार्धरात्रादर्वाकूचेद्ग्रहःसंक्रमएववानोपाकर्मतदाकुर्याच्छ्रावण्यांश्रवणे

© Dharmartha Trust J&K. Digitized by eGangotri

पि चेति वृद्धमनुवचनाच्च यथा प्रथममनुष्ठानं। अत्र श्रावणीग्रहणं आषाढीप्रोष्ठप
२८ दोरप्युपलक्षणं। श्रवणग्रहणं पंचमीहस्तयोरप्युपलक्षणं। उपाकर्माधिकरणे हो
रात्रे संक्रान्तिर्ग्रहणं वा तदोपाकर्म न कर्तव्यमिति निष्कर्षः। अस्तादिदोषस्य प्रथमोपा
कृतिपरत्वबोधकवचनस्यानार्षत्वात्प्रथमवत्तत्र द्वितीयाद्युपाकर्मोपि न स्वर्वेषां
भवतीति नवीनानां निष्कर्षः। अत एवान्यत्र कश्चिद्गुरोश्चास्तमये प्रयाते मासद्वयेप्युद
यो न चास्ति तदापि कुर्वीत न पवित्रमत्र नैमित्तिकत्वात्तु न नित्यकत्वात्। मूढादिदोषाग्र
हणं यदि स्यात्तद्दोषभावादपि ककर्टस्थः तनु द्विजाः श्रावणकर्म कुर्युर्न तत्साज्यमाहु
र्मुनयो मनीषिभिः न कुर्युर्ये ह्युपाकर्म मूढदोषादिषु द्विजाः संवत्सरकृतं कर्म तत्सर्वं
निष्फलं भवेदित्युक्तं। एवं मलमासे उत्सर्गोपाकर्मणी न स्तः सामगेतरेषां अथोष २८

© Dharmartha Trust J&K. Digitized by eGangotri

घि प्रादुर्भावतदभावयोर्विषये सर्वेषां निर्णयः। श्रावणपक्षे ओषधीषु जातासु हस्ते
न पौर्णमास्यां वाऽध्यायोपाकर्माग्निमुपसमाधाय व्याहृतिपर्यंतं कृत्वा पंच कांडर्षी
न् जुहोति प्रजापतये कांडर्षये स्वाहा० स्वयंभुवे कांडर्षये स्वाहेति कांडर्षयः कांडनामा
नि वा सावित्रीमृग्वेदं यजुर्वेदं सामवेदमथर्ववेदं सदसस्पतिमिति हुत्वा त्रीनादितो
नुवाकानधीयते कांडादीन्वा सर्वानुजयादि प्रतिपद्यंत इत्युपाकरणे प्रथमेनानुवाके
नाधीयत इत्युत्सर्जनेन तु पूर्णघटितत्वात्ततो विस्तृते स्मृतितः सूत्रस्यानंतरंगत्वात्तस्य
विशेषत्वाच्च हिरण्यकेशिनां तु मुख्यो हस्तस्तदभावे श्रावणपादितन एव आश्वलाय
नानां त्वथातोऽध्यायोपाकरणमोषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पंचम्यां हस्तेन
वेति सूत्राच्छ्रवणादयः क्रमेण कालाः एवं कातीयानामपि प्रागुक्तनत्सूत्रात् सामगा

© Dharmartha Trust J&K. Digitized by eGangotri

नांतु भाद्रशुक्लस्य हस्तो मुख्यस्तदभावे श्रीणीग्राशुक्त गोभिलसूत्रात् हिरण्यकेशिसूत्रा
२९ त्तै हस्ते श्रावण्यां वा कार्यं। श्रवणनक्षत्रयुक्तचंद्रमसा युक्ता पौर्णमासी श्रवणा तद्युक्त
ः पक्षः श्रावणशुक्लपक्षस्तत्र इत्यर्थः। अत्र पौर्णमासी मुख्यः कालस्तैत्तिरीयाणां प
29 र्वण्यौदयिके इत्यादिवाक्ये पुनस्याएवोपादानात्। आपस्तंबसूत्रेन तथालाभस्य प
र्वहरदत्तेन प्रतिपादितत्वाच्च। यत्तु हेमाद्र्यादिना संक्रांतिग्रहणे वापि पौर्णमास्यां यदा
भवेत् उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति वाक्ये द्रवत्तैत्तिरीयग्रहे पंच
म्यूपादानाभावात्तैत्तिरीयैः प्रोष्ठपद्यां कार्येति तदाह मनुः श्रावण्यां प्रोष्ठपद्यां वाप्युपाकृ
त्य यथाविधिः युक्तश्छंदांस्यधीयीत मासान्विप्रोर्द्धपंचमानिति प्रोष्ठपद्यामपि दोष
आषाढ्यां कार्येतदुक्तं कौर्मे श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः आषाढ्यां पौ २९

© Dharmartha Trust J&K. Digitized by eGangotri

र्णमास्यां वा वेदोपाकरणं भवेदिति एवं चाषाढादिमासत्रयमध्ये य एव कालो निर्दुष्ट
स्तत्र कार्यमित्युक्तं तत्र हस्तनक्षत्रासंभवे इति वाच्यं। नैत्तिरीयाणां गृह्ये हस्तानुपा
दानेपि प्रागुक्तहिरण्यकेशिसूत्रे हस्तस्योपादानात् संक्रान्त्यादिके ओषधिप्रादुर्भावा
भावस्याशौचादेश्चोपलक्षणं तेन येन केनचिन्निमित्तेन मुख्यकालातिक्रमे स्वस्वगृह्यो
युक्तानुकल्पकालाभावे च प्रोष्ठपद्यादौ स्वस्वनिमित्ते कार्यमिति हेमाद्र्याशय इति वाच्यं
इति केचित्तु वस्तुतस्तु पौर्णमास्या मुख्यत्वस्य प्रागुक्तत्वाद् दर्शे पंचमां नित्यापसंवेन प्रोष्ठ
पद्युपाकरणस्य च नस्य पूर्वं हरदत्तोक्तत्वेच्च ततोपि तस्यान्तरंगत्वादित्वान्नैत्तिरीया
णां श्रावण्यभावे प्रोष्ठपदी तदभावे नुदुक्त्या हस्तस्तदभावे आषाढी इति तन्दुक्तं पद्याश्रु
ते सम्यग्गवेति वाच्यं तथाचैवं संतन्नेषां सिद्धं श्रावणी मुख्यः कालः साप्यौदयिकी उक्तगा।

© Dharmartha Trust J&K. Digitized by eGangotri

ग्योत्। तथा च पौर्णमासी द्विधा शुद्धा विद्धा च तत्र शुद्धायामसंदेह एव वेधोत्र भूतोष्टादशेति वच
३० नोक्तो न ग्राह्यस्तथा हि सति द्वादशघटिका चतुर्दशी सत्वे तद्दिनेऽनुष्ठानापत्तिर्निषिद्धा प्रवृत्तेरो
मिति चेन्नोदये संगवस्पर्शे इति वचनविरोधापत्तेः तस्मात् त्रिमुहूर्तात्मक एव वेधस्ताह
श विद्धायां तस्यामनुष्ठाननिषेधकं कालिकापुराणवचनं संप्राप्ते वानुश्रुती ब्रह्मलापर्वणि पौ
30 दयिके पुनः। अतो भूतदिने तस्मिन्नोपाकरणमिष्यत इति औदयिकां विधाय कमुक्त गार्ग्य
वचनं द्विमुहूर्तमात्रसत्वेऽनुष्ठानातिप्रसंगस्त्वचास्त्रावणी पौर्णमासीत्विति प्रागुक्ते रितित्र
त एव भद्रासंभव एव न शुद्धपक्षे तत्संभवेपि न तत्प्रयुक्तदोषः विशेषवचनाभावात् ज्योतिःशा
स्त्रोक्तसामान्यनिषेधस्तु मुखपरित्यागमात्रेण सुपरिहर इति दिक्॥ अथ मृत्तिकास्नान
बोधक बौधायनसूत्रं। अथातो मृत्तिकास्नानविधिं व्याख्यास्यामो ब्रह्मचारी गृहस्थो वा ३०

नप्रस्थः परिव्राजको वाश्वकं ते सहस्रपरमा देवीति भूमिं दूर्वे अभिमंत्र्योद्धृतासीति नदी
तटाल्लोष्ठमादाय कांडात्कांडादिति द्वाभ्यां दूर्वामादाय मृत्तिके हर मे पापमिति दूर्वां लोष्ठे प्र
तिष्ठाप्य यतं इंद्र भयामहे स्वस्तिदा स्वस्ति न इंद्रो वृद्धश्रवा स्त्रातारमिंद्रमिति प्रतिमंत्रं प्र
तिदिशं दूर्वासहितं लोष्ठमुत्सृज्योर्ध्वं ऊषुण ऊतये उदुत्यमूर्ध्वं स्योना पृथिवीत्यधस्तरणि
विश्वदर्शतेंद्र ति लोष्ठमादित्यं दर्शयित्वा श्रीर्मे भजत्विति शिरः प्रदक्षिणीकृत्यालक्ष्मीर्मे न
श्यत्विति हस्तस्थं लोष्ठमुत्सृज्याप उपस्पृश्य सहस्रशीर्षेति शिर आलिप्य गंधद्वारामिति
ललाटं विष्णुर्मुखानीति मुखमोजोग्रीवाभिरिति ग्रीवां महां इंद्रो वज्रबाहुरिति बाहू सोमा
नं स्वरणमिति कक्षौ ब्रह्मजज्ञानमिति स्तनौ शरीरं यज्ञशमलमिति शरीरं नाभिर्मे चित्तमि
ति नाभिं आपांतमन्युरिति कटिं विष्णोरराटमसीति पृष्ठं वरुणस्य स्कंभनमसीति मेढ्र

मानंदनंदाविस्यांडावृत्त्वारोजइत्युत्तज्जंघाभ्यामितिजंघेचरणंपवित्रमित्तिचरणौरविं
३१ दं विष्णुस्त्वाणिपदेति द्वाभ्यामधस्तलपादौ सजोषाइंद्र सगणोमरुद्भिरितिशेषं दूर्वासहितं
लोष्ठं शिरस्सिनिधाय सुमित्रानआप ओषधयसंत्विर्त्युत्मानममिषिंचेत दुर्मित्रास्तस्मै
31 भूयासुरितिप्रथमंयोस्मान्द्वेष्टीतिद्वितीयंपंचवयंद्विष्मइतितृतीयं लोष्ठंदेशेनिनीयहि
रण्यशृंगंवरुणंप्रपद्यइतितीर्थंप्रार्थ्यनमोग्नयेप्सुमतइतितीर्थंदेवान्नमस्कृत्यपुरूपां
क्रूरमित्तिदुष्टंजलेदूरीकृत्यत्रिरपोवगाह्याचम्यापोहिष्ठामयोभुवइतितिसृभिर्हिरण्य
वर्णाःशुचयःपावकाइतिचतसृभिःपवमानःसुवर्जनःप्रजापतेरक्ष्यश्वयन्माहृतमसि
समुद्र उदरमंतरिक्षं सर्वेषुवाएषुलोकेष्वितस्येतेरनुवाकेश्च प्रोक्षितशिरसिमार्जयित्वेमंमेगं
गइत्यंगुष्ठेनतीर्थंत्रिरालोड्यर्तंचसत्यंचेत्यघमर्षणसूक्तमंतर्जलेजपित्वात्रिरपोव ३१

© Dharmartha Trust J&K. Digitized by eGangotri

गा स्याचम्यार्ईज्वलंतीस्याचम्या कार्यकार्यवर्कीर्णीत्यपोवगीस्यरजोभूमिस्त्वेत्तिजपि
त्वाचम्यदेवान्नषीन्पितृंस्तर्पयित्वायेवोधवाइतिसलिलेदत्वाये अग्निदग्धाइतिस्थ
लोदकंदत्वायेकेचास्मत्कुलेजाताइतिवस्त्रंनिष्पीड्यशुचीवोहव्येतिवस्त्रमद्भिःप्रोक्ष्य
देवस्यत्वेत्यादायावधूतमित्यवधूयोदुत्यंजातवेदसमित्यादिदित्यंदर्शयित्वावहं
तीतिपरिधायाचम्यासनेसोमंमंडलेउपविष्टोस्मीतित्रीन्प्राणायामांधारयित्वाष्टशतं
गायत्रीजपेद्ब्राह्मणःपूतोभवत्यष्टसहस्रगायत्रीजपेद्रोगीरोगान्प्रमुच्यतेद्वादशसं
हस्रगायत्रीजपेद्ब्रह्महत्यागोवधगुरुतल्पसुरापानसुवर्णस्तेयानामन्येषांचसर्वपा
पानांप्रणाशनमितिविज्ञायतेहित्वातुदेहंनारायणंप्रविशतीत्याहभगवान्बोधाय
नःयेबांधवाबांधवावायेन्यजन्मनिबांधवाः॥नेतृप्तिमखिलायांतुयेचास्मत्तोयकां

क्षिणः॥२॥ये अग्निदग्धा येन॰ तोयेन॰गतिं॥२॥ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः॥ ते
३२ गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकं॥३॥ अथैतदेव स मंत्रं सव्याख्यानं विशदी क्रियते। अथातो मृ
त्तिकास्नानविधिं व्याख्यास्यामो ब्रह्मचारी गृहस्थो वानप्रस्थः परिव्राजको वा अश्वक्रांते रथक्रांते वि
३२ ष्णुक्रांते वसुंधरा। शिरसा धारयिष्यामि रक्षस्व मां पदे पदे। भूमिर्धेनुर्धरणी लोकधारिणी इति भू
मिमभिमंत्र्या सहस्रपरमा देवी शतमूला शतांकुरा सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी इ
ति दूर्वा अभिमंत्र्य उद्धृतासि वराहेण कृष्णेन शतबाहुना इति नदीतटाल्लोष्टमादाय कांडात्कां
डात्प्ररोहन्ती परुषः परुषः परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च। या शतेन प्रतनोषि सहस्रे
ण विरोहसि। तस्यास्ते देवीष्टके विधेम हविषा वयं इति द्वाभ्यां दूर्वा आदाय। मृत्तिके हन मे पापं य
न्मया दुष्कृतं कृतं। मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रति ३२

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टितं मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके तया हत्तेन पापेन गच्छामि परमां गतिं । इति
दूर्वासहितं लोष्टं वामकरे प्रतिष्ठाप्य । यत इन्द्र भयामहे ततो नो अभयं कृधि । मघवं छग्धि
तव तन्न ऊतये वि द्विषो वि मृधो जहि । स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर
एतु नः स्वस्तिदा अभयंकरः । स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति न
स्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु । त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुह
वं शूरमिन्द्रं । हुवे नु शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः इति चतुर्भिर्मंत्रैः पूर्वादि
क्रम प्रतिमंत्र प्रतिदिशं दूर्वासहितं लोष्टमुत्सृज्य । ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता
। ऊर्ध्वो वाजस्य सनिता यदंजिभिर्वाघद्भिर्विह्वयामहे इति ऊर्ध्वं । स्योना पृथिवि भवानृक्ष
रा निवेशनी । यच्छा नः शर्म सप्रथाः इत्यधः । गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं । इ

© Dharmartha Trust J&K. Digitized by eGangotri

श्वरीꣳसर्वभूतानांतामिहोपह्वयेश्रियंइतिहस्ताभ्यांकिंचित्किंचिल्लोष्टमादाय।उदुत्यं
३३ जातवेदसंदेवंवहंतिकेतवः।दृशेविश्वायसूर्यंइतितरणिर्विश्वदर्शतोज्योतिष्कृदसि
सूर्यविश्वमाभासिरोचनमितिवादूर्वासहितंलोष्टमादित्यंदर्शयित्वा।सहस्रशीर्षापुरु
33 षःसहस्राक्षःसहस्रपात्सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलमितिशिरस्यालिप्याग्नी
मैभज्ज्वन्तुइतिगंधद्वारामितिवातिलकरूपेणललाटमुपस्पृश्य।अलक्ष्मीर्मेनश्यतुइति
आत्मानंप्रदक्षिणीकृत्यहस्तस्थलोष्टमुत्सृज्यहस्तौप्रक्षाल्यअपउपस्पृश्यपुनर्मृदमादा
य।विष्णुमुखावैदेवाश्छन्दोभिरिमान्लोकाननपजय्यमभ्यजयन्इतिमुखं।ओजोयीवाभि
निस्ततिमस्यमिरिंद्रꣳस्वपसावहेनइतिग्रीवां।महाꣳइंद्रोवज्रबाहुःषोडशीशर्मयच्छतु।
स्वस्तिनोमघवाकरोतुहंतुपाप्मानंयोस्मान्द्वेष्टिइतिबाहू॥सोमानꣳस्वरणंकृणुहिब्रह्मल ३३

© Dharmartha Trust J&K. Digitized by eGangotri

णस्यते। कक्षीवंतं य औशिजं इति कक्षे। ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतस्सुरुचो वेन आ
वः। स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः इति स्तनौ। शरीरं यज्ञशमलं कु
सीदं तस्मिं त्सीदतु योऽस्मान्द्वेष्टि इति शरीरं। नाभिर्मे चित्तं विज्ञानं इति नाभिं। आपान्तमन्यु
स्तृपलप्रभर्मा धुनिः शिमीवां छरुमां ऋजीषी। सोमो विश्वान्यतसा वनानि नार्वागिंद्रं प्रति
मानानि देभुः इति कटिं। विष्णोरराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि
विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा इति पृष्ठं। वरुणस्य स्कंभनमसि वरुणस्य स्कंभस
र्जनमसि प्रत्यस्तो वरुणस्य पाशः इति मेढ्रं। आनंदनंदावांडौ मे इत्यांडौ। ऊरू वो राज इत्यू
रू। जंघाभ्यां पद्भ्यां धर्मोऽस्मि। विशि राजा प्रतिष्ठितः इति जंघे। नव रणे पवित्रे विततं पुराणे ये
न पूतस्तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम इति चरणौ।

इदंविष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुरे।त्रीणिपदाविचक्रमेविष्णुर्गोपाअ
३४ दाभ्यः।अतोधर्माणिधारयन्इतिद्वाभ्यामधस्तलपादौप्रसजोषाइंद्रसगणोमरुद्भिःसोमंपि
बवृत्रहंछूरविद्वान्।जहिशत्रूंरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनःइतिशेषंदूर्वा
34 सहितंलोष्टंशिरसिनिधाय।सुमित्रानआपओषधयःसंतुइत्यात्मानमभिषिंचेत्।दुर्मि
त्रास्तस्मैभूयासुःइतिप्रथमं।योस्मान्द्वेष्टिइतिद्वितीयं।पंचवयंद्विष्मइतितृतीयं।लोष्टंदे
शेनिनीयहिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहियाचितः।यन्मयाभुक्तमसाधूनांपापेभ्यश्च
प्रतिग्रहः।यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं।तन्नइंद्रोवरुणोबृहस्पतिःसविताचपु
नंतुपुनःपुनः।इतितीर्थंसंप्रार्थ्य।नमोग्नयेप्सुमतेनमइंद्रायनमोवरुणायनमोवारुण्यैन
मोद्भ्यःइतितीर्थदेवतानमस्कृत्य।यदपांक्रूरंयदमेध्यंयदशांतंतदपगच्छतात्।अत्याश ३४

© Dharmartha Trust J&K. Digitized by eGangotri

नादत्तीपानाद्यच्च उग्रात्प्रतिग्रहात्। तन्नो वरुणो राजा पाणिना ह्यवमर्शतु सोहमपा
पो विरजो निर्मुक्तो मुक्तकिल्बिषः नाकस्य पृष्ठमारुह्य गच्छेत् ब्रह्मसलोकतां यश्चाप्सु व
रुणः स पुनात्वघमर्षण इति दुष्टजलं दूरीकृत्य। जुबकाय स्वाहा इति त्रिरपो वगाह्याच
म्य। आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे यो वः शिवतमो रस
स्तस्य भाजयतेह नः उशतीरिव मातरः तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आ
पो जनयथा च न इति च तसृभिः। हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विं
द्रः अग्निं या गर्भं दधिरे विरूपास्तान आपः शं स्योना भवन्तु। यासां राजा वरुणो याति
मध्ये सत्यानृते अवपश्यं जनानां। मधुश्चुतः शुचयो याः पावकास्तान आपः शं स्योना
भवन्तु। यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोंद

© Dharmartha Trust J&K. Digitized by eGangotri

त्तिप्युक्तास्तानआपःशंस्योनाभवंतु।शिवेनमाचक्षुषापश्यतापःशिवयात्तनुवोपस्पृश
३५ तत्वचंमेसर्वांग्अग्नींरप्सुषदोहुवेवोमयिवर्चोवलमोजोनिधत्तइतिचतसृभिःपव
मानःसुवर्जनःपवित्रेणविचर्षणिःयःपोतासपुनातुमा।पुनंतुमादेवजनाःपुनंतुमनवो
35 धिया।पुनंतुविश्वआपवःजातवेदःपवित्रवत्।पवित्रेणपुनाहिमाशुक्रेणदेवदीद्यत्
अग्नेक्रत्वाक्रतूंरनुयत्तेपवित्रमर्चिषिअग्नेविततमंतरा।ब्रह्मतेनपुनीमहेउभाभ्यांदे
वसवितःपवित्रेणसवेनचइदंब्रह्मपुनीमहेवैश्वदेवीपुनतीदेव्यागात्।यस्यैवह्वीस्त
नुवोवीतपृष्ठाःतयामदंतःसधमाद्येषुवयंस्यामपतयोरयीणांवैश्वानरोरश्मिभिर्मा
पुनातुवातःप्राणेनेषिरोमयोभूः।द्यावापृथिवीपयसापयोभिःऋतावरीयज्ञियेमापु
नीतांबृहद्भिःसवितस्तभिःवर्षिष्ठैर्देवमन्मभिःअग्नेदक्षैःपुनाहिमा।येनदेवाअपु ३५

© Dharmartha Trust J&K. Digitized by eGangotri

नत पेनापोदिव्यंकश्च्रः तेनदिव्येनब्रह्मणा इदं ब्रह्मपुनीमहे यः पावमानीरध्येतिरृषि
भिः संभृतंरसं स सर्वं पूतमश्नाति स्वदितं मातरिश्वना पावमानीर्यो अध्येति ऋषिभिः
संभृतं रसं तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकं पावमानीः स्वस्त्ययनीः सुदुघा
हि पयस्वतीः ऋषिभिः संभृतो रसः ब्राह्मणेष्वमृतं हितं पावमानीर्दिशन्तु नः इमं लोक
मथो अमुं कामान्समर्धयन्तु नः देवीर्देवैः समाभृताः पावमानीः स्वस्त्ययनीः सुदुघा
हि घृतश्चुतः ऋषिभिः संभृतो रसः ब्राह्मणेष्वमृतं हितं येन देवाः पवित्रेण आत्मानं पु
नते सदा तेन सहस्रधारेण पावमान्यः पुनन्तु मा प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयं
तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे इन्द्रः सुनीती सह मा पुनातु सोमः स्वस्त्या वरुणः स
मीच्या यमो राजा प्रमृणाभिः पुनातु मा जातवेदा मोर्जयन्त्या पुनातु प्रजापतेरक्षयश्च

© Dharmartha Trust J&K. Digitized by eGangotri

यत्तन्नत्यपरापतत्तदश्वोभवद्यदश्वयत्तदश्वस्याश्वत्वंतद्देवाअश्वमेधेनैवप्रत्यदधुरेष
३६ वैप्रजापतिंसर्वंकरोतियोश्वमेधेनयजतेसर्वएवभवतिसर्वस्यवाएषाप्रायश्चित्तिः
सर्वस्यभेषजंसर्वंवाएतेनपाप्मानंदेवाअतरन्नपिवाएतेनब्रह्महत्यामतरंस्तत्सर्वंपाप्मा
नं१तरतितरतिब्रह्महत्यांयोश्वमेधेनयजतेयउचैनमेवंवेदोत्तरंवैतत्प्रजापतेरक्ष्यश्व
36 यत्तस्मादश्वस्योत्तरतोवद्यंतिदक्षिणतोन्येषांपशूनांवैतसःकटोभवत्यप्सुयोनिर्वाअ
श्वोप्सुजोवैतसःस्वएवैनंयोनौप्रतिष्ठापयतिचतुष्टोमःस्तोमोभवतिसरद्धवाअश्वस्य
सक्थ्यावृहन्त्तद्देवाश्चतुष्टोमेनैवप्रत्यदधुर्यच्चतुष्टोमःस्तोमोभवत्यश्वस्यसर्वत्वाय॥
मारुतमसिमरुतामोजोपांधारांभिंधिरमयतमरुतःश्येनमायिनंमनोजवसंवृषण
ंसुवृक्तिंयेनशर्धउग्रमवसृष्टमेतितदश्विनापरिधत्तंस्वस्ति।पुरोवातोवर्षन्जि ३६

© Dharmartha Trust J&K. Digitized by eGangotri

न्वराट्त्वास्वाहावातावद्वर्षन्नुग्रराट्त्वास्वाहास्तनयन्वर्षन्भीमराट्त्वास्वाहानशन्यवस्फू
र्जन्दिद्युद्वर्षन्त्वेषराट्त्वास्वाहातिरात्रंवर्षन्पूर्तिराट्त्व॥१॥स्वाहावहुहायमवृषादितिश्रु
तराट्त्वास्वाहातपतिवर्षन्विराट्त्वास्वाहावस्फूर्जन्दिद्युद्वर्षन्भूतराट्त्वास्वाहामांदावा
शाःशुंध्यूरजिराःज्योतिष्मतीस्तमस्वरीरुंदतीःसुफेनाः।मित्रभृतःक्षत्रभृतःसुराष्ट्राइ
हमावत।वृष्णोअश्वस्यसंदानमसिवृष्ट्यैत्वोपनह्यामि॥२॥देवावसव्याअग्नेसोमसू
र्य।देवाःशर्मण्यामित्रावरुणार्यमन्।देवाःसपीतयोपांनपादाशुहेमन्।उद्नोदत्तो
दधिंभिंतदिवःपर्जन्यादंतरिक्षात्पृथिव्यास्ततोनोवृष्ट्यावत।दिवाचित्तमःकृण्वंतिप
र्जन्येनोदवाहेनापृथिवींयद्व्युंदंति।आयंनरःसुदानवोददाशुषेदिवःकोशमचुच्यवुः
।विपर्जन्याःसृजंतिरोदसीअनुधन्वनायंति॥३॥वृष्टयः।उदीरयथामरुतःसमुद्रतोयू

© Dharmartha Trust J&K. Digitized by eGangotri

येवृष्टिंवर्षयथापुरीषिणः।नवोदस्थाउपदस्यंतिधेनवःशुभंयातामनुरथाअवृत्सतनास्त
३७ जावृष्टिंदिवआद्भिःसमुद्रंपृण।अब्जाअसिप्रथमजाबलमसिसमुद्रियं।उन्नंभयपृ
थिवींभिंधीदंदिव्यंनभः।उद्नोदिव्यस्यनोदेह्येशानोविसृजादृतिं।येदेवादिविभागा
येंतरिक्षभागायेपृथिविविभागाः।तइमंयज्ञमवंतुतइदंक्षेत्रमाविशंतुतइदंक्षेत्रम
37 नुविविशंतु॥२॥मारुतमसिमरुतामोजइतिकृष्णंवासःकृष्णतूषपरिधत्तएतद्वैव
ष्ट्यैरूपंसरूपएवभूत्वापर्जन्यंवर्षयतिरमयत्तमरुतःश्येनमापिनमितिपश्चा
द्वातंप्रतिमीवतिपुरोवातमेवजनयतिवर्षस्यावरुध्यैवातनामानिजुहोतिवायुर्वै
वृष्ट्याईशेवायुमेवस्वेनभागधेयेनोपधावतिसएवास्मैपर्जन्यंवर्षयत्यष्टौ॥१॥
जुहोतिचतस्रोवैदिशश्चतस्रोवांतरदिशादिग्भ्यएववृष्टिंसंप्रच्यावयतिकृष्णा ३७

© Dharmartha Trust J&K. Digitized by eGangotri

जिनेन संयौति हविरेवाकरं न्वेंदि संयौत्यवरुन्ध्ये यतीनामघमानानांं शीर्षाणि
परापतं ते खर्जूरा अभवं तेषांं रस ऊर्ध्वोपतत्तानि करीराण्यभवन्सौम्यानि वै क
रीराणि सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति यत्करीराणि भवंति ॥२॥ सौ
म्ययैवाहुत्या दिवो वृष्टिमवरुंधे मधुषा संयौत्यपां वा एष ओषधीनांं रसो यन्मध्व
द्भ्य एवौषधीभ्यो वर्षत्यथो अद्भ्य एवौषधीभ्यो वृष्टिं निनयति मांदा वाशा इति संयौ
ति नामधेयैरेवैना अछैत्यथो यथा ब्रूयादसावेहीत्येवमेवैना नामधेयैरा ३ च्या
वयति वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोपनह्यामीत्याह वृषा वा अश्वो वृषा प
र्जन्यः कृष्ण इव खलु वै भूत्वा वर्षति रूपेणैवैनंं समर्धयति वर्षस्यावरुध्यै ॥ यो
वा अश्वस्य मेध्यस्य शिरो वेद शीर्षण्वान्मेध्यो भवत्युषा वा अश्वस्य मेध्यस्य शिरः

© Dharmartha Trust J&K. Digitized by eGangotri

सूर्यश्चक्षुर्वातः प्राणश्चंद्रमाः श्रोत्रं दिशः पादा अवांतरदिशाः पर्शवो होरात्रे निमेषा
३८ र्द्धमासाः पर्वाणि मासाः संधानान्यृतवोंगानि संवत्सर आत्मा रश्मयः केशा नक्षत्रा
णि रूपं तारका अस्थीनि नभो मांसान्योषधयो लोमानि वनस्पतयो वाला अग्नि
38 र्मुखं वैश्वानरो व्यात्तं ॥१॥ समुद्र उदरमंतरिक्षं पायुर्द्यावापृथिवी आंडौ ग्रावा शेपः
सोमो रेतो यज्जंजभ्यते तेन विद्योतते यद्विधूनते तेन स्तनयति यन्मेहति तद्वर्षति वाग
वास्य वाग् अहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु
जायते एतौ वै महिमानावश्वमभितः संबभूवतुर्हयो देवानवहद्र्वासुरान्वाजी गंधर्वा
नश्वो मनुष्यान्त्समुद्रो वा अश्वस्य योनिः समुद्रो बंधुः २ सर्वेषु वा एषु लोकेषु मत्यवोऽन्वा
यत्ताः तेभ्यो पदाहुतीर्जुहुयात् लोके लोक एनं मत्स्यविंदेत्। मत्यवे स्वाहा मत्यवे स्वा ३८

© Dharmartha Trust J&K. Digitized by eGangotri

हेत्यभिपूर्वमाहुत्तीर्जुहोतिलोकाल्लोकादेवमृत्युमवयजतेनैनंलोकेमृत्युर्विंदतियद
मुष्मैस्वाहामुष्मैस्वाहेतिजुहुयात्संचक्षीताबकुंमृत्युममित्रंकुर्वीतमृत्यवेस्वाहेत्येकस्मा
एवैकांजुहुयात् एकोवाअमुष्मिंलोकेमृत्युःअशनयामृत्युरेवातमेवामुष्मिंलोकेऽव
यजतेभ्रूणहत्यायैस्वाहेत्यवभृथआहुतिंजुहोतिःभ्रूणहत्यामेवावयजतेतदाहुःमत्भ्रू
णहत्यापापान्नियाव्यकस्माद्धन्त्येपिक्रियतइतिअमृत्युर्वोअन्योभ्रूणहत्यायाइत्याहुःभ्रू
णहत्यावावमृत्युरितियत्भ्रूणहत्यायैस्वाहेत्यवभृथआहुतिंजुहोतिमृत्युमेवाहुत्या
तर्पयित्वापरिमाणंकृत्वाभ्रूणघ्नेभेषजंकरोतिएतांऽहवैमुंडिलऔदन्यवःभ्रूणहत्या
यैप्रायश्चित्तिविदांचकारयोहास्यापिप्रजायांब्राह्मणंऽहंतिसर्वस्मैतस्मैभेषजंकरोति
जुंबकायस्वाहेत्यवभृथउत्तमामाहुतिंजुहोतिवरुणोवैजुंबकःअंततएववरुणम

© Dharmartha Trust J&K. Digitized by eGangotri

वयजतेखलतेविक्लिधस्यमुक्लस्यपिंगाक्षस्यमूर्द्धंजुहोतिएतद्वैवरुणस्यरूपंरूपेणै
३६ ववरुणमवयजतेइत्यनुवाकेश्चापिरसिमाजेयित्वाइमंमेगंगेयमुनेसरस्वतिशुतुद्रि
स्तोमंसचतापरुष्णियाअसिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमयाइति
अंगुष्ठेनतीर्थंत्रिरावर्त्तयित्वाद्रुपदादिवमुंचतुद्रुपदादिवेन्मुमुचानःस्विन्नःस्नात्वीमला
39 दिवापूतंपवित्रेणेवाज्यमापःशुंधंतुमैनराइतिऋतंचसत्यंचाभीद्धात्तपसोध्यजायतत
तोरात्रिरजायततततःसमुद्रोअर्णवःसमुद्रादर्णवादधिसंवत्सरोअजायतअहोरात्राणि
विदधद्विश्वस्यमिषतोवशीसूर्याचंद्रमसौधातायथापूर्वमकल्पयत्दिवंचपृथिवीं
चांतरिक्षमथोसुवःयत्पृथिव्यांरजस्वमांतरिक्षेविरोदसीइमांस्तदापोवरुणःपु
नात्वघमर्षणःपुनंतुवसवःपुनातुवरुणःपुनात्वघमर्षणःराष्ट्रभृतस्यमध्येभुवनस्य ३६

© Dharmartha Trust J&K. Digitized by eGangotri

गोघ्नाएषपुण्यकृतांलोकानेषमृत्योर्हिरण्मयंद्यावापृथिव्योर्हिरण्मयंसंश्रितं
सुवःसनःसुवःसंशिशाधिइत्यघमर्षणसूक्तंचांतर्जलेजपित्वाजुंवकायस्वाहेतित्रिर
पोऽवगाह्यआर्द्रंज्वलतिज्योतिरहमस्मिज्योतिर्ज्वलतिब्रह्माहमस्मियोऽहमस्मिब्रह्माह
मस्मिअहमस्मिब्रह्माहमस्मिअहमेवाहंमांजुहोमिस्वाहाइत्याचम्यअकार्यकार्यवकी
र्णीस्तेनोभ्रूणहागुरुतल्पगःवरुणोऽपामघमर्षणस्तस्मात्पापात्प्रमुच्यतेइत्यपोवगाह्यर
जोभूमिस्त्वमांरोदयस्वप्रवदंतिधीराःआक्रांत्समुद्रःप्रथमेविधर्मेजनयन्प्रजाभुवन
स्यराजावृषापवित्रेअधिसानोअव्येवृहत्सोमोवावृधेसुवानइंदुरितिजपित्वाऽऽचम्यदे
वर्षिपितृतर्पणंकृत्वायेबांधवाबांधवावायेन्यजन्मनिबांधवाःतेतृप्तिमखिलायांतुये
चास्मत्तोयकांक्षिणइतिसलिलंदत्वायेअग्निदग्धायेनग्निदग्धायेवाजाताःकुलेमम

© Dharmartha Trust J&K. Digitized by eGangotri

भूमौदत्तेनतोयेनतत्स्नायांतुपरांगतिं इति स्थलोदकंदत्वायेकेचेतिवस्त्रंनिष्पीड्यशु
४० चीवोहव्येतिवस्त्रमद्भिः प्रोक्ष्यदेवस्यत्वेत्यादायावधूतमित्यवधूयोदुत्यंजातवेदसमि
त्यादित्यंदर्शयित्वाऽऽवहन्तीतिपरिधायाचम्यासनेसोममंडलेउपविष्टोऽस्मीतिध्या
यन्त्रीन्प्राणायामान्कृत्वाष्टशतंगायत्रींजपेदित्यादि। अत्रभस्मादिस्नानानामावश्य
५० कत्वमनुक्तत्वात्फलार्थंक्रियमाणेतुनदोषः संकल्प्यभस्मादायईशानायशिरसि
तत्पुरुषायमुखेअघोरायहृदयेवामदेवायगुह्येसद्योजातायपादयोः अग्निरितिभ
स्मजलमितिभस्मस्थलमितिभस्मव्योमेतिभस्मसर्वंह वा इदंभस्मेतिस्नात्वासंक
ल्प्यगंधद्वारामितिगोमयमादायाग्रमग्रेचरंतीनामोषधीनांवनेवनेतासामृषभप
त्नीनांपवित्रंकायशोधनंतन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदाइतिशिरःप्रभृत्या ४०

लिप्य स्नात्वा सेकल्प्य गायत्र्या गोमूत्रमालिप्य स्नात्वाचमेत्॥ हेमाद्रौ रक्षाबंधप्रसंगे
पुष्टिरं प्राप्तिकृत्स्नोक्तिः संप्राप्ते श्रावणस्याथ पौर्णमास्यां दिनोदये स्नानं कुर्यान्मतिमान् श्रुति
स्मृतिविधानतः ततो देवान् पितॄंश्चैव तर्पयेत्परमांभसा उपाकर्मणि चैवोक्तमृषीणां चै
व तर्पणं कुर्वीत ब्राह्मणैः सार्द्धं वेदानुद्दिश्य शक्तितः इति अत्र नित्यं स्नानं देवर्षिपितृतर्पणं
चोपाकर्मांगित्वेन विधीयते यज्ञोपवीतशौचे चेत्याश्वलायनोक्तेर्नो नूतनं वदेदित्युक्तेर्यज्ञो
पवीतान्यवमनान्न नवदनाभाववदिति उक्तबौधायनोक्तेरथातो मृत्तिकास्नानं व्याख्यास्या
मो मृद्गोमयकुशतिलपुष्पाण्यादायेति कात्यायनोक्तेश्चाकृग्द्विवाचरेत्स्नानं मध्याह्नात्प्रा
ग्विशेषतः प्रयतो मृदमादाय दूर्वामार्द्रं च गोमयमिति योगियाज्ञवल्क्योक्तमृत्तिका
स्नानविधिर्निषिद्धदिनेपि भवत्येव तन्निषेधस्तु नित्यपरो न क्रत्वंगबाधक इत्यन्यत्र

© Dharmartha Trust J&K. Digitized by eGangotri

विस्तरः अप्रसंगात् स्नानविधिरापस्तंबानां निर्णीयते। तत्र तेषां धर्मसूत्रे द्वितीयप्र
४१ श्ने वानप्रस्थप्रकरणे सप्तदशखंडे सूत्रं। शनैरप्सु वेयानाभिघ्नन्नभिमुख आदित्यमु
दकमुपस्पृशेत् सर्वत्रोदकस्पर्शनविधिरिति। क्षारलवणमधुमांसानि वर्जयेत्तस्य द्व
द्वपात्राण्येकउपदिशंति। अत्र सर्ववर्णाश्रमसाधारणमेतत्तदग्रिमसूत्रे प्राकरणि
41 कत्व वहितवानप्रस्थमात्रपरामर्शकस्य तस्येति पदस्य निर्देशादिति हरदत्तः। अस्या
यमाशयः। सर्वत्र प्रवहदप्रवहज्जलादावयं स्नानस्य विधिर्ज्ञातव्यः। तत्रोदके शनैर
प्सु वेयान्नधावेदं। ततः शर्करादिनाऽपीडार्थमिदं। तथोदकं हस्तादिनाऽनभिघ्नन्नताड
यन्। तत्र विशेषयति अभिमुखमादित्यमिति सूर्याभिमुखमित्यर्थः। कथं तर्हि न घास्र
वत्सु च स्नायात् प्रतिस्रोतः स्थितो द्विजः। तडागादिषु तोयेषु प्रत्यर्कं स्नानमाचरेदि ४१

© Dharmartha Trust J&K. Digitized by eGangotri

तिनृसिंहपुराणस्य स्रोतसः संमुखो मज्जेद्यत्रापः प्रवहंति वै। स्थावरेषु गृहे चैव सू-
र्यसंमुखमाप्लवेदिति वृद्धयाज्ञवल्क्योक्तेश्च दर्शनाज्जलमात्रसाधारण्येनाव्याख्या-
नेसंगच्छतामिति चेत् न प्रवाहाभिमुखो मज्जेदुद्धृत्य चोऽथर्ववेदसामगाः। यजुषां चैव सर्वे-
षां सूर्यसंमुखमज्जनमिति स्मृतेर्नद्यादावित्यपक्रम्य सूर्याभिमुखो मज्जेदिति कात्ती-
यसूत्राच्च कातीयापस्तंबादियजुर्वेदातिरिक्तपरतया स्वतंत्रविधित्वेनोपपत्तेरिति
दिक्। गणेश्वरेणापि नित्यस्नानविधेर्ब्रह्मचारिणो विशेषमाह। नाप्सु श्लाघमानः स्नायाद्य-
दि स्नायाद्दंडवत्प्लवेदिति। स्नानीयैर्द्रव्यैर्मलापकर्षणं श्लाघा क्रीडा वा तां न कुर्व-
न्स्नायादित्यर्थः यदा स्नानं कुर्यात्तदा दंडवत्प्लवनरूपमेव तत्कुर्यादिति। त्र्यत्रीगानि
नप्रक्षालयीनेस्फपादिमसूत्रे। नद्दिनाशिरः सुखार्थाभ्यंगस्नाननिषेधार्थं। कश्चि

त्वंगानीत्यासमावर्त्तेनान्नित्यस्नाननिषेधः प्रक्षालयीत तत्वं शुचिलिङ्गानीति नैमित्ति
४२ कस्नानविधिर्नापिवति तत्रैव श्लाघाप्रतिषेध इति त्रिसूत्रीं व्याचष्टे। एवं नित्यं स्नातुः
स्नातकस्य विशेषमाह। सशिर एवमज्जनमप्सु वर्जयेदिति। स्नातकस्य शिरसा सह
वमज्जनरूपं स्नानं न कुर्याच्छिरःस्नानं न कुर्यादिति यावदेकत्र विधिनिषेधे इति न्या
42 येनार्थात्कंठस्नानं नित्यमत्रेत्यवगम्यते। वष्टिभागुरिरित्याकारलोपः यत्त्वेतदल्पो
दकविषयं नाल्पोंभसि शिरोमज्जेदिति स्मृतेः यच्चैतन्नमुख्यमशक्तावशिरस्के च
स्नानं मंत्रविधानत इत्यशक्तविषयं गौणमिति निबंधृणे व्यवस्थाकल्पनं तदुभ
यमप्युत्तरसूत्रानालोचननिबंधनमिति न मनोहरं। तथाह्यस्यैव तन्यमानसौमि
कवारुणप्रघासिकावभृथस्य विशेषसूत्रे। सशिरस्कावनुपमक्षंतौ स्नातः पत्नी ४२

© Dharmartha Trust J&K. Digitized by eGangotri

यजमानश्चेति। अनुपमक्षंतावनवमज्जं तौ सशिरस्कौ स्नातः सलिलापुत्क्षेपणे
नेत्यर्थ इति रुद्रदत्तः। पत्न्यनुपमक्षंतावंगान्यशोधयं तावितिं। तन्न। स्नानात्प्रागंग
शोधनस्याग्रसक्तत्वात्तत्काले च नवनीतादंगमलविमोकान्यथानुपपत्तेः प्रागंग
शोधने स्वपृष्ठधावनस्य स्वयं कर्तुमशक्यत्वादन्योन्यस्य पृष्ठप्रधावनमिति तत्रेदं
पत्न्यन्योन्यकर्तृकत्वनियमेन न निषेधानुपपत्तेः। शुक्रा दीक्षायै तपसो विमेन्वनीरि
त्यादिमंत्रवर्णाच्च। प्रागुक्तमेव ज्याय इति दिक्। एवं चाशिरस्कं तत्प्राप्तमतः सशि
रस्कत्वस्यैव विधौ लाघवात्स्वतंत्रविशिष्टस्नानविधौ च गौरवात् शास्त्रांतरीयमु
ख्यशिरःस्नानस्योपस्थापकाभावाद्यथाकथंचित्तद्भावेत्यर्थे नापि तत्तत्स्नानज्ञा
त्रेरेतद्विधिवैयर्थ्यापत्तेरयमर्थः पर्यवस्यति। निष्कर्षस्तु नित्यं स्नास्यन्नापस्तु

© Dharmartha Trust J&K. Digitized by eGangotri

वः कंठस्नानं कुर्यादवभृथे च सशिरस्कं सलिलोत्क्षेपादिना नैमित्तिकांतरे च मज्जनमपि
४२ सशिरः स्नानं ब्रह्मचारी तु दंडवत्सशिरस्कं प्लुत्वादिश्च मज्जनं सशिरः स्नायादिति सर्वस
मंजसं॥ अभिषिक्तश्च जुहुयात् यदा जुहुयात्तदाऽभिषिक्तो जुहुयात्। अनुवादोऽयं स्नान
विशेषणं विधानं तु शनैरभ्युपेयान्नाभिस्तन्नाभिमुखमादित्यमुदकमुपस्पृशेदित्यस्त्राणं
43 व्याख्या हरदत्तीयालिख्यते नाभिघ्नं हस्तेनोदकमताडयन् उदकमुपस्पृशेत्स्नाया
त् सर्वत्रोदकस्पर्शेन विधिः सर्ववर्णाश्रमसाधारणमेतत्। तथाचोक्तं रत्नतस्यैतिग्रहणा
दिति। अथ प्रसंगात्तीर्थविधिरुच्यते। तत्रादावाश्वलायनानामुच्यते॥ यानानि तु परि
त्यज्य भाव्यं पादचारैर्नरैः॥ लुंठित्वा लोठनीं चैव कृत्वा कार्पटिकाकृतिं॥ प्रथमं चालभे
त्तीर्थं प्रणवेन जलं शुचिः॥ मंत्रश्च॥ ॐ नमो देवदेवाय शितिकंठाय वेधसे॥ रुद्राय चा ४२

© Dharmartha Trust J&K. Digitized by eGangotri

पहस्ताय दंडिने चक्रिणे नमः ॥ सरस्वती च गायत्री वेदमाता गरीयसी ॥ सन्निधात्री भ
वत्वत्र तीर्थे पापप्रणाशिनी ॥ आभ्यां तीर्थं नमस्कृत्य आलभेत् । ततस्तीर्थजलं गृहीत्वा ती
र्थो च चतुर्हस्तां भूमिं परित्यज्य पाणिपादमुखं प्रक्षाल्य स्वयं वा क्षतपुष्पफलं गृहीत्वा पठेत्
अब्जलक मंडलुसंभूते गंगे त्रिपथगामिनि । त्रैलोक्यवंदिते देवि गृहाणार्घ्यं नमोस्तु ते । अने
न मंत्रेणांजलिना तीर्थे प्रक्षिपेत् । अमंत्रं त्रिःस्नात्वा द्विराचम्य संकल्पं कुर्यात् । श्रीमदनंत
वीर्यस्यादिनारायणस्याचिंत्यापरिमितशक्त्या ध्रियमाणस्य महाजलौघमध्ये परिभ्रम
माणानामनेककोटिब्रह्मांडानामेकतमे व्यक्ते महदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्याव
रणैरावृते ब्रह्मांडखंडयोर्मध्ये आधारशक्तिकूर्मानंताष्टदिग्गजोपरिप्रतिष्ठिते सप्तपा
तालस्योपरिभागे सत्यादिषट्कस्याधोभागे महाकालशेषस्य सहस्रफणामंडिते दिग्दंति

© Dharmartha Trust J&K. Digitized by eGangotri

दंतशुंडादंडोद्दंडितेलोकालोकाचलवलयितेलवणेक्षुसुरासर्पिर्दधिक्षीरशुद्धोदार्णव
४४ परिवृतेजंबूप्लक्षशाल्मलिकुशक्रौंचशाकपुष्करसप्तद्वीपद्वीपितेकांस्यताम्रगभस्ति
नागसौम्यगंधर्वचारणभारतेतिनवखंडखंडितेभरतवर्षेभरतखंडेअयोध्यामथुरा
44 मायाकाशीकांच्यवंतिद्वारवतीकुरुक्षेत्रपुष्करादिनानातीर्थयुक्तकर्मभूमौमध्यरेखा
याःपूर्वदिग्भागेभागीरथ्याःपश्चिमेतीरेसकलजगत्स्रष्टुःपरार्द्धद्वयजीविनोब्रह्मणोद्वि
तीयपरार्द्धेद्वितीयपरार्द्धस्यप्रथमवर्षेप्रथममासेप्रथमपक्षेप्रथमदिवसेअह्निद्वि
तीययामेतृतीयमुहूर्त्तेप्रथमघटिकायांसप्तमेवैवस्वतमन्वंतरेअष्टाविंशतितमेकलि
युगेप्रथमचरणेबौद्धावतारेविक्रमशाकेअमुकसंवत्सरेअयनेऋतौमासेपक्षेतिथौ
वारेनक्षत्रेयथावर्त्तमानेकरणेअमुकस्थितेचंद्रेअमुकस्थितेरवौअमुकराशिस्थिते ४४

© Dharmartha Trust J&K. Digitized by eGangotri

गुरौ एवंगुणविशेषणविशिष्टायां पुण्यतिथौ मम इह जन्मनि जन्मांतरे वा संचितानां पात
कानां ब्रह्महननमद्यपानसुवर्णस्तेयगुरुतल्पगमनतत्संसर्गरूपमहापातकानां बुद्धिपू
र्वकाणामबुद्धिपूर्वकाणां मनोवाक्कायकृतानां बहुकालाभ्यस्तानामुपपातकानां च स्पृष्टा
स्पृष्टसंकरीकरणपात्रीकरणजातिभ्रंशकरणरसविक्रयकन्याविक्रयगोविक्रयखरो
ष्ट्रमहिषीविक्रयदासीविक्रयअजादिपशुविक्रयव्रात्यब्राह्मणत्वदुर्ब्राह्मणत्वनिरर्थकवृ
क्षछेदनस्त्रणनपाकरणब्रह्मस्वापाहरणदेवराजस्वापाहरणब्राह्मणनिंदागुरुनिंदा
वेदनिंदाशास्त्रनिंदाअभक्ष्यभक्षणभोज्यभोजनअचोष्यचोषणअपेयपानअस्पर्शस्पर्श
नअश्राव्यश्रवणअघ्रेयाघ्राणअनहिंस्यहिंसनअवंद्यवंदनअचिंत्यचिंतनअयाज्ययाज
नअपूज्यपूजनपूज्यव्यतिक्रमणमातापितृतिरस्कारस्त्रीपुरुषप्रीतिभेदनमैत्रीभेदन

© Dharmartha Trust J&K. Digitized by eGangotri

परस्त्रीगमनक्षत्रियपरस्त्रीगमनवैश्यपरस्त्रीगमनशूद्रागमनब्राह्मणीगमनविधवागमन
४५ दासीगमनवैश्यागमनचांडालादिहीनजातिस्त्रीगमनपशुयोनिगमनअयोनिजपात
नकूटसाक्षित्ववादपैशून्यवादमिथ्याभिशापवादपरशापवादपरद्रोहहानिकरणम्ले
45 च्छभाषाभाषणम्लेच्छसहासनब्रह्मद्वेषकरणस्वामिभेदनमित्रवंचनभार्यावंचनगर्भपातनर
जस्वलागमननिषिद्धकालमैथुनसकामपरस्त्रीस्तनस्पर्शनविकारभाषणपर्युषितांबूलच
र्वणहीनसेवनअनृतभाषणपरान्नभोजनअसाक्षिभोजनगणान्नभोजनभ्रूणहिंसापशु
हिंसाबालहिंसास्त्रीहिंसास्नानत्यागसंध्यात्यागवैश्वदेवत्यागदेवपूजात्यागअतिथित्या
गऔपासनत्यागआत्मार्थपाकएकाकीमिष्टान्नभोजनबालकैःसहभोजनक्रमुकपत्रभोज
नपंक्तिभेदकरणादीनांपातकानांलघुस्थूलसूक्ष्माद्राणांक्षालनपूर्वकंराहूपरागनिमित्तकु ४५

© Dharmartha Trust J&K. Digitized by eGangotri

कृक्षेत्राधिकरणश्रोत्रियसंप्रदानकसहस्रसुवर्णभारदानजन्यफलदेशगुणविंध्यसंग
गंगास्नानफलशतगुणकाश्युत्तरवहगंगास्नानफलशतगुणगंगायमुनासंगमस्नानफल
सहस्रगुणफलप्राप्तिपूर्वकसमस्तपितॄणामक्षय्यविष्ण्वादिलोकप्राप्तिकामः पश्चिमवा
हिनीस्नानमहंकरिष्येत्रिस्नात्वाद्विराचम्यसंध्यादिकविधायमुंडनंकारयेत्॥ यावच्छेदनी
यनखरोमसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गमहितत्वकामोगंगायांवपनमहंकरिष्ये॥
आत्मनःशुद्धिकामोवापितॄणांतृप्तिहेतवे। वपनंकारयिष्यामितीरेहंतवजाह्नवि॥ यानि
कानिचपापानिब्रह्महत्यासमानिच॥ केशानाश्रित्यतिष्ठंतितस्मात्केशान्वपाम्यहं॥ महापा
पोपपापाद्याःकेशलोमनखादिजाः॥ क्षुरादिच्छिन्नसर्वांगास्तेमेदोषाःपतंत्वधः॥ दक्षिणक
र्णमूलमारभ्यशिरोवपनमुदक्संस्थ्य॥ नखनिकृंतनमपिउदक्संस्थमेव। केशानखादि

© Dharmartha Trust J&K. Digitized by eGangotri

चभुवि निक्षिपेत्। पुनः स्नात्वा भस्मादि स्नानं कुर्यात्। मानस्तोके इति अग्निरिति भस्म जल
४६ मिति भस्म स्थलमिति भस्म व्योमेत्ति भस्म सर्वं हवा इदं भस्मेति भस्म गृहीत्वा ईशानाय
नय इति शिरसि तत्पुरुषाय नम इति मुखे अघोराय नम इति हृदये वामदेवाय नम इति
46 गुह्ये सद्योजाताय नम इति पादयोः प्रणवेन सर्वांगे ततो गोमयेन स्नानं गंधद्वारामिति
अग्रमग्रे चरंतीनामोषधीनां वने वने। तासामृषभपत्नीनां पवित्रं कायशोधनं। तन्मे
रोगांश्च शोकांश्च नुद गोमय सर्वदा इति सर्वांगे इति गोमयस्नानं। अथ मृत्तिका स्नानं।
वलित्या पर्वतानां मितिभूमिं प्रार्थ्य। मा वो रिषत् खनिता यस्मै चाहं खनामि वः।। द्विपच्च
तुष्पदस्माकं सर्वमस्त्वनातुरं इति खनित्वा। स्योना पृथिवी भवेति मृदमादाय। आयने
ते परायणे इति दूर्वामादाय गायत्र्याभ्युक्ष्य भूमौ मृदं निधाय याचम्य देशकालौ स्मृत्वा मृ ४६

© Dharmartha Trust J&K. Digitized by eGangotri

त्तिकास्नानमहं करिष्य इति संकल्प्य मृदं कुशोदकेनाभ्युक्षिपेत्। ततो दिक्षु मृदं निक्षि
पेत्। त्रातारमिंद्रमिति पूर्वस्यां। यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन। इदं नम ऋषिभ्यः
पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्य इति दक्षिणस्यां। तत्वायामीति पश्चिमतः। वयं सोमेत्युत्तर
तः। तत्सूर्यमित्युपरिष्टात्। अधः पश्यस्वेत्यधः। ततोंगेषु। सहस्रशीर्षेति शिरसि। अक्षी
भ्यांते नासिकाभ्यां कर्णाभ्यां चुबुकादधि। यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि
ते। ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। यक्ष्मं दोषण्यमंसाभ्यां बाहुभ्यां
विवृहामि ते। आंत्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि। यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो
विवृहामि ते। नाभा नाभिं न आददे चक्षुश्चित्सूर्ये सचा। कवेरपत्यमा दुहे इति नाभौ। त्व
मिंद्र सजोषसमर्कं विभर्षि बाह्वोः। वज्रं शिशान ओजसा इति बाह्वोः। सोमानमिति क

© Dharmartha Trust J&K. Digitized by eGangotri

क्षयोः । पः कुक्षिरिति कुक्ष्योः । बद्धीनां पिनेति पृष्ठे । ऊरुभ्यां तेअष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदा
४७ भ्यां । यक्ष्मं श्रोणिभ्यां भासदा द्भंससो विवृहामि ते । मेहनाद्वनंकरणा ल्लोमभ्यस्ते नखेभ्यः
। यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते । एतावानस्येति पादयोः । यस्य विश्वानि हस्त
योः पंचक्षितीनां वसु । स्याशयः स्वयोअस्मद्रुग्दिव्येवाशनिर्जहि इति हस्तयोः । अंगादंगा
ल्लोम्नो लोम्नो जातं पर्वणि पर्वणि । यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते इत्यनेन पु
47 रुषसूक्तेन च सर्वांगोद्वर्त्तनं । अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरा शिरसा धारयि
ष्यामि रक्षस्व मां पदे पदे इति सतिलां सदूर्वां मृदं शिरसि निधाय मृत्तिकास्थाने प्रक्षाल्य
तीर्थं प्रार्थयेत् । हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः । यन्मे भुक्तमसाधूनां पापे
भ्यश्च प्रतिग्रहः । यन्मया मनसा वाचा कर्मणा वा दुष्कृतं कृतं । तन्न इंद्रो वरुणो बृहस्पतिः ४७

© Dharmartha Trust J&K. Digitized by eGangotri

सवित्ताचपुनंतुपुनःपुनः।इमंमेगंगे०इदंत्तेन्याभिरसमानमद्भिर्योः काश्चसिंधुंप्रव
हंतिनघः।सर्पोजीर्णामिवत्वचंजहातिपापंसशिरस्कोभ्युपेत्यगंगागंगेति।सुमित्र्यानआ
पः।समुद्रज्येष्ठाः॥४॥एतोन्विंद्रं॥७॥तरत्समंदी॥४॥पावमानीः।आपोहिष्ठाः॥७॥इत्या
दिभिर्मार्जनंकृत्वाइमंमेगंगेइत्युदकमालोड्याघमर्षणंकुर्यात्।ततःप्रवाहाभिमुखंत्रिः
स्नायात्।ततःकृष्णाद्यादिप्रत्याम्नायभूतहिरण्यंसंकल्प्ययात्रापरिपूरणार्थंगोदानंय
थाशक्तिदशदानानिचकुर्यात्।ततःप्रार्थना।महापापोपपापादिनानायोनिषुयत्कृतं।ती
र्थेषुयत्कृतंपापंगुर्वंगनादियत्कृतं।बालभावादियत्पापंपरद्रोहादिकंमया।देहाभिमा
नजंपापंसर्वदायन्मयाकृतं।भूतंभव्यंभविष्यंचयत्पापंममजान्हविमुंचमाम्।यत्पा
पंजानताऽजानताकृतंमनसाकर्मणावाचायद्यत्पापंमयाकृतं।तस्मादशेषपापौघात्

© Dharmartha Trust J&K. Digitized by eGangotri

हि जान्हवि सर्वदा॥ गतं पापं गतं दुःखं गतं मे व्याधि बंधनं। निष्पापोऽस्मि पधुना देवि प्रसा
५८ दात्तव नान्यथा॥ स्त्रीणां मुण्डने विशेषः॥ मंत्रोऽयं नमस्कृत्य कुंकुमादि चर्चितां वेणीं स्वर्ण
दि निर्मित वेणी गर्भां हस्ते धृत्वा। स्त्रीणां समर्तृकाणां तु सर्व पापापनुत्तये। प्रयागे वपनं
कार्यं नान्यत्र क्षेत्रके क्वचन। वेण्यां वेणिप्रदानेन सर्व पापं व्यपोहतु। जन्मांतरे च पि स
दा सौभाग्यं मम वर्द्धतां इति मंत्रः॥ अथ पनेत्रिरीयाणां तीर्थविधिः पानानि तु परित्यज्य भा
वपापादत्व रैनैरेः। लुठित्वा लोठिनी चैव वकृत्वा कार्पटिकाकृतिं। प्रथमं चालयेत्तीर्थं त्रण
वेनजलेष्मुचि। ॐ नमो देवदेवाय शितिकंठाय दंडिने। रुद्राय चापहस्ताय चक्रिणे वेध
से नमः॥ सरस्वती च सावित्री वेदमाता गरीयसी। संनिधात्री भवत्वत्र तीर्थपापप्रण
शिनी॥ आभ्यां तीर्थं नमस्कृत्य त्रिराचामेत्। ततस्तीर्थजलं गृहीत्वा चतुर्हस्तमात्रां भू ५८

मिं तीर्थात्संत्यज्य पाणिपादमुखं प्रक्षालयेत्। ततो यवाक्षतकुशदूर्वाहिरण्यफलपु
ष्पजलादिकं हस्तेन गृहीत्वा ॐ विष्णुपादप्रसूतासि वैष्णवी विष्णुदेवता। त्राहि नस्त्वेनस
स्तस्मादाजन्ममरणान्तिकात्॥ तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत्। दिवि
भूम्यांतरिक्षे तत्त्वपि नत्संति जान्हवि। नंदिनीत्येव ते नाम देवेषु नलिनीति च। दक्षापृ
थ्वि विगाहा च विश्वकाया शिवामृता। विद्याधरी सुप्रसन्ना तथा लोकप्रदायिनी। क्षेमदा
जान्हवी चैव शान्ता मोक्षप्रदायिनी। नमो गंगे महादेवि महादेवस्य वल्लभे। वहते त्वां म
हादेवो भागीरथि नमोस्तु ते। आदावादिपितामहस्य नियमव्यापारपात्रे जलं पश्चात्प
न्नगशायिनो भगवतः पादोदकं पावनं। भूयः शंभुजटाविभूषणमणिर्जन्होर्महर्षेरि
यं कन्या कल्मषनाशिनी भगवती भागीरथी पातु मां॥ इति संप्रार्थ्य ब्रह्मकमंडलुसंभूते

© Dharmartha Trust J&K. Digitized by eGangotri

गंगे त्रिपथगामिनि त्रैलोक्यवंदिते देवि गृहाणार्घ्यं नमोस्तु ते। नमस्ते पद्मनाभाय नम
स्ते जलशायिने। नमस्तेस्तु हृषीकेश गृहाणार्घ्यं नमोस्तु ते इत्यर्घ्याजलिं तीर्थे निक्षिप्य द
मममुकतीर्थाय नमो मेस्तु त्वत्का तीर्थसाक्षां गंगप्रणम्य प्रणवेन तीर्थं संस्पृश्यांगवस्त्राण्यप
कीकृत्य प्रायश्चित्ताधिकारार्थं सचैलं स्नानमहं करिष्ये इति संकल्प्य मंत्रं सचैलं त्रिः स्ना
त्वा द्विराचम्य सागरस्वरनिर्घोष दंडहस्तासुरांतक। जगत्स्रष्टर्जगन्मर्दिन् नमामि त्वां सुरे
श्वर। तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम। भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि
49
ति क्षेत्रपालमनुज्ञाप्य ब्राह्मणान्नमस्कृत्य प्रदक्षिणीकृत्य च तेषामग्रे गोवचमल्प निधा
य प्रार्थयेत् सर्वधर्मविवेक्तारो गोप्तारः सकला द्विजाः मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्त
माः। मया कृतं महाघोरं ज्ञातमज्ञातकिल्विषम्। प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छत।

© Dharmartha Trust J&K. Digitized by eGangotri

द्या से

पूज्यैःकृतपवित्रोहंभवेयंद्विजसत्तमैः॥ एवंप्रार्थ्यगोवृषद्रव्यंतेभ्योनिवेद्यनिबंधप्रज्ञा
त्वेनकिंचित्द्रव्यंनिधायकाशीयात्रांगभूततीर्थविधिकर्तृत्तदधिकारसिध्यर्थंममामु
कशर्मणोऽमुकगोत्रस्यजन्मप्रभृत्यद्ययावत्ज्ञानाज्ञानकामाकामसकृदसकृत्कृत
कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकाति
पातकोपपातकलघुपातकसकलीकरणमलिनीकरणपात्रीकरणजातिभ्रंशकरप्रकी
र्णकपातकानांमध्येसंभावितानांनिरासेनशरीरशुद्धिद्वाराश्रीपापहमहाविष्णुप्रीत्य
र्थंषडब्दादिअन्यतमंप्रायश्चित्तंप्राच्योदीच्यांगसहितंयथाशक्तिरजतादिप्रत्याम्नायेना
हमाचरिष्येऽत्यशक्तोगंगास्नानमहंकरिष्येइतिसंकल्प्यतदनुष्ठायत्रिःस्नात्वाद्विराच
म्यसंध्यादिकंविधायगोभूतिलवासोहिरण्यादिदानानिसंकल्प्यपूर्वेदत्वोदङ्मुखः

© Dharmartha Trust J&K. Digitized by eGangotri

प्राङ्मुखोवोपविश्ययावच्छेदनीयनखलोमसंख्यातावद्वर्षसहस्रावच्छिन्नस्वर्गलो
५० कमहितत्वकामोगंगायांवपनमहंकरिष्यइतिसंकल्प्यात्मनःशुद्धिकामोवापितॄणां
तृप्तिहेतवे। वपनंकारयिष्यामितीरेहंतवजान्हवि। यानिकानिचपापानिब्रह्महत्यास
मानिच। केशानाश्रित्यतिष्ठंतितस्मात्केशान्वपाम्यहंइतिपठित्वामहापापोपपापोघाः
केशलोमनखादिजाः। क्षुरादिछिन्नसर्वांगास्तेमेदोषाःपतंत्वधःसुक्षुरोमवेत्याज्ञांगृ
50 हीत्वाशिखाकक्षोपस्थवर्जंकेशश्मश्रुनखरोमाणिवापयेत्। दक्षिणकर्णमूलमारभ्य
वामकर्णमूलपर्यंतंशिरोवपनमुदक्संस्थंप्रथमंततःश्मश्रुलोमनखानांक्रमेणो
दक्संस्थंवपनं। गत्वास्नानंप्रकुर्वीतवपनंतदनंतरंवपेत्केशांश्चश्मश्रूणिनखानि
चनिकृंतयेदितिब्रह्मपुराणवचनादितिभावः। अन्येतुएतद्वचनस्यवपनमात्रविधा ५०

पकल्वाक्रमस्यापिविधानेगौरवाद्वाक्यभेदप्रसंगाद्देवावैयत्यज्ञेकुर्वन्ततदसुरा
अकुर्वतेत्यादिनाकेशप्रथमवपननिंदापूर्वकंश्मश्र्वादिवपनप्रशंसाया। आपस्तंबा
नांश्मश्रुतौप्रतीतेश्मश्रुकूर्चयोरादौवपनमित्याहुः। तन्मतमाह। केषांचिन्मते आदौश्मश्रु
वापनंततःकेशानांतदुःभयंदक्षिणभागमारभ्यवामभागपर्यंतंततउदकूसंस्थलो
मनखवापनमित्ति। केशनखादिचतीरेभुविनिक्षिपेत्। ततःक्षौरनिमित्तंस्नानमहंक
रिष्यइतिसंकल्प्यस्नात्वात्रिः आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच। ब्रह्मप्रज्ञांचमे
धांचत्वंनोधेहिवनस्पतेइतिसंप्रार्थ्यमुखदुर्गंधिनाशायदंतानांचविशुद्धये। क्षालना
यचगात्राणांकुर्वेहंदंतधावनमित्यनेनदंतकाष्ठेनदंतान्संशोध्यद्वादशगंडूषान्कृ
त्वापुनःशुद्धिस्नानंकरिष्यइतिसंकल्प्यस्नात्वाभस्मादिस्नानंकुर्यात्। आहिताग्निस्तु

© Dharmartha Trust J&K. Digitized by eGangotri

भिः पर्वोन्यकाले पित्तीर्थे मुंडनं कार्यं जीवत्पितृकेणापि अनुपनीतेनापि सभर्तृकायास्तु
५१ सर्वान् केशान्समुद्धृत्यांगुलत्रयमितप्रांतकेशानां क्षुरेण छेदनमेव वपनं सर्वमुंडनमि
ति दाक्षिणात्याचारः विधवायास्तु सर्वकेशवपनमेव स्त्रीणां सभर्तृकाणां च सर्वपापा
51 पनुत्तये। प्रयागे वपनं कार्यं नान्यक्षेत्रे कदाचनेति। तासां संकल्पे विशेषः पाणिग्रहण
मारभ्य स्वधर्मपरिपालनेऽधर्माभिरतिः पुंसा नानाजातिषु या भवेत्। रजोदोषादिप
त्यायं कृमिकीटादिहिंसनं। अथाभ्यसनमभ्यस्तं सकृद्धि स्त्रियश्चानुष्ठितं। ज्ञानतोऽज्ञान
तो वापि कायिकं वाचिकं मम। मानसं विविधं पापं प्रायश्चित्तैरनाशितं। मया सर्वस्य ना
शार्थं यथाशक्ति विधीयते इति। किंच तासां नोन्मुक्तकेशवपनं किंतु वेणीं कृत्वा कुंकुमा
दिमंगलद्रव्यालंकृतां स्वर्णादियुक्तां च विधाय भर्त्रारं नमस्कृत्य तदनुज्ञया यानिका ५१

© Dharmartha Trust J&K. Digitized by eGangotri

निचेतिपठित्वासुमंगलीरियंवधूरितिमंत्रेणभर्त्रौस्वहस्तेनक्षुरंलापयित्वानांवेणी
मंजलौनिधाययथाशक्तितत्रसुवर्णमुक्ताप्रवालादिनिधायवंशपात्रमिदंदानंसौभा
ग्याष्टसमन्वितं।वंशपात्रमिदंश्रेष्ठमनःशांतिप्रयच्छमे।वेण्यैवेणीप्रदानेनसर्वपापं
प्रणश्यतु।जन्मांतरेष्वपिसदासौभग्यंममवर्धतामितिपठित्वावेणींवेण्यांप्रक्षिपेत्त
तःपाणिग्रहणमारभ्येत्यादिपूर्वमंत्रान्पठित्वास्नायात्।ततोभस्मस्नानंकरिष्येइ
तिसंकल्प्यमानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः।वीरान्मानो
रुद्रभामितोवधीर्हविष्मंतोनमसाविधेमते।अग्निरितिभस्मजलमितिभस्मस्थलमि
तिभस्मव्योमेतिभस्मेतिद्वाभ्यांभस्मादाय।ईशानःसर्वविद्यानामीश्वरःसर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोंईशानायनमइतिशिर

© Dharmartha Trust J&K. Digitized by eGangotri

सि। तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् तत्पुरुषाय नमः इ
५२ ति मुखे। अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽस्तु रुद्र
रूपेभ्यः अघोराय नमः इति हृदये। वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्रा
52 य नमः कालाय नमः कविकरणाय नमो वलविकरणाय नमो वलाय नमो वलप्रम
थनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः वामदेवाय नमः इति गुह्ये। सद्यो
जातं प्रपद्यामि सद्योजाताय वै नमो नमः भवे भवे नातिभवे भवस्व मां। भवोद्भवाय न
मः सद्योजाताय नमः इति पादयोः। मा नस्तोके० प्रणवेन च सर्वांगे। सर्वेषामेव देवा
नां पूज्यो रुद्रोऽत्र देवता। तस्मात्पवित्रं भस्मैतत्तेन स्नानमघापहं इति पठित्वा स्ना
त्वा आचम्य गोमयस्नानं करिष्ये इति संकल्प्य गोमयं प्रणवेनादाय गंधद्वारां दुरा ५२

© Dharmartha Trust J&K. Digitized by eGangotri

धर्षांनित्यपुष्टांकरीषिणीं। ईश्वरीं सर्वभूतानांतामिहोपह्वयेश्रियं। अश्वमश्वंचरं
तीनामोषधीनांवनेवने। तासामृषभपत्नीनांपवित्रंकायशोधनं। तन्मेरोगांश्चशोकां
श्चनुदगोमयसर्वदेति शिरःप्रभृत्यंगानिसंलिप्यस्नात्वाचम्यमृत्तिकास्नानार्थंमृदा
हरणादिकरिष्येइतिसंकल्प्य। बलिस्त्वापर्वतानामितिभूमिंप्रार्थ्यमावोरिषत्खनि
तेतिखनित्वा। स्योनापृथिविभवानृक्षरानिवेशनी। यच्छानःशर्मसप्रथाइतिमृदमा
दाय। यनेनेपरायणेदूर्वारोहंतुपुष्पिणीः। ह्रदाश्चपुंडरीकाणिसमुद्रस्यगृहाइमेइ
तिदूर्वामादायगायत्र्याअभ्युक्ष्यमृमोमृदंदूर्वांचनिधायाचम्यदेशकालौसंकीर्त्यमृ
त्तिकास्नानमहंकरिष्येइतिसंकल्प्यमृदंकुशोदकेनाभ्युक्ष्यदिक्षुमृदंक्षिपेत्। त्रा
तारमिंद्रमवितारमिंद्रं हवेहवेसुहवंशूरमिंद्रं ह्ववेनुशक्रंपुरुहूतमिंद्रं स्वस्ति

© Dharmartha Trust J&K. Digitized by eGangotri

नोमघवाधात्विंद्रइतिपूर्वे। यमायसोमꣳसुनुतेतिदक्षिणेतत्वायामिब्रह्मणावंदमा
५३ नस्तदाशास्तेयजमानोहविर्भिः। अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषी
रितिपश्चिमे। वयꣳसोमव्रतेतवमनस्तनूषुविभ्रतःप्रजावंतोअशीमहिइत्युत्तरे। त
53 त्सूर्यंरोदसीउभेदोषावस्तोरुपब्रुवे। भोजेष्वस्माँअभ्युच्चरासदाइत्युपरि। अधःपश्य
स्वमोपरिसंतरांपादकौहर। मातेकशप्लुकौदशन्। स्त्रीहिब्रह्माबभूविथेत्यधः। तत्तो
गेषु। सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्। सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशां
गुलमितिशिरसि। अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुकादधि। यक्ष्मꣳशीर्षण्यंम
स्तिष्काज्जिह्वायाविवृहामितेइतिमुखे। ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्योनूक्यात्
यक्ष्मंदोषण्यमंसाभ्यांबाहुभ्यांविवृहामितेइतिग्रीवायां॥ आंत्रेभ्यस्तेगुदाभ्योवनिष्ठो

© Dharmartha Trust J&K. Digitized by eGangotri

हृदयादधियक्ष्मंमतस्नाभ्यांयक्ष्मणःपार्श्विभ्योविवृहामितेइतिहृदये।नाभानाभिंनआ
ददेचक्षुश्चित्सूर्येसचा।सोकुबेरपत्यमादुहेइतिनाभौ।त्वमिंद्रसजोषसमर्कंबिभर्षिबाह्वोः
वज्रंशिशानओजसा।इतिबाह्वोः।सोमानंस्वरणंकृणुहिब्रह्मणस्पते।कक्षीवंतंयऔ
शिजइतिकक्षयोः।यःकुक्षिःसोमपातमःसमुद्रइवपिन्वतेउर्वीरापोनकाकुदइति
कुक्ष्योः।बह्वीनांपिताबहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य।इषुधिःशंकाःपृत
प्र नाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतइतिपृष्ठे॥विष्णोरराटमसिविष्णोःपृष्ठमसिवि
ष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवमसिवैष्णवमसिविष्णवेत्वेतिबा।ब्रह्मज
ज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः।सबुध्न्याउपमाअस्यविष्ठाःसतश्च
योनिमसतश्चविवइतिस्तनयोः।शरीरंयज्ञशमलंकुसीदंतस्मिन्त्सीदतुयोस्मान्द्वे

© Dharmartha Trust J&K. Digitized by eGangotri

ष्ठीतिशरीरं।नाभिर्मेचित्तंविज्ञानंपायुर्मेपचितिर्मेसत्इतिनाभौ।आपांनमत्युस्त्पल
५४ प्रभर्मोधुनिः।शिमीवांछुरुमाऽंस्त्रजीषीसोमोविश्वान्यतसावनानिनार्वाणिदंप्रतिमाना
निदेभुरितिकटौ।वरुणस्यस्कंभनमसिवरुणस्यस्कंभसर्जनमसिप्रत्यस्तोवरुणस्य
54 पाशइत्तिमेढ्रे।आनंदनंदावांडौमेभगसौभाग्यंपसइत्यांडयोः।ऊरूबोरोजोरिष्ठाविश्वा
न्यंगानितनूस्तनुवांमेसहनमस्तेऽस्तुमामाहिंसीः।ऊरुभ्यांतेष्ठीवद्भ्यांपार्ष्णिभ्यांप्रप
दाभ्यांयक्ष्मंश्रोणिभ्यांभासदाद्भंससोविवृहामितेइत्सूर्वोः।मेहनाद्वलंकरणाल्लोमभ्यु
स्तेनखेभ्यःपक्ष्मंऽसर्वस्मादात्मनस्तमिदंविवृहामितेइतिजान्वोः।जंघाभ्यांपद्भ्यांधर्मो
स्मिविशिराजाप्रतिष्ठितइतिजंघयोः।एतावानस्यमहिमातोज्यायांश्चपुरुषः।पादोस्य
विश्वाभूतानित्रिपादस्यामृतंदिवीतिपादयोः।चरणंपवित्रंविततंपुराणंयेनपूतस्त ५४

© Dharmartha Trust J&K. Digitized by eGangotri

रत्नीतिवा। इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं। समूढमस्यपांᳪसुरेत्रीणिपदाविच
क्रमेविष्णुर्गोपाअदाभ्यः। विष्णोःकर्माणिधारयन्इति द्वाभ्यांपादतलयोः। सजोषाइं
द्रसगणोमरुद्भिःसोमंपिबवृत्रहन्शूरविद्वान्। जहिशत्रूंᳪरपमृधोनुदस्वाथाभयं
कृणुहिविश्वतोनइतिशेषंदूर्वासहितंलोष्ठंशिरसिनिधायसुमित्र्यानआपओषध
यःसंतुदुर्मित्रास्तस्मैभूयासुरितिप्रथमंयोस्मान्द्वेष्टीतिद्वितीयंपंचवपंद्विष्मइ
तितृतीयमित्युपर्यत्रयेदत्वायुस्यविश्वानिहस्तयोःपंचाक्षितानीवसुः। स्याशयस्व
यो। अस्मध्रुक्दिव्येवाशनिर्जहि। अंगादंगात्लोम्नोलोम्नोजातंपर्वणिपर्वणियक्ष्म
ंᳪसर्वस्मादात्मनस्तमिदंविवृहेमिति। सहस्रशीर्षेतिषोडशर्चस्यसूक्तस्यनाराय
णऋषिःपुरुषोदेवताअनुष्टुप्छंदः। अंत्यात्रिष्टुप्सर्वांगोद्वर्तनेविनियोगः। इत्य

© Dharmartha Trust J&K. Digitized by eGangotri

नेन सर्वांगो द्धर्त्तनं कृत्वा। अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरा शिरसा धारयिष्यामि रक्ष
५५ स्वमां पदे पदे। भूमिर्धेनुर्धरणी लोकधारिणी उद्धृतासि वराहेण कृष्णेन शतबाहुना मृत्तिके
देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता मृत्तिके प्रतिष्ठि
55 ते सर्वं तन्मे निर्णुद मृत्तिके। तया हतेन पापेन गच्छामि परमां गतिं इत्ति स तिल दूर्वां मृदं
शिरसि निधाय मृत्तिकास्थानं प्रक्षाल्य तीर्थं प्रार्थयेत। हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे
देहि याचितः यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः यन्मे मनसा वाचा कर्मणा वा दुष्कृ
तं कृतं तन्न इंद्रो वरुणो बृहस्पतिः सविता च पुनंतु पुनः पुनः नमोग्नयेऽप्सुमते नम इंद्राय
नमो वरुणाय नमो वारुण्यै नमोद्भ्यः यदपां क्रूरं यदमेध्यं यदशांतं तदपगच्छतात्। अत्या
शनादतीपानाद्यच्च उग्रात्प्रतिग्रहात् तन्नो वरुणो राजा पाणिना ह्यवमर्शतु। सोहमपापो ५५

विरजो निर्मुक्तो मुक्तकिल्बिषः नाकस्य पृष्ठमारुह्य गच्छेत् ब्रह्मसलोकतां। अव ते हेड
उदुत्तममिति द्वयोर्जगती शुनःशेपो वरुणस्त्रिष्टुप् वरुणप्रार्थने विनियोगः। अव ते हे
डो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्र
थो विष्वगग्ने उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय अथा वयमादित्य व्रते तव
वानागसो अदितये स्याम॥ प्रपद्ये वरुणं देवमंभसांपतिमर्जितं याचितं देहि मे सर्वं सर्वपा
पापनुत्तये तीर्थमावाहयिष्यामि सर्वाघविनिषूदनं। सांनिध्यमस्मिंस्तोये तु स्थीयतां म
दनुग्रहात्॥ इति वरुणं संप्रार्थ्य तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम भैरवाय नमस्तु
भ्यमनुज्ञां दातुमर्हसि सागरस्वननिर्घोषदंडहस्तासुरान्तक। जगत्स्रष्टर्जगन्मर्दिन्न
मामि त्वां सुरेश्वर। पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा। आगच्छंतु पवित्राणि स्ना

© Dharmartha Trust J&K. Digitized by eGangotri

नकालेसदाममा।शरीरेजर्जरीभूतेव्याधिग्रस्तेकलेवरे।औषधंजान्हवीतोयंवैद्योना
५६ रायणोहरिः।किरणाधूतपापाचपुण्यतोयासरस्वती।गंगाचयमुनाचैवपंचनद्यःपु
नंतुमे।।नंदिनीनलिनीसीतामालतीचमलापहा।विष्णुपादाब्जसंभूतागंगात्रिपथ
गामिनी।भागीरथीभोगवतीजान्हवीत्रिदशेश्वरी।द्वादशैतानिनामानियत्रयत्रजला
56 शये।स्नानोद्यतःपठेन्नित्यंतत्रतत्रवसाम्यहं।इतिपठित्वापोवगाह्याचम्ययाःप्रवतो
निवतगंगागंगेतिपठित्वासुमित्र्यानआपओषधयःसंतु।समुद्रज्येष्ठाः।एतोन्वोंतर
त्समंदी।आपोहिष्ठेतितिसृभिर्हिरण्यवर्णाइतिचतसृभिःपवमानःसुवर्जनइत्येते
नानुवाकेनचशिरसिमार्जयित्वाइमंमेगंगेयमुनेइत्यंगुष्ठेनत्रिरावर्त्तयित्वास्त्रंतेच
सत्यंचेत्यघमर्षणसूक्तमंतर्जलेजपित्वात्रिरपोवगाह्याचम्यआपोहिष्ठेतितृचेनप्रु ५६

© Dharmartha Trust J&K. Digitized by eGangotri

द्धोदकस्नानं कुर्यात्॥ अथ पंचगव्यस्नानानि गायत्र्या गोमूत्रेण गंधद्वारामिति गोमये
न आप्यायस्वेति गोक्षीरेण दधिक्राव्णइति दध्ना घृतं मिमिक्षिरइति गोघृतेन देवस्यत्वे
ति कुशोदकेन स्नानं कुर्यात्॥ ततः शुद्धस्नानं कृत्वा तर्पणं कुर्यात्॥ तान्देवांस्तर्पया
मि भूर्देवांस्तर्पयामि भुवर्देवांस्तर्पयामि स्वर्देवांस्तर्पयामि भूर्भुवः स्वर्देवांस्तर्पयामि उ
पवीती तानृषींस्तर्पयामि भूरृषींस्तर्पयामि भुवरृषींस्तर्पयामि स्वरृषींस्तर्पयामि
भूर्भुवः स्वरृषींस्तर्पयामि प्राचीनावीती तान्पितॄंस्तर्पयामि भूः पितॄंस्तर्पयामि भुवः पि
तॄंस्तर्पयामि स्वः पितॄंस्तर्पयामि भूर्भुवः स्वः पितॄंस्तर्पयामि यन्मया दूषितं तोयं शारीरं म
लसंभवात् तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहं॥ ये वांधवाइति सतिलं दत्वा ये अग्नि
दग्धाइति स्थले उदकं दत्वा ये के चास्मत्कुले जाताइति वस्त्रं निष्पीड्य आचम्य शुची वो हव्या

मरुतइतिवस्त्रमद्भिःप्रोक्ष्यदेवस्यत्वेत्यादायअवधूतमित्यवधूयोदुत्यंजातवेदसमि
५७ तिवस्त्रमादित्यंदर्शयित्वाआवहंतीतिधौतेवाससीपरिधायत्रिराचम्यकृच्छ्रादिप्रत्याम्ना
यमूतंहिरण्यंसंकल्प्यदद्यात्ततोयात्रापरिपूरणार्थंगोदानंदशदानानिचकुर्यात्।
महापापोपपापानांनानायोनिषुयत्कृतंतीर्थेषुयत्कृतंपापंगुर्वंगनादियत्कृतंबालभा
वाद्विपत्यायेपरद्रोहादिकंमयादेहाभिमानजंपापंसर्वदायन्मयाकृतंभूतंभव्यंभवि
57 ष्यच्चयत्स्यात्पंममजान्हविगतंपापगतंदुःखंगतंमेव्याधिजंभयंनिष्पापोस्म्यधुनादेवि
प्रसादात्तवनान्यथेतिसंप्रार्थ्यसंध्यावंदनादिकंकृत्वानित्ययात्रांविधायगृहमागत्य
शक्तस्यउपवासःपंचगव्यप्राशनंहविष्याशनंचाशक्तस्येतितीर्थविधिरितिकेचित्
अप्येतदनुरोधेनप्रयोगमात्रंलिख्यते।तत्रतीर्थस्नानाधिकारीतीर्थंप्राप्योपानहौप ५७

© Dharmartha Trust J&K. Digitized by eGangotri

रित्यज्यपुष्पादिकमंजलौगृहीत्वाजलाशयंगत्वाप्रार्थयेत्॥ब्रह्मकमंडलुसंभूतेगं
गेत्रिपथगामिनि।त्रैलोक्यवंदितेदेविगृहाणार्घ्यंनमोस्तुते॥१॥नमोगंगेमहादेविम
हादेवस्यवल्लभे।वहतेत्वांमहादेवोभागीरथिनमोस्तुते॥२॥सितमकरनिषण्णांशु
भ्रवर्णांत्रिनेत्रांकरधृतकलशोद्यत्सोत्पलाभीत्यभी—विधिहरिहररूपांसेंदुकोटी
रजूटांकलितसितदुकूलांजाह्नवींत्वांनमामि॥३॥नमस्तेकमलनाभायनमस्तेज
लशायिने।नमस्तेस्तुहृषीकेशजाह्नवीजनकप्रभो॥४॥तीक्ष्णदंष्ट्रमहाकायक
ल्पांतदहनोपम।भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि॥५॥इत्यादिस्तुत्वांऽजलि
पुष्पादिकंसमर्प्यसाष्टांगंप्रणम्यत्र्यंगवस्त्रीरूपकोवकृत्यप्राणानायम्यप्रायश्चित्ताधि
कारार्थंसचैलस्नानमहंकरिष्येइतिसंकल्प्यस्नात्वाबहिरागत्यसतिलदर्भैर्ब्रह्म

© Dharmartha Trust J&K. Digitized by eGangotri

दंडं गृहीत्वा समस्तसंपदित्यादिश्लोकान्पठित्वा सकृत्त्रिर्वा प्रदक्षिणमावर्त्य ब्राह्मणदंडं
५८ ब्राह्मणपुरतो निधाय साष्टांगं प्रणम्य उपविश्य भवदनुज्ञया मम इह जन्मनि जन्मांत
रे च कृतानां पापानामनुवादनं करिष्ये कुरुष्वेति तैरुक्ते प्राणानायम्य सागरस्वन नि
र्घोष दंडहस्तासुरांतक॥ जगत्स्रष्टर्जगन्मर्दिन्नमामि त्वां सुरेश्वर॥ ॐ नमो देवदे
वाय शितिकंठाय दंडिने॥ रुद्राय चापहस्ताय शूलिने वेधसे नमः॥ सरस्वती च सा
58 वित्री देवमाता गरीयसी॥ सन्निधात्री भव त्वत्र तीर्थे पापप्रणाशिनी इत्युक्त्वा प्रागु
क्तं संकल्पं कुर्यात्। अत्र केचिन्महासंकल्पं वदंति। अस्य श्रीदमनेनेवार्यस्यादिना
रायणस्याचिंत्यापरिमितशक्त्या ध्रियमाणस्य महाजलौघस्य मध्ये परिभ्रममाणा
नामनेककोटिब्रह्मांडानामेकतमेऽव्यक्ते महदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्या ५८

© Dharmartha Trust J&K. Digitized by eGangotri

वरणेरावर्त्तेस्मिन्महतिब्रह्मांडखंडयोर्मध्येआधारशक्तिश्रीकूर्मानंताष्टदिग्गजो
परिप्रतिष्ठितस्यातलेवितलसुतलनितलरसातलतलातलमहातलसप्तपाता
ललोकस्योपरितलेभूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनोलोकतपोलोकसत्यलो
कषट्कस्याधोभागेचक्रवाकशैलमहामलयनगमध्यवर्त्तिनामहाकालियमहाफ
णिराजराजशेषस्यसहस्रफणमणिमंडलमंडितेरावतपुंडरीकवामनकुमुदांज
नपुष्पदंतसार्वभौमसुप्रतीकाख्याष्टदिग्गजशुंडादंडोद्दंडितेअमरावतीभोगवती
आननवतीसिद्धवतीगांधर्ववतीकांतिमतीनामकपुण्यपुरीप्रतिष्ठितेइंद्राग्नियम
निर्ऋतिवरुणवायुकुबेरईशानीदिक्परिमितेलोकालोकाचलपरिमितेजंबुप्लक्ष
शाल्मलिकुशक्रौंचशाकपुष्करसप्तद्वीपपरिमितेकशेरुताम्रगभस्तिनागसौम्यगं

© Dharmartha Trust J&K. Digitized by eGangotri

धर्वे सिद्धचारणभारते तिनवखंडखंडिते भरतवर्षे भरतखंडे अयोध्यामथुरामाया
५९ काशीकांच्यवंतीकुरुक्षेत्रपुष्करादिनानातीर्थयुक्ते कर्मभूमौ मध्यरेखायाः पूर्वदिग्भा
गे भागीरथ्याः पश्चिमतीरे सकलजगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीये परार्द्धे द्वि
तीयपरार्द्धस्य प्रथमवर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अहनि द्वितीययामे तृ
तीये मुहूर्ते प्रथमघटिकायां सप्तमे वैवस्वतमन्वंतरे अष्टाविंशतितमे कलियुगे प्रथमच
59 रणे बौद्धावतारे विक्रमशके अमुकसंवत्सरे अमुके अयने अमुकऋतौ अमुकमासे अ
मुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशि
स्थिते चंद्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ एवं गुणे त्यादिपुण्यतिथौ म
म इह जन्मनि जन्मांतरे च संभावितानां पापानां ब्रह्महनन मद्यपान सुवर्णस्तेय गुरुतल्पग ५९

मनतत्संसर्गरूपमहापातकानांबुद्धिपूर्वकाणांअबुद्धिपूर्वकाणांचमनोवाक्कायकृतानां
बहुकालाभ्यस्तानांउपपातकानांचस्पृष्टास्पृष्टसंकलीकरणमलिनीकरणअपात्रीकरण
जातिभ्रंशकररसविक्रयकन्याविक्रयगोविक्रयखरोष्ट्रमहिषीविक्रयदासीविक्रयअश्व
विक्रयअजादिपशुविक्रयब्रात्यब्राह्मणलघुब्राह्मणवनिरर्थकवृक्षछेदनस्त्रणनपाकर
णब्रह्मस्वापहरणब्राह्मणनिंदागुरुनिंदाअभक्ष्यभक्षणअभोज्यभोजनअचोष्यचोषणअ
पेयपानअस्पृश्यस्पर्शनअश्राव्यश्रवणअनाघ्रेयाघ्राणअहिंस्यहिंसनअवेधवेदनअ
चिंत्यचिंतनअयाज्ययाजनअपूज्यपूजनपूज्यव्यतिक्रमणमातापितृतिरस्कारस्त्रीपुरु
षप्रीतिभेदनमैत्रीभेदनपरस्त्रीगमनक्षत्रियस्त्रीगमनवैश्यस्त्रीगमनशूद्रस्त्रीगमनब्रा
ह्मणस्त्रीगमनविधवास्त्रीगमनदासीस्त्रीगमनवेश्यास्त्रीगमनचांडालादिहीनजातिस्त्री

© Dharmartha Trust J&K. Digitized by eGangotri

गमनपशुयोनिगमनअयोनिवीजपातनकूटसाक्षित्ववादपैशून्यवादमिथ्याभिशाप
६० वादपरशापवादपरद्रोहहानिकरणम्लेछभाषाभाषणम्लेछसहासनवृक्षद्वेषकरण
स्वामिभेदनमित्रवंचनभार्यावंचनगर्भपातनरजस्वलागमननिषिद्धकालमैथुनसका
मपरस्त्रीस्तनस्पर्शनविकारभाषणपर्युषिततांबूलचर्वणहीनसेवनअनृतभाषणपरान्न
60 भोजनासाक्षिभोजनगणान्नभोजनभ्रूणहिंसापशुहिंसाबालहिंसास्त्रीहिंसास्नानत्याग
संध्यात्यागवैश्वदेवत्यागदेवपूजात्यागोपासनत्यागअतिथित्यागआत्मार्थेपाकरणका
कीमिष्टान्नभोजनवालकैःसहभोजननक्तमुखभोजनपंक्तिभेदकरणदीनोपातकानो
लघुस्थूलसूक्ष्माद्र्दाणां क्षालनपूर्वकंराहूपरागनिमित्तकुरुक्षेत्राधिकरणश्रोत्रिय
संप्रदानकसहस्रसुवर्णभारदानजन्यफलदशगुणविध्वंसेगतगंगास्नानफलशात ६०

© Dharmartha Trust J&K. Digitized by eGangotri

गुणसागरसंगनगंगास्नानफलशतगुणकाश्पुत्तरवहगंगास्नानफलशतगुणगंगा
यमुनासंगमस्नानफलसहस्त्रगुणफलप्राप्तिपूर्वकसमस्तपितृणामक्षय्यविष्णादि
लोकप्राप्तिकामनयास्नानमहंकरिष्ये त्रिः स्नात्वाद्विराचम्यसंध्यादिकं विधायमुंडनंका
रयेत्। तत्रायंक्रमः। यावच्छेदनीयनखरोमसमानसंख्यवर्षसहस्त्रावच्छिन्नस्वर्गमहित
त्वकामोवपनंकरिष्ये। आत्मनःशुद्धिकामोवापितृणांमुक्तिहेतवे। वपनंकारयिष्यामि
तीरेहंतवजान्हवि। यानिकानिचपापानिब्रह्महत्यासमानिच। केशानाश्रित्यतिष्ठंतित
स्मात्केशान्वपाम्यहं। केशानांयावतीसंख्याछिन्नानांयावतीजले। तावद्वर्षसहस्त्राणिस्व
र्गलोकेमहीयते। दक्षिणमूलमारभ्यशिरोवपनंउदकसंस्थितनखनिकृंतनंचकेशोदि
तीरेनिक्षिपेत्। प्राणनायम्यपूर्वांगानिकरिष्ये। दंतधावनकाष्ठंहस्तेगृहीत्वाआयुर्बलं

© Dharmartha Trust J&K. Digitized by eGangotri

यशोवर्चःप्रजाःपशुवसूनिच।ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पती इतिदंतकाष्ठंसंप्रा
६१ र्थ्यमुखदुर्गंधिनाशायरदानांचविशुद्धये।ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनं।दंतकाष्ठं
मक्षायित्वाजिह्वोल्लेखनंकृत्वाप्रक्षाल्यविसर्जयेत्।ततोहृशस्नानानि।भस्महस्तेगृहीत्वा
सर्वेषामेवदेवानांपूज्योरुद्रोत्रदेवता।तस्मात्पवित्रंभस्मैतत्तेनस्नानमघापहं।मानस्तो
के०हवामहे।।अग्निरितिभस्मजलमितिभस्मस्थलमितिभस्मव्योमेतिभस्मसर्वं२ह्वा
61 इदंभस्मइतिभस्मगृहीत्वा।ईशानायनमःशिरसि।तत्पुरुषायनमःमुखे।अघोरायन
मःहृदये।वामदेवायनमःगुह्ये।सद्योजातायनमःपादयोः।प्रणवेनसर्वांगे ॐ पुनःस्ना
त्वाद्विराचम्य।ततोगोमयंहस्तेगृहीत्वा।अग्रमग्रंचरंतीनामोषधीवनेवने।तासाम
षभपत्नीनांपवित्रंकायशोधनं।तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदा।गंधद्वारांदु० ६१

श्रियं। सर्वांगे पुनः स्नात्वाऽऽचम्य गायत्र्या गोमूत्रस्नानं कृत्वा ततो गोमूत्रं गोमयं क्षीरं द
धि सर्पिः कुशोदकमिति पञ्चगव्यस्नानानि कृत्वा मृत्तिकास्नानं। वलित्था पर्वतानां खि
द्रं विभर्षि पृथिवि। प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि भूमिं भूमिं भूम्या मा वो रिष
त्खनिता यस्मै चाहं खनामि वः। द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरं खनित्वा स्योना पृ
थिवि० सप्रथः। मृदमादाय। आपनेनेपरा० इमे इति दूर्वामादाय॥ तत्सवितुर्वरे० यान्। त्र्य
म्बुकस्य भूमौ मृदं निधाय ततो मृदं दिक्षु निक्षिपेत्। त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहव
ꣳ शूरमिन्द्रं। हुवे नु शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः॥ पूर्वस्यां॥ यमाय मधु
त्तमं राज्ञे हव्यं जुहोत। इदं नम ऋषिभ्यः पूर्वजेभ्यः पथिकृद्भ्यः दक्षिणस्यां। तत्त्वा यामि ब्रह्मणा
वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मान आयुः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रमोषीः। पश्चिमायां। वयं सोम व्रतेतव मनस्तनूषु विभ्रतः प्रजावन्तो अशीमहि॥ उत्तरस्यां।
६२ नेत्स्सूर्यं रोदसी उभे दोषावस्तो रुपब्रुवे। भोजेष्वस्मां अभ्युच्चरा सदा। उपरिष्टात्। अधःपश्य
स्व मोपरि संतरां पादकौ हर। मा ते कशप्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ। अधः। ततोंगेषु स
हस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं। शिर
सि। अक्षीभ्यां भ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि। यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया
62 विवृहामि ते। मुखे। ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। यक्ष्मं दोषण्यमंसाभ्यां
बाहुभ्यां विवृहामि ते। ग्रीवायां। आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि। यक्ष्मं मतस्ना
भ्यां यक्नः प्लाशिभ्यो विवृहामि ते। हृदये। नाभौ। नाभिर्न आ ददे च क्षुक्षि- सूर्यं सचा।
कवेर पत्यमा दुहे। नाभौ। त्वमिन्द्र सजोषसमर्कं विभर्षि बाह्वोः। वज्रं शिशान ओजसा॥ ६२

© Dharmartha Trust J&K. Digitized by eGangotri

वाह्वोः।सोमानेस्वरणंकृणुहिब्रह्मणस्पते।कक्षीवंतंयऔशिजंकक्षयोः।यःकुक्षिः
सोमपातमःसमुद्रइवपिन्वते।उर्वीरापोनकाकुदः।कुक्ष्योः।वव्हीनांपितावहुरस्यपु
त्रःश्चिश्चाकृणोतिसमनावगत्यइषुधिःशंकाःपृतनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसू
तः।पृष्ठे।ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां•हामिते।ऊर्वोः।मेहनाहृल्लं•मिते।
इतिजान्वोः।एतावानस्येतिपादयोःयस्यविश्वानिहस्तयोःपंचक्षितीभ्यांवसु।स्याशय
स्वपोअस्मध्रुक्कृदिव्येचाशनिर्जहिइतिहस्तयोः।अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिप
र्वणि।यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामितेइत्यनेनपुरुषसूक्तेनचसर्वांगोद्वर्त
नंसहस्रशीर्षेतिषोडशर्चस्यसूक्तस्यनारायणऋषिःपुरुषोदेवताअनुष्टुप्छंदःअं
त्यात्रिष्टुप्सर्वांगोद्वर्तनेविनियोगःअश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधराशिरसाधा

© Dharmartha Trust J&K. Digitized by eGangotri

रयिष्यामि रक्षस्व मां पदे पदे। भूमिर्धेनुर्धरिणी लोकधारिणी। उद्धृतासि वराहेण कृष्णेन
६३ शतबाहुना। मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतं। मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रि
ता। त्वया हतेन पापेन गच्छामि परमां गतिं। इति सतिलां सदूर्वां मृदं शिरसि निधाय मृत्तिका
स्यानेन प्रक्षाल्य तीर्थं प्रार्थयेत्। हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भु
63 क्तमसाधूनां पापेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं। तन्न इंद्रो वरु
णो बृहस्पतिस्सविता च पुनन्तु पुनः पुनः। नमोग्नयेप्सुमते नम इंद्राय नमो वरुणाय न
मो वारुण्यै नमोद्भ्यः। यदपां क्रूरं यदमेध्यं यदशांतं तदपगच्छतात्। अत्याशनाद्तीपा
नाद्यच्च उग्रात्प्रतिग्रहात्। तन्नो वरुणो राजा पाणिना ह्यवमर्शतु। सोहमपापो विरजो नि
र्मुक्तो मुक्तकिल्बिषः। नाकस्य पृष्ठमारुह्य गच्छेद् ब्रह्मसलोकतां। अवते हेड उदुत्तममि ६३

© Dharmartha Trust J&K. Digitized by eGangotri

तिष्ठ्योर्जगतीश्छुनःशेगोवरुणस्त्रिष्टुप्रार्थनेविनियोगः॥ ॐ अवतेहेडोवरुणनमो
भिरवयज्ञेभिरीमहेहविर्भिः। क्षयन्नस्मभ्यमसुरप्रचेतोराजन्नेनांसिशिश्रथःकृता
नि। उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय। अथावयमादित्यव्रतेतवा
नागसोअदितयेस्याम॥ प्रपद्येवरुणंदेवमंभसांपतिमूर्जितं। याचितंदेहिमेसर्वंसर्वपा
पापनुत्तये। तीर्थमावाहयिष्यामिसर्वाघविनिषूदनं। सांनिध्यमस्मिंस्तोयेऽस्तुस्थीय
तांमदनुग्रहात्। इतिवरुणंप्रार्थ्य। तीक्ष्णादंष्ट्रेतिपठित्वासागरस्वननिर्घोषदंडहस्ता
सुरांतक। जगत्स्रष्टर्जगन्मर्दिन्नमामित्वांसुरेश्वर। पुष्कराद्यानितीर्थानिगंगाद्याःस
रितस्तथा। आगच्छन्तुपवित्राणिस्नानकालेसदामम। शरीरेजर्जरीभूतेव्याधिग्रस्तेक
लेवरे। औषधंजान्हवीतोयंवैद्योनारायणोहरिः। किरणधूतपापाचपुण्यतोयासर

© Dharmartha Trust J&K. Digitized by eGangotri

स्वती। गंगा च यमुना चैव पंच नद्यः पुनंतु मां। नंदिनी नलिनी सीता मालती च मलापहा।
६४ विष्णुपादाब्जसंभूता गंगा त्रिपथगामिनी। भागीरथी भोगवती जान्हवी त्रिदशेश्वरी। द्वा
दशैतानि नामानि यत्र यत्र जलाशये स्नानोद्यतः पठेन्नित्यं तत्र तत्र वसाम्यहमिति पृथि
व्या याः प्रवर्त्तो निवर्त्तः। गंगा गंगेति यन्नाम योजनानां शतैरपि स्थितैरुच्चारितं हंति पापं
64 जन्मत्रयार्जितं। इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या। असिक्न्या मरु
द्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया। इति तीर्थं प्रार्थ्य स्नात्वा स्नानांगतर्पणं कुर्या
त्। ब्रह्मादयो ये देवाः। ततो धौते वाससी परिधाय संध्यावंदनादि कृत्वा नित्ययात्रां कृत्वा
गृहमेत्य शक्तस्योपवासोऽशक्तस्य हविष्याशनमिति इति प्रयोगविधिः॥ अथैतदनुरो
धेनैव संक्षिप्तः प्रयोगो लिख्यते। आदौ सचैलस्नानं करिष्ये इति संकल्प्य स्नात्वा। विष्णु ६४

© Dharmartha Trust J&K. Digitized by eGangotri

विष्णुःश्री०एवंगुविं०थौकाशीयात्रांगभूतंतीर्थविधिंकरिष्ये।तीर्थविध्याधिकार
सिध्यर्थंज्ञानाज्ञानकामाकामसकृदसकृत्कृतकायिकवाचिकमानसिकसांस
र्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकलघुपात
कसंकलीकरणमलिनीकरणपात्रीकरणजातिभ्रंशकरप्रकीर्णकपातकानांम
ध्येसंभावितानांनिरासार्थंयथाशक्तिरजतप्रत्याम्नायेनकृछ्रत्रयंप्रायश्चित्तंकरिष्ये
॥आत्मनःशुद्धिकामोवापितॄणांमुक्तिहेतवे।वपनंकारयिष्यामितीरेहंतेवजान्हवि
॥यानिकानिचपापानिब्रह्महत्यासमानिच।केशानाश्रित्यतिष्ठंतितस्मात्केशान्वपा
म्यहं॥आज्ञांगृहीत्वासुक्षुरोभवेतिशिखाकक्षोपस्थवर्जं।वपनंकृत्वास्नात्वा।आयु
र्बलंयशोवर्चःप्रजाःपशुवसूनिच।ब्रह्मप्रज्ञांचमेधांचत्वन्नोधेहिवनस्पते।मुखदु

© Dharmartha Trust J&K. Digitized by eGangotri

गंधिनाशाय दंतानांच विशुद्धये। क्षालनाय च गात्राणां कुर्वे हं दंतधावनं इति मंत्रेण दं
६५ तकाष्ठेन दंतान्संशोध्य द्वादशगंडूषान् कृत्वा शुद्धये स्नात्वा चम्य भस्मादाय। ईशाना
य नमः इति शिरसि। तत्पुरुषाय मुखे। अघो० हृदये। वामदेवा० गुह्ये। सद्योजाताय इ
ति पादयोः। प्रणवेन सर्वांगे। मानस्तोके इति मंत्रेण सर्वांगं संलिप्य स्नात्वा चम्य गोम
यं गृहीत्वा। अग्रमग्रे चरंतीनामोषधीनां वने वने। तासामृषभपत्नीनां पवित्रं कायशो
65 धनं सर्वं देति शिरः अभ्यंगानि विलिप्य स्नात्वा चम्य अन्यस्नानानि कृत्वा मृत्तिकास्ना
नं करिष्ये इति संकल्प्य। बलिं त्वा पर्वतानां० भूमिं प्रार्थ्य। मा वो रिषत्खनिता यस्मै चा
हं खनामि वः। द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरं इति खनित्वा। स्योना पृथिवि भ
वान्ऋक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः। मृदमादाय। आयने ते परायणे दूर्वा रो ६५

© Dharmartha Trust J&K. Digitized by eGangotri

हे नु पुष्पिणीः ह्रदाश्च पुंडरीकाणि समुद्रस्य गृहा इमे। इति दूर्वामादाय। त्रातारमिंद्र
मवितारमिंद्रꣳ हवे हवे सुहवꣳ शूरमिंद्रं। ह्वये नु शक्रं पुरुहूतमिंद्रꣳ स्वस्ति नो मघवा
धात्विंद्रः इति पूर्वे। यमाय सोमं सुनुत इति दक्षिणे। तत्त्वा यामि ब्रह्मणा वंदमानस्तदाशा
स्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीरिति प
श्चिमे। वयं सोम व्रते तव मनस्तनूषु बिभ्रतः। प्रजावंतो अशीमहि इति उत्तरे। न तस्थूपंरो
दसी उभे दोषावस्तोरुप ब्रुवे। भोजेष्वस्माँ अभ्युच्चरा सदा। इत्युपरिष्टात्। अधः पश्यस्व
मोपरि संतरां पादकौ हर। मा ते कशप्लकौ दृशन्स्त्री हि ब्रह्मा बभूविथ। इत्यधः। ततो गे
षु। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशां
गुलम् इति शिरसि। अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां चुबुकादधि। यक्ष्मꣳ शीर्षण्यं

© Dharmartha Trust J&K. Digitized by eGangotri

६६ मस्तिष्काज्जिह्वाया विवृहामि ते इति मुखे।ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो नूक्यात्यक्ष्मं
दोषण्यमंसाभ्यां बाहुभ्यां विवृहामि ते इति ग्रीवायां।आंत्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि
यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो विवृहामि ते हृदये।नाभा नाभिं न आददे चक्षुश्चित्सूर्ये
सचा।कवेपरत्यमा दुहे इति नाभौ।त्वमिंद्र सजोषसमर्कं बिभर्षि बाह्वोः।वज्रं शिशान ओ
जसा इति बाह्वोः।सोमानं स्वरणं कृणुहि ब्रह्मणस्पते।कक्षीवंतं य औशिजं।इति कक्षयोः
66 ।यः कुक्षिः सोमपातमः समुद्र इव पिन्वते।उर्वीरापो न काकुद इति कुक्ष्योः।।बह्वीनां पिता
बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य।इषुधिः शंकाः पृतनाश्च सर्वाः पृष्ठे निनद्धो जय
ति प्रसूत इति पृष्ठे।।ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां।यक्ष्मं श्रोणिभ्यां भासदाद्भ्
ससो विवृहामि ते।इत्यूर्वोः।मेहनाद्वलंकरणाल्लोमभ्यस्ते नखेभ्यः।यक्ष्मं सर्वस्मादात्मन ६६

© Dharmartha Trust J&K: Digitized by eGangotri

विश्वहामि

स्तमिदं विश्वहामि तेइति जान्वोः ॥ एतावानस्य महिमातो ज्यायांश्च पूरुषः । पादोस्य विश्वाभू
तानि त्रिपादस्यामृतं दिवि इति पादयोः । यस्य विश्वानि हस्तयोः पंचक्षितीनां वसु । स्याशयस्व
पोऽश्रस्मधुकृ दिव्येचाशानिर्जहि इति हस्तयोः । अंगादंगात्लोम्नोलोम्नोजातं पर्वणि पर्वणि यक्ष्म
ं सर्वस्मादात्मनस्तमिदं तो इत्यनेन पुरुषसूक्तेन च सर्वाण्यंगान्यु इत्यसहस्रशीर्षापुरुषः सह
स्राक्षः सहस्रपात् । सभूमिं विश्वतोवृत्वा अत्यतिष्ठ द्दशांगुलं इति षोडशर्चस्य सूक्तस्य नारायण
ऋषिः पुरुषो देवता । अनुष्टुप् छंदः । अत्या त्रिष्टुप् । सर्वांगो द्धर्त्तने विनियोगः अश्वक्रांते रथक्रां
ते विष्णुक्रांते वसुंधरा शिरसा धारयिष्यामि रक्षस्व मां पदे पदे । भूमि धेनु र्धरणी लोकधारिणी
। उद्धृतासि वराहेण कृष्णेन शतबाहुना । मृत्तिके देहिमे पुष्टिं त्वयि सर्वं प्रतिष्ठितं । मृत्तिके ब्रह्म
दत्तासि काश्यपेनाभिमंत्रिता । मृत्तिके प्रतिष्ठितं सर्वं तन्मे निर्णुद मृत्तिके । त्वया हतेन पापेन ग

© Dharmartha Trust J&K. Digitized by eGangotri

छामि परमां गतिं। इति सतिलमदं दूर्वां शिरसि निधाय मन्त्रिकास्थाने प्रक्षाल्य तीर्थं प्रार्थयेत्।
६७ हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः। य
न्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं। तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः॥
नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः। यदपां क्रूरं यदमेध्यं यदशा
67 न्तं तदपगच्छतात्। अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात्। तन्नो वरुणो राजा पाणिना
ह्यवमर्शतु। सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः। नाकस्य पृष्ठमारुह्य गच्छेत् ब्रह्मसलो
कतां॥ अव ते हेड उदुत्तममिति द्वयोर्जगती शुनःशेपो वरुणस्त्रिष्टुप् प्रार्थने विनियोगः। ॐ
अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः। क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि
शिश्रथः कृतानि। उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय। अथा वयमादित्य व्र ६७

© Dharmartha Trust J&K. Digitized by eGangotri

तेनवानागसो। अदितयेस्यामुत्रपथेवरुणंदेवमंभसांपतिमूर्जितंयाचितंदेहिमेसर्वंस
र्वपापापनुत्तये। तीर्थमावाहयिष्यामिसर्वाघविनिषूदनं। सान्निध्यमस्मिंस्तोयस्त्वंस्थीय
तांमदनुग्रहात्। इतिवरुणंसंप्रार्थ्य॥ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम। भैरवायनम
स्तुभ्यमनुज्ञांदातुमर्हसि। सागरस्वननिर्घोषदंडहस्तासुरांतक। जगत्स्रष्टर्जगन्मर्द्दिन्नमा
मित्वांसुरेश्वर। पुष्कराद्यानितीर्थानिगंगाद्याःसरितस्तथा। आगच्छंतुपवित्राणिस्नानका
लेसदाममा। शरीरेजर्जरीभूतेव्याधियस्तेकलेवरे। औषधंजान्हवीतोयंवैद्योनारायणोहरिः
।किरणाधूतपापाचपुण्यतोयासरस्वती। गंगाचयमुनाचैवपंचनद्यःपुनंतुमां। नंदिनीनलि
नीसीतामालतीचमलापहा। विष्णुपादाब्जसंभूतागंगात्रिपथगामिनी॥ भागीरथीभोगवती
जान्हवीत्रिदशेश्वरी। द्वादशैतानिनामानियत्रयत्रजलाशये। स्नानोद्यतःपठेन्नित्यंतत्रत

© Dharmartha Trust J&K. Digitized by eGangotri

त्रवसाम्यहं।इतिपठित्वा॥याःप्रवतोनिवतः।इमंमेगंगेयमु०इतितीर्थप्रार्थनांस्नात्वास्नानांग
६८ तर्पणंकुर्यात्।ब्रह्मादयोयेदे०धौतवाससीपरिधायसंध्यावंदनादिकुर्यात्।ततोविश्वेश्व
रंसंपूज्यप्रदक्षिणीकृत्यसर्वंनित्यपात्रंविधायगृहमागत्यशक्तस्यउपवासः।अशक्तस्य
हविष्याशने।इतितीर्थविधिःसमाप्तः।अथप्रसंगात्प्रदक्षिणाविषयेकिंचिदुच्यतेतत्रका
68 शीप्रकरणेप्रदक्षिणाविषयेविप्रतिपत्तिः।तत्रकेचिदाहुः।एकाचंड्यांरवेःसप्ततिस्रोदद्या
द्विनायकेचतस्रोविष्णावेदेयाःशिवस्यार्द्धप्रदक्षिणं।अपसव्यंयतीनांस्यात्सव्यंतुब्रह्मचा
रिणां।सव्यापसव्यंगृहिणांशंभोर्नित्यंप्रदक्षिणं।शिवंप्रदक्षिणंकुर्वन्सोमसूत्रंनलंघयेत्
।लंघनेत्वेकमेकंस्यादलंघ्यादयुतत्रयं।अर्द्धप्रदक्षिणाप्रकारश्च।पदांतरेपदंन्यस्यक
रौचलनवर्जितौ।स्तुतिर्वाचिहृदिध्यानंचतुरंगेप्रदक्षिणे।स्थानेचेऽस्यसंकल्पवृष ६८

© Dharmartha Trust J&K. Digitized by eGangotri

भादौप्रदक्षिणे।सव्यंसव्येविजानीयादपसव्येपसव्यकं।वृषंचंडंवृषंचैवसोमसूत्रं
पुनर्वृषं।चंडंचसोमसूत्रंचपुनश्चंडंपुनर्वृषं।नवप्रदक्षिणेपेतंयस्तुकुर्यात्प्रदक्षिणं।
पदेपदेऽश्वमेधस्यफलंप्राप्नोतिसध्रुवं।त्रिंशत्सहस्रसंख्याकप्रदक्षिणफलंलभेत्।त
णैःकाष्ठैस्तथापर्णैःपाषाणैर्लोष्टकादिभिः।अंतर्द्धानंपुनःकृत्वासोमसूत्रंतुलंघयेत्।
सोमसूत्रद्वयंयत्रयत्रवाविष्णुमंदिरे।अपसव्येनकुर्वीतकुर्यादेवप्रदक्षिणे।सोमसूत्रप
रिमाणेच।प्रासादविस्तारसमानसूत्रंसोमस्यसूत्रंदिशिसोमसूत्रं।सूत्राद्बहिर्लंघन
तोनदोषःसदोषमभ्यंतरलंघनंतु।अयमर्थः।मध्यस्थितंलिंगमवधीकृत्यभित्त्यवधिकं
यावत्सूत्रंतावदेवभित्तेर्वहिःसोमस्यदिशिउत्तरस्यांसूत्रंसोमसूत्रंतन्नलंघयेत्।त
तोग्रेनसोमसूत्रेतल्लंघनेनदोषः।किंतुएकमेकंप्रदक्षिणंएकप्रदक्षिणफलंभवति।

© Dharmartha Trust J&K. Digitized by eGangotri

तदुल्लंघनेत्वपुनस्त्रयप्रदक्षिणफलं स्यादिति। यथाश्रुतव्याख्याने तु लंघने त्वेकमेकं स्या
६९ दिति नोपपद्यते तल्लंघनस्य निषिद्धत्वात्सोमस्यादिशीत्युपलक्षणं तेन प्रणालीदिशीत्य
र्थः। लिंगेपि। प्रदक्षिणात्रयं कुर्याद्यः प्रासादसमंततः। सव्यापसव्यन्यायेन मदुगत्याशु
चिर्नरः। पदे पदेश्वमेधस्य यज्ञस्य फलमाप्नुयात्। न तिष्ठन्नातिधावेच्च शनैर्गच्छेत्प्रदक्षि
69 णं। नारदीयेपि। शिवं प्रदक्षिणीकुर्यात्सव्यासव्यविधानतः इति तत्र विशेषः। सोमसूत्रद्वयं
यत्र यत्र वा विष्णुमंदिरं। अपसव्येन कुर्वीत कुर्यादेव प्रदक्षिणमिति। एतस्यायं न दोषः। त
स्माद्वृषादिक्रमेणैव विश्वेश्वरे प्रदक्षिणा कार्येति। वस्तुतस्तु एतावन्नोपयुक्तं किंतु यस्स
मूलं तावदनुष्ठेयं तत्र तावत्प्रायश्चित्तार्थे तीर्थयात्रायां तत्रत्यसंभावितधर्मानुष्ठानेन तत् ६९
क्रमेण अन्यथापि तीर्थयात्रायां तद्भिन्ने संभावितधर्मस्य समूलस्यानुष्ठानेन तथा हि। याना

© Dharmartha Trust J&K. Digitized by eGangotri

नितुपरित्यज्य भाव्यं पादचारैर्नरैः। लुठित्वा लोठिनी तत्र कृत्वा कार्पटिकाकृतिं लोठिनी लु
ठित्वेत्यस्य साष्टांगं प्रणम्येत्यर्थः। अष्टांगप्रणाममस्तु पद्भ्यां कराभ्यां जानुभ्यां शिरसा चोरसा
तथा। मनसा वचसा दृष्ट्या प्रणामोऽष्टांग उच्यत इति कृत्वेति यदि यात्राप्रक्रमे कार्पटिकाकृ
तिर्न कृता तदा प्रवेशदिने कार्येत्यर्थः। गयायात्रायां प्रक्रमे एवावश्यं कार्याऽन्यत्र तत्र कर
णे फलसत्वेपि तत्राकरणे दोषाभावेनाकरणेपि प्रवेशदिनेऽवश्यं कार्येति भावः सा च शास्त्रो
क्तीषादित्यागरूपा। ततः गत्वा स्नानं प्रकुर्वीत वपनं तदनंतरं। स्नानं सचैलं सचैलमाप्लुत्य
जले मलेइ इति काशीखंडात्। यदन्हि तीर्थप्राप्तिः स्यात्तदन्हः पूर्ववासरे। उपवासः प्रकर्त्तव्यः
प्राप्तेन्हि श्राद्धदो भवेदिति काशीखंडात्तीर्थप्राप्तिदिने श्राद्धं ततः पूर्वेदिने उपवासः प्रभासखं
डे तु उपवासं ततः कुर्यात्तस्मिन्नहनि सुव्रत इति तीर्थप्राप्तिदिने उपवासो विहितः तथा च

© Dharmartha Trust J&K. Digitized by eGangotri

मुंडनं चोपवासश्चेत्यनेन स्वरूपविधौ कालद्वयस्योत्पन्नशिष्टस्यातुल्यबलत्वेनाग्निहो
७० त्रे पयोदध्यादिवद्विकल्पः तत्राद्यपक्षे प्राप्तिदिने तीर्थश्राद्धशेषभोजनमपि संभवतीति द्विती
येतु श्राद्धशेषस्याप्राशनं कृत्वोपवासः कार्य एकादश्यादिवत् इति दीक्षिताः द्वितीयमतं युक्त
70 माद्यमतमेकदेश्युक्तिरिति गुरुचरणाः उपवासः काम्य एव पापक्षयफलकोन त्वावश्यक
इति कल्पतरुः। वस्तुतस्तु तीर्थप्राप्त्यधिकारसिध्यर्थः पूर्वदिनोपवासस्तत्प्राप्तिदिनोप
वासस्तु तन्निमित्तक इति न मिथो विरोध इति न विकल्प इत्युपवासद्वयं बोध्यमत एव मुं
डनं चोपवासश्चेति समुच्चयः संगच्छते काशीखंडस्वरसेनापि तथैव प्रतीयते। अत एवाग्नि
मकार्येषु शुद्धिजनक उपवास इत्यन्ये व्याख्यातमित्ति बोध्यं तथा च तीर्थप्राप्तिदिने यानना ७०
रूढो यानं परित्यज्य पादचारेण गत्वा तीर्थे दृष्टिपथं गते साष्टांगप्रणम्य शिरोवेष्टनशस्त्रा

© Dharmartha Trust J&K. Digitized by eGangotri

तत्रचोक्तामंत्रानारायणोपनिषदिस्पष्टाः

दीन्परित्यज्यविनीतवेषेणतीर्थंप्रविश्यप्रणवेनतीर्थंस्पृष्ट्वासचैलंस्नात्वावपनंकृत्वा
शुद्धिस्नानंकृत्वापुनःसंकल्पपूर्वकंमंत्रवत्स्नानंकृत्वातर्पणंसंध्यातर्पणपूजादिविधायो
पवासंसंकल्प्यनित्ययात्रादिकृत्वातद्दिनेश्राद्धंकृत्वोपवासमाधायकुर्यात्।अधिकफले
च्छायांप्रागुक्तबौधायनोक्तंमृत्तिकास्नानमपिकार्यंततोप्यधिकफलेच्छायांप्रायश्चित्तप्रक
रणोक्तानिदशविधस्नानान्यपिकार्याणि।तीर्थप्राप्त्यादौक्रियमाणंस्नानंक्रियास्नानंननि
त्यंनैमित्तिकंकाम्यंक्रियांगंमलघर्षणं।क्रियास्नानंतथाषष्ठंस्नानंषोढाप्रकीर्तितमितिशं
खोक्तेसत्रक्रियास्नानेशंखोक्ताएवधर्माःतथाहिक्रियास्नानंप्रवक्ष्यामियथावदनुपूर्वशः
मृद्भिरद्भिश्चकर्तव्यंशौचमादौयथाविधिजलेनिमग्नउन्मज्यउपस्पृश्ययथाविधि।तीर्थ
स्यावाहनंकार्यंतत्प्रवक्ष्याम्यतःपरं।प्रपद्येवरुणंदेवमंभसांपतिमूर्जितं।याचितंदेहिमे

© Dharmartha Trust J&K. Digitized by eGangotri

तीर्थं सर्वपापापनुत्तये। तीर्थमावाहयिष्यामि सर्वाघविनिषूदनं। सांनिध्यमस्मिंस्तोये नु भ
७१ जतां मदनुग्रहात्। भजतामित्यस्य वरुण इति शेषः। रुद्रान्प्रपद्ये वरदान्सर्वानप्सुषदस्त्वहं
सर्वानप्सुषदश्चैव प्रपद्ये प्राणतस्थितः। देवमप्सुषदं वह्निं प्रपद्येऽघनिषूदनं। आपः पुण्याः प
वित्राश्च प्रपद्ये वरुणं तथा। रुद्रश्चाग्निश्च सर्पाश्च वरुणस्त्वापएव च। शमयन्त्वाशु मे पापं पुनं
तु च सदा मम। इत्येवमुक्त्वा कर्त्तव्यं ततः संमार्जनं जले। आपो हि ष्ठेति तिसृभिर्यथावदनुप
र्वशः। हिरण्यवर्णेति च वेसृभिश्च तसृभिस्तथा। शं नो देवीरिति तथा शं न आपस्तथैव च
ऽइदमापः प्रवहत तथा मन्त्रमुदीरयेत्। एवं संमार्जनं कृत्वा छंद आर्षं सदैवतं। अघमर्षणसू
क्तस्य संस्मरेत्प्रयतः सदा। छंद आनुष्टुभं तस्य तस्यर्षिश्चैवाघमर्षणः। देवता भाववृत्तश्च पा ७१
पघ्नस्य प्रकीर्त्तितः। पापघ्नस्य सूक्तस्येत्यन्वयः। ततोंभसि निमज्जेत त्रिः पठेदघमर्षणं त्र

© Dharmartha Trust J&K. Digitized by eGangotri

नेनविधिनास्नात्वाह्यपूर्वमध्येस्नानवाससापरिवर्त्तितवासाश्चतीर्थतीरउपस्पृशेत्उद
कस्याप्रदानाद्धिस्नानशाटीनपीडयेत्अनेनविधिनास्नातःपुण्यफलमुपाश्नुतेयथाश्वमे
धःक्रतुराट्सर्वपापापनोदनःतथाऽघमर्षणंसूक्तंसर्वपापापनोदनमितिशंखोक्तेःइदा
नीमाचारस्कन्दत्रापिस्वशाखोक्तपौराणिकपौरस्त्यतरानुष्ठानेएवउपरागादिनिमित्तकम
पिशंखमतेक्रियास्नानमेवचंडालादिस्पर्शनिमित्तकानामेवतेननैमित्तिकत्वकथनात्अत्र
घ्यपौराणंपापेसर्वसाधारणंअनुद्धृतैरुद्धृतैर्वाजलैःस्नानंसमाचरेत्।तीर्थंप्रकल्पयेद्विद्वा
न्मूलमंत्रेणधर्मवित्।नमोनारायणायेतिमूलमंत्रउदाहृतः।दर्भपाणिस्तुविधिनाआचान्तःप्र
यतःशुचिः।चतुर्हस्तसमायुक्तंचतुरस्रंसमंततः।प्रकल्प्यावाहयेत्गंगामेभिर्मंत्रैर्विचक्ष
णः।विष्णोःपादप्रसूतासिवैष्णवीविष्णुपूजिता।पाहिनस्त्वेनसस्तस्मादाजन्ममरणान्तिका।

© Dharmartha Trust J&K. Digitized by eGangotri

त्। तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत्। दिवि भुव्यंतरिक्षे च तानि ते संति जाह्न
७२ वि। नंदिनीत्येव ते नाम देवेषु नलिनीति च। वृंदा पृथ्वी च सुभगा विश्वकाया सिता शिवा। विद्याध
री सुप्रसन्ना तथा लोकप्रसादिनी। क्षेमा च जाह्नवी चैव शांता शांतिप्रदायिनी। एतानि पुण्यनामा
नि स्नानकाले प्रकीर्तयेत्। भवेत्संनिहिता तत्र गंगा त्रिपथगामिनी। सप्तवाराभिजप्तेन करसं
72 पुटयोजितं। मूर्ध्नि कुर्याज्जले मग्नस्त्रिश्चतुः पंच सप्त वा। स्नानं कुर्यान्मृदा तत्र आमंत्र्य च विधान
तः। अश्वक्रांते० वसुंधरे० मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं। उद्धृतासि वराहेण कृष्णेन
शतबाहुना। नमस्ते सर्वभूतानां प्रभवारणि सुव्रते। आक्रम्य मम गात्राणि सर्वपापेभ्यो मोचयेति
अथाशुचिश्चेत्तदा तूष्णीमवगाह्य द्विराचम्य तीर्थकल्पनां कुर्यात् शुचिश्चेदनवगाह्यैव त्या ७२
कुः सप्तवारेति उक्तमूलमंत्रेणेति शेषः अश्वेत्यादिसार्धश्लोकद्वयेन मृदमभिमंत्र्य तया गात्रा

© Dharmartha Trust J&K. Digitized by eGangotri

एषालिप्यविधानतः स्नानं कुर्यादित्यन्वयः विधानं चांगुलीभिः पिधायैवं श्रोत्रदृङ्नासिका
मुखं निमज्जेत्प्रतिस्रोत इति स्मृत्युक्तं। नद्यादौ प्रतिस्रोतस्तडागादिषु गृहे च प्रत्यकमिति च
नाभिमात्रजले गत्वा कृत्वा केशान्द्विधा द्विजः निरुध्य कर्णौ नासां च त्रिः कृत्वो मज्जनं तत इ
ति वामनोक्तं च नद्यामघमर्षणमार्जनादि च मूलमंत्रेणेत्याहुः स्त्रीशूद्रयोस्तु नमइत्येव मं
त्रं अनुमतोस्य नमस्कारो मंत्र इति गौतमात् स्त्रीशूद्रयोरपि पुराणाध्ययनस्य अध्येत
व्यं न चान्येन ब्राह्मणं क्षत्रियं विना। श्रोतव्यमेव शूद्रेण नाध्येतव्यं कदाचनेति निषिद्धत्वेन
तदंतर्गतमंत्रपाठस्य दूरगतत्वात् इति कर्तव्यतानयोः पाद्मोक्तैव पुराणस्य सर्वसाधार
णत्वात्। चतुर्णामपि वर्णानां यानि प्रोक्तानि श्रेयसे। धर्मशास्त्राणि राजेन्द्र शृणु तानि नृपोत्त
म। विशेषतश्च शूद्राणां पावनानि मनीषिभिः। अष्टादशपुराणानि चरितं राघवस्य च। तथा

© Dharmartha Trust J&K. Digitized by eGangotri

क्तं भारतं चैवेति नरसिंहपुराणात्। एवं च पुराणमात्रप्रोक्तधर्मेषु शूद्रादेर्मुख्योऽधिकारः। अन्ये
७३ षामपि स्वोद्देश्यकश्रुतिस्मृत्याद्युक्तकर्मानधिकारप्राप्तौ तदविरोधिन्येव वाऽधिकार इति दि
क्। नरसिंहपुराणे तु मृत्कुशतिलानादाय मन्त्रोयाभ्यां बहिर्देहं प्रक्षाल्य स्नानशाटीं च संशो
73 ध्य ततः शनैर्जले प्रविश्य वरुणं नत्वा हरिं स्मरन् शरवन्निमज्ज्य ततस्तीरे द्रुपदाद्यन्यतम
मंत्रेण त्रिरावर्त्तेनाचम्य वरुणं देवं स्मरन्स्वस्वशाखोक्तपावमानीमंत्रैर्वारुणैश्च कुशाग्रेण
सतोयेनात्मानं प्रोक्ष्येदं विष्णुरिति मंत्रमालभ्य नारायणं स्मरन् जले प्रविश्य निमज्ज्यान्तर्जले
त्रिरघमर्षणं सूक्तं चेति सूक्तत्रयं च त्रिर्जपेदित्युक्तौ तीर्थे स्थित्वा तीर्थान्तरं न संस्मरेन्न च
ब्रूयात्। गंगां तु सर्वत्र संस्मरेत्। गंगातीरे मुण्डनं च तथा कार्यं यथा वायुना केशादिर्न तीर्थे पत
ति विष्णुपादांगुष्ठविनिर्गतजलस्य हि तन्माहात्म्यपन्नकेवलमभिसंधिपूर्वकं स्नानाद्यु ७३

© Dharmartha Trust J&K. Digitized by eGangotri

पभोगेषूपकारकंकिंत्वनभिसंहितमपिअपेतप्राणस्यापिअस्थिचर्मस्नायुकेशाद्युत्सृष्टं
यत्शारीरजंसर्वःशारीरिणंस्वर्गेनयन्तीतिविष्णुपुराणात्।स्वयमपिमृतास्थ्यादिवर्ज्यं।गा
जलेष्वक्षेप्तव्यंतुषकेशपुरीषभस्मास्थिश्लेष्मनखलोमान्यप्सुनक्षिपेदितिशंखोक्तनिषे
धस्तुजलांतरपरइत्यन्ये।मुंडनोपवासौचकाम्यौतीर्थेषुवपनंधन्यमुपवासश्चस्वर्गदः
दानमक्षय्यमुदितंजन्ममृत्युजरापहमितिब्राह्मात्।अतएवबहुषुतीर्थेषुनदनाचारोपि
शिष्टानाउदकेशोणितंदद्यात्पिंडदघादमेध्यवत्नोपतिष्ठतितत्सर्वंयोविनामुंडितुंशि
रइत्यादियदिप्रामाणिकंतदातत्प्राशस्त्यपरंबोध्यं।संवत्सरंद्विमासोनपुनस्तीर्थंव्रजेद्य
दिमुंडनंचोपवासंचततोजलेनकारयेदित्यभियुक्ताःयत्लेनेत्यस्यसत्यांमुंडनादिफलका
मनायामित्यादिःफलंचमुंडनमंत्रेस्पष्टमेवात्रमुंडनेवपनंकारयिष्येइतिसंकल्पःन

© Dharmartha Trust J&K. Digitized by eGangotri

नुकरिष्येइतिवपनस्यनापितकर्तृकत्वात्।गंगांप्राप्यसरिच्छ्रेष्ठांवपनंयोनकारयेदितिवा
७४ कस्यस्वरसाच्चवपाम्यहमितिमंत्रेतमोवितएपर्थोवपतिरितिवह्वृचःवपनंकरिष्येइतिसं
कल्पेपित्र्यंतमोवितएपर्थएवसइत्यन्येकेचित्तुकेशवियोगसंविधानरूपस्यवपनस्यस्व
कर्तृकत्वेबाधकाभावात्।यानिकानिचपापानिब्रह्महत्यासमानिच।केशानाश्रित्यतिष्ठं
74 तितस्मात्केशान्वपाम्यहमितिमंत्रलिंगाच्चद्वितीयएवसंकल्पइत्याहुः।इदंचवपनंकेश
श्मश्र्वादिक्रमेणकार्यंगत्वास्नानंप्रकुर्वीतवपनंतत्तरंवपेत्केशांश्चश्मश्रूणिनखानिचनिकृंतयेदि
तिब्राह्मादित्तिकेचित्।वस्तुतःश्राद्धेश्मश्रुकूर्चयोर्वपनंततःकेशादेरित्युचितंउक्तवचनस्यवप
नमात्रविधायकत्वात्क्रमस्यापिविधानेगौरवाद्वाक्यभेदप्रसंगाद्वा।वैयघ्रोकुर्वतेत्यादिनाके
शप्रथमवपननिंदापूर्वकंश्मश्र्वादिवपनप्रशंसायानैत्तिरीयश्रुतौप्रतीतेश्चश्र्वाधिकंवौधा ७४

© Dharmartha Trust J&K. Digitized by eGangotri

यन्नदर्शपूर्णमाससमंत्रचंद्रिकायां प्रतिपादितं तत एव बोध्यम् । तत्र तीर्थे दक्षिणभागमारभ्य
मुंडने पित्रादिमृतौ तु वामभागमारभ्य वपनप्रकारश्चापरार्के उदङ्मुखः प्राङ्मुखो वा वप
नं कारयेत्सुधीः केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेदिति इदं च कक्षोपस्थशि
खावर्जं प्रायश्चित्तार्थं तु सशिखमपि यतिः शूद्रश्च विधवा सशिखं वपनं चरेत् । तत्र पत्नीनां
ऋत्वन्यकाले तीर्थप्राप्तावपि तदनाचारः आहिताग्नयस्तु पर्वान्यकालेपि तत्र कुर्वंति
सधवानां तु शिरःपृष्ठभागे मूले एव द्व्यंगुलमितकेशानां क्षुरेण छेदनमिति बोध्यं परार्थ
स्नानेऽष्टमांशं दशमांशं वा फलं तत्र कुशप्रतिमा कार्येति एके ग्रंथिबंधनमिति मंत्रलिंगा
त्तन्मात्रे सेति परे इदं च जीवद्विषयकमेव मृतानां तर्पणश्राद्धादिफलभाक्कमेवेति दीक्षि
ताः जीवदजीवत्सर्वविषयमिदमिति गुरुचरणाः स्नानं च प्रवाहाभिमुखो मंत्रं यत्रापः प्र

गो

© Dharmartha Trust J&K. Digitized by eGangotri

वहंति वैस्यावरेषु च सर्वेषु आदित्याभिमुखस्तथेति जावालुक्तेस्तथा कार्यं तत्र मंत्रश्च प्रभास
७५ खंडे। ॐ नमो देवदेवाय शितिकंठाय दंडिने। रुद्राय चापहस्ताय चक्रिणे वेधसे नमः। सरस्वती
च सावित्री वेदमाता गरीयसी। संनिधाना भवत्वत्र सर्वपापप्रणाशिनी। सर्वेषामेव तीर्थानाम
75 यं मंत्र उदाहृतः। इत्युच्चार्य नमस्कृत्वा स्नानं कुर्यात् यथाविधि। अत्रेत्युच्चार्य नमस्कृत्वेत्युक्ते
रयं मंत्रो न स्नाने करणं किंतु प्रार्थनामात्रे स्नानकरणत्वे च मंत्रलिंगबाधः स्यात् यद्वा अयं मं
त्रः। सागरस्वरनिर्घोषं दंडहस्तासुरांतक। जगत्स्रष्टर्जगन्मर्दिन् नमामि त्वां सुरेश्वर ती
क्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम। भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि। इमं मंत्रं समु
च्चार्य तीर्थे स्नानं समाचरेत्। अन्यथा तत्फलस्यार्द्धं तीर्थेशो हरति ध्रुवं। अनयोश्च मंत्रयोः प्रा
र्थनाख्यकार्यैकत्वाद्विकल्पः इत्येतावत्समूलमात्रमनुष्ठेयमित्यलमितिविबोध्यं तदेतत् ७५

ध्वनयन्नेव प्रसंगात्त्वतस्तीर्थयात्राश्राद्धाद्यनुष्ठानक्रमविधिरुच्यते। यात्रामुहूर्त्तेदिना
त्पूर्वदिने एकभक्तं हविष्यभोजनब्रह्मचर्यादयो नियमाः कार्याः। पूर्वं तु संयत इति वचना
त्। तदुत्तरदिने उपवासः। पक्षे मुंडनं च। तदुत्तरदिने स्नानादिशुचितासंपादकं विधाय भ
क्त्या यथाशक्ति गणेशेष्टदेवते पूजयित्वा निमंत्रितब्राह्मणानाहूय स्वागतं पृष्ट्वा एतद्वः पाद्य
मिति पादयोर्जलं दत्वा श्राद्धदेशमुपवेश्य स्ववामभागे भूरसि भूमिरसीति भूमिं स्पृष्ट्वा चं
दनांभसा तत्र त्रंखचक्रादिकं लिखित्वा गंधाक्षतपुष्पाणि दत्वा तदुपरि आसनमासनोप
रि पात्रं पात्रे पवित्रे पवित्रे स्थो वैष्णव्यौ इति शन्नोदेवीति जलं यवोसीति यवान् तिलोसीति
तिलान् गंधादि तूष्णीं क्षिपेत्। आवाहयाम्यहं देवमित्यादिना वरुणमावाह्य गंगे च यमु
ने चैवेति पठित्वा शतंनेति प्रतिष्ठां कृत्वा प्राणायामं विधाय पुंडरीकाक्षं संस्मृत्य देवताभ्यः

© Dharmartha Trust J&K. Digitized by eGangotri

पितृभ्यश्चेतित्रिर्जपः।सप्तव्याधोऽइतिपठित्वा।यद्देवेत्यादिऋषिभिःकुशैःकर्मपात्रजलमभिमं
७६ त्र्या।अपसव्येनप्रतिज्ञा।अद्येहेत्यादिदेशकालकीर्त्तनांतेअमुकगोत्राणांअस्मत्पितृपितामहप्रपि
तामहानाअमुकामुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांतथाऽमुकगोत्राणांअस्मन्मा
76 तामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणामि
दमासनमस्तुभूर्भुवःस्वरिदमासनमास्यतां०आसे।ततउपवीतीविश्वेदेवाइहागच्छतइत्या
वाह्यप्राचीनावीतीपितरइहागच्छतइतिपितृनावाह्य।तथैवपितरइहागच्छतइतिमातामहा
दीनामपिआवाह्यततःसव्येनवैश्वदेविकब्राह्मणंगंधादिनासमभ्यर्च्यप्राचीनावीतिपितृमाता
महादिब्राह्मणेष्वपिसमभ्यर्चयेत्।ततोभस्मरेखांविधायतत्रपत्रावलीःसंस्थाप्यतत्रोपवीती
घृतमन्नादिसहितंपरिविष्यपृथ्वीतेपात्रमितिपितृपात्रमालभ्य।अद्येहेत्यादिअमुकगोत्रा ७६

© Dharmartha Trust J&K. Digitized by eGangotri

स्मत्पित्रादित्रयश्राद्धसंबंधिनस्तथामुकगोत्रास्मन्मातामहादित्रयश्राद्धसंबंधिनो विश्वेदेवाः
इदं घृतं अन्नाद्युपस्कर सहितमात्तैर्व्राह्मणस्य वः स्वाहा। ततोऽपसव्येन अर्घ्ये स्यादि अमुक
गोत्रास्मत्पितः अमुकशर्मन् सपत्नीक वसुस्वरूप अस्मिन् श्राद्धे इदमन्नोदकादियद्दत्तं तदक्ष
य्यमस्तु अस्त्वक्षय्यं। एवमेवपितामहादिपंचभ्योदत्वा सव्येन अघोराः पितरः सन्तु। सन्तु। गोत्र
न्नो वर्द्धतां दातारो नोभिवर्द्धतां। वेदाः वर्द्धतां। संततिर्वर्द्धतां। श्रद्धा च नो मागात्। वहुदेयं च नोस्त्व
अतिथींश्च लभेमहि याचितारश्च नः संतु॰ मास्मयाचिष्म कंचन इत्याशिषः प्रतिगृह्य तिलकं कुर्या
त्। ततो दक्षिणां दद्यात्। दियद्रव्यं संप्रोक्ष्य संपूज्यः अमुकगोत्रास्मत्पित्रादित्रयश्राद्धसंबंधिनां
तथा अमुकगोत्रास्मन्मातामहादिश्राद्धसंबंधिनां विश्वेषां देवानां च कृतैतद्यात्रानिमित्तकघृ
तश्राद्धसांगतासिध्यर्थं इमां दक्षिणां ब्राह्मणाय ददानु महमुत्सृजे तथा अमुकगोत्राणां अ

© Dharmartha Trust J&K. Digitized by eGangotri

स्मत्पितृपितामहप्रपितामहानां अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपा
७७ णां तथा अमुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां अमुकशर्मणां सप
त्नीकानां वसुरुद्रादित्यस्वरूपाणां कृतैतद्यात्रानिमित्तकघृतश्राद्धसांगतासिध्यर्थमिमां द
क्षिणां ब्राह्मणाय दातुमहमुत्सृजे इति संकल्प्य ब्राह्मणेभ्यो दद्यात्। ततो देवताभ्य इति त्रिर्जपि
77 त्वा एतत् श्राद्धं यत्कृतं तत् सुकृतमस्तु इति प्रार्थ्य विप्रान् विसर्जयेत्। इति घृतश्राद्धं विधा
य ततोन्यान्ब्राह्मणान्यथाशक्ति वस्त्रालंकारहिरण्यादिभिः संपूज्य तेषामाज्ञां गृहीत्वा लग्नदा
ने कृत्वा पात्रासंकल्पं विधाय काषायपरिधानादिरूपं कार्पटिकवेषं धृत्वा सुमुहूर्त्तवेलायां
ग्रामान्निर्गत्य स्ववासग्रामं प्रदक्षिणीकृत्य क्रोशाभ्यंतरस्थग्रामांतरे गत्वा श्राद्धशेषेण घृतेन
पारणं कुर्यात्। रात्रौ पात्रालग्ने सति तद्दिनरात्रोपवासं कृत्वा लग्नसमये फलयज्ञोपवीत ७७

© Dharmartha Trust J&K. Digitized by eGangotri

वस्त्रादिरूपं प्रस्थानं कंचित्स्थापयित्वा प्रातः श्राद्धादि विधाय गृहान्निर्गत्य तत्र स्थानं गृ
हीत्वा ग्रामांतरे गत्वा पारणं कुर्यात्। उपवासासमर्थस्तु नक्तं हविष्यान्नमित्यादि शक्त्यनुसा
रेण भुंजीत। ततस्तदुत्तरदिनादारभ्य नियमवान् गच्छेत्। नियमाश्च कामं क्रोधं पंच लोभं च यो
जित्वा तीर्थमाविशेत्। न तेन किंचिदप्राप्यं तीर्थाभिगमनाद्भवेत्। यस्य हस्तौ च पादौ च मनश्चै
व सुसंयतं विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते। प्रतिग्रहादुपावृत्तः संतुष्टो येन केनचि
त्। अहंकारविमुक्तश्च स तीर्थफलमश्नुते। अविकल्पो निरारंभो लघ्वाहारो जितेंद्रियः। वि
मुक्तः सर्वसंगैर्यः स तीर्थफलमश्नुते। अक्रोधनश्च राजेंद्र सत्यशीलो दृढव्रतः। आत्मोप
मश्च भूतेषु स तीर्थफलमश्नुते। ब्रह्मपुराणे। सर्वेण गांगेन जलेन सम्यङ्मृत्स्नाचलैश्चाप्युतो योऽप्रपथ्य
भावदुष्टः। आजन्मनः स्नानपरोपि नित्यं न शुध्यतीत्येव वयं वदामः। अन्यत्रापि। मंत्रे तीर्थे

द्विजे देवे दैवज्ञे भेषजे गुरौ। यादृशी भावना यस्य सिद्धिर्भवति तादृशी। संप्रस्थितस्तीर्थया
७८ त्रां ब्राह्मणं नवमन्यते। नासौ प्रतिनिवर्त्तेत तदंतं यस्य जीवितं। तीर्थं गच्छन्नरेत्संध्यास्तिस्र
एकत्र मानवः॥ नास्नातो नाशुचिर्गच्छेन्न भुक्त्वान्नं च सूतकी। यात्रामध्ये त्वाशौचे रजसि वास
मुत्पन्ने शुद्धिपर्यंतं तिष्ठेत् तदंते गच्छेत्। मार्गवैषम्ये त्वदोषः। मध्ये तीर्थांतरप्राप्तौ तत्रापि स्ना
78 न तर्पण श्राद्धाद्यवश्यं कार्यं। मुंडनोपवासेन् द्वेश्यपत्ती थीएव वा। एवं नियमयुक्तो गत्वा तीर्थप्रा
प्तिदिने यदि यानारूढः सोपानत्को व्रजेत्तदा यावान्मार्गः पादचरणेन गंतुं शक्यस्तावत्तिमा
र्गं यानोपानदादि परित्यज्य पादचारेण गत्वा तीर्थं दृष्ट्वा यथावत्तीर्थे साष्टांगं प्रणम्य तीर्थं गच्छे
त्। अष्टांगप्रणाममस्तकपद्भ्यां कराभ्यां जानुभ्यां शरसा चोरसा तथा। मनसा वचसा चैव प्रणा
मोऽष्टांग उच्यते॥ ततस्तीर्थं प्राप्ते पुष्पाक्षतफलादिपुत्कमंजलिं बद्ध्वा मुकतीर्थाय नमः इति द ७८

© Dharmartha Trust J&K. Digitized by eGangotri

घात् यथाशक्तिफलवस्त्रहिरण्यादिचोपढौकनिकं स्थापयेत्। ततः प्रणवेन तीर्थमालभ्य
सचैलं स्नायात्। ततउपवाससंकल्पं कुर्यात् ततो मुंडनं तच्च प्राङ्मुखउदङ्मुखो वा कुर्या
त्। श्मश्रुकेशान् खक्रमेणउदकसंस्थं कुर्यात्। मंत्रः। यानि कानि च पापानि ब्रह्महत्यास
मानि च। केशानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहं। इदं च वपनं तीरे तथा कार्यं यथा वा
युना प्रेरितानि केशादीनि तीर्थजले पतंति। तीर्थमुंडनं निषिद्धकालेपि जीवत्पितृकेणापि
कार्यं। इदं च मुंडनं दशमासानंतरं पुनस्तीर्थप्राप्तौ अवश्यं कार्यं। अर्वाक्तु इच्छया भवति। संव
त्सरे द्विमासोने पुनस्तीर्थं व्रजेद्यदि। मुंडनं चोपवासं च ततो यत्नेन कारयेदिति वचनात्। त
तो मुंडननिमित्तं स्नानं कृत्वा तीर्थमंत्रस्नाने समाचरेत्। ॐ नमो देवाधिदेवाय शितिकंठाय
दंडिने। रुद्राय चापहस्ताय चक्रिणे वेधसे नमः सरस्वती च सावित्री वेदमाता गरीयसी। स

© Dharmartha Trust J&K. Digitized by eGangotri

न्निधानी भव त्वं च सर्वपापप्रणाशिनी ॥ सागरस्वननिर्घोष दंडहस्तासुरांतक । जगत्स्रष्टर्जे
७९ गन्मर्दिन् नमामि त्वां सुरेश्वर । तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम । भैरवाय नमस्तुभ्यम
79 नुज्ञां दातुमर्हसि । इमं मंत्रं समुच्चार्य तीर्थस्नानं समाचरेत् । अन्यथा न तत्फलं स्यादिति तीर्थेशो ह
रति ध्रुवं । ततस्तीर्थमवगाह्य स्वशाखोक्तविधिना स्नायात् । इदं च स्नानं यत्र विपरीतप्रवाह
दि तत्र न कार्यं । तदुक्तं । प्रत्यावृत्तोदके स्नानं वर्ज्यं नद्यां द्विजातिभिः । तथा रजकतीर्थं तु दश
हस्तेन वर्जयेत् । अग्रासास्त्वास्वापो नद्याः प्रथमवेगजाः । प्रक्षोभिताश्च केनापि तथा तीर्थाद्वि
निर्गताः । एतस्य गंगायामपवादः । प्रतिश्रोतो रजो योगो रथ्याजलनिवेशनं । गंगायां न प्रदु
ष्यंति सा हि धर्मद्रवः स्वयं । निषिद्धवांतरमपि । शाल्मलीतिंतिणीनिंबकरंजाश्च हरीतकी । को
विदारकपित्थार्कबदर्यैरंडशिग्रवः । शेलुश्च खदिरश्चैषां स्नानं छायासु वर्जयेत् । इति प ७९

© Dharmartha Trust J&K. Digitized by eGangotri

राघ्येस्नाने विशेषः मातरं पितरं जायां भ्रातरं सुहृदं गुरुं। यमुद्दिश्य निमज्जेत अष्टमोंशो ल
भेत सः। मातापित्रर्थं कुर्वंश्चतुर्थांशं। परस्परार्थं दंपत्ती अर्द्धं लभेते। अथवा प्रतिकृतिं कुश
मयीं तीर्थवारिणि मज्जयेत्। मज्जयेच्च यमुद्दिश्य सोर्धभागं फलं लभेत्। मंत्रः। कुशोसि कु
शपुत्रोसि ब्रह्मणा निर्मितः स्वयं। त्वयि स्नाते स च स्नातो यस्येदं ग्रंथिबंधनं। एवं स्नाने वि
धाय तर्पणं कुर्यात्। तच्च स्वशाखानुसारेण देवर्षितर्पणं कृत्वा पितृणामपि कार्यं तत्र क्र
मः। आदौ पिता ततो माता सपत्नजननी तथा। मातामहाः सपत्नीका आत्मपत्न्यस्ततः प
रं। सुतभ्रातृपितृव्याश्च मातुलाश्च सपत्निकाः। दुहिता च स्वसा प्रोक्ता दौहित्रो भागिनेय
कः। पितृष्वसा मातृष्वसा श्वशुरो गुरुशिष्यकौ। एते सुः पितरस्तीर्थे तर्पणे च महालये।
एवं तर्पणं विधाय एकं तिलांजलिं सर्वेभ्यो दद्यात्। तत्र मंत्राः। देवासुरास्तथा नागा यक्षा

© Dharmartha Trust J&K. Digitized by eGangotri

गंधर्वराक्षसाः। पिशाचागुह्यकाः सिद्धाः कूष्मांडास्तरवः खगाः। जलेचरा भूमिचरा वाय्वा
धाराश्च जंतवः। तृप्तिमेते नयांत्वाशु मद्दत्तेनांबुनाखिलाः। नरकेषु समस्तेषु यातनासु च
ये स्थिताः। तेषामाप्यायनायैतद्दीयते सलिलं मया। ये वांधवा वांधवा वा येन्यजन्मनि वां
धवाः। ते तृप्तिमखिला यांतु ये चास्मत्तोभिकांक्षिणः। यत्र क्वचन संस्थानां क्षुत्तृष्णोपह
तात्मनां। इदमक्षय्यमेवास्तु मया दत्तं तिलोदकं। आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः।
तृप्यंतु पितरः सर्वे मातृमातामहादयः। अतीतकुलकोटीनां सप्तद्वीपनिवासिनां। आब्र
ह्मभुवनाल्लोकादिदमस्तु तिलोदकं। तीर्थे निषिद्धदिनेपि तिलतर्पणं कार्यं तीर्थे तिथिवि
शेषे च गयायां प्रेतपक्षके। निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितमिति वचनात्। पुत्रपौ
त्राभावे विधवयापि तीर्थे तर्पणं कार्यं॥ अथ श्राद्धं॥ तच्च निषिद्धपदार्थवर्जं सर्वं पार्वणध

© Dharmartha Trust J&K. Digitized by eGangotri

र्मेणभवति। निषिद्धानि च। अर्घ्यमावाहनं चैव वृद्धिजं गुष्ठनिवेशनं। तृप्तिप्रश्नं च विकिरं
तीर्थश्राद्धे विवर्जयेत्। नावाहने न दिग्बंधनं न दोषो दृष्टिसंभवः। सकारुण्यं च कर्त्तव्यं श्रा
द्धं तीर्थे विचक्षणैः। अग्नौकरणमपि तीर्थश्राद्धे नेति स्मृतिरत्नावल्यां। न चात्र श्वपेनग
ध्रादीन् पक्षिणः प्रतिषेधयेत्। तद्रूपाः पितरस्तत्र समायांतीति वैदिकं। विश्वेदेवाश्चात्र धु
रिलोचनसंज्ञको। अर्घ्यं चावाहनादिनिषेधः तीर्थनिमित्तकश्राद्ध एव न तु तदधिकरण
कदर्शादिश्राद्धेपि। इदं च स्नानतर्पणश्राद्धादिकं सर्वमविलंबेन कार्यं। श्राद्धं चात्र आमा
न्नेन भवति। तत्र तृप्तिप्रश्नो गुष्ठावनामनं यथासुखं जुषध्वं अपोशानं च न भवति। पिंड
दाने तु सक्तुभिः पिंडदानं च सायावैः पायसेन वा। कर्त्तव्यमृषिभिः प्रोक्तं पिण्याकेन गुडे
न वा। संयावो गोधूमविकारः पिण्याकस्तिलकल्कः। पिंडप्रमाणं तु कपित्थविल्वमा

© Dharmartha Trust J&K. Digitized by eGangotri

त्रान्वापिंडान्दद्याद्विधानतः।कुकुटांडप्रमाणान्वाकेषांचामलकैःसमान्वावदरेणसमा
८१ न्वापिदद्याच्छ्रद्धासमन्वितः।यदातुसंपूर्णश्राद्धकरणेऽसमर्थस्तदापिंडदानमात्रंकुर्या
त्।तत्रक्रमः।आसनंपिंडदानंचपुनःप्रत्यवनेजनं।दक्षिणाचान्नसंकल्पस्तीर्थश्राद्धेष्व
यंविधिरिति।तत्रक्रमः।कर्मपात्रपूरणप्राणायामपुंडरीकाक्षस्मरणदेवताभ्यइतित्रि
81 र्जपनीवीवंधनानिकृत्वाप्रधानसंकल्पः ॐअद्येहेत्यादिदेशकालकीर्त्तनांतेअमुकगो
त्राणांअस्मत्पितृपितामहप्रपितामहानांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणांतथा
अमुकगोत्राणांअस्मन्मातामहप्रमातामहवृद्धप्रमातामहानांअमुकामुकशर्मणां
सपत्नीकानांवसुरुद्रादित्यस्वरूपाणांअमुकतीर्थप्राप्तिनिमित्तकंपिंडदानरूपंश्राद्ध
महंकरिष्येइतिसंकल्प्यअमुकगोत्रास्मत्पितुरमुकशर्मणःसपत्नीस्यवसुस्वरू ८१

© Dharmartha Trust J&K. Digitized by eGangotri

पस्येदं पिंडासनमस्तु। एवमेव पितामहादीनां दत्वा। ॐ अमुकगोत्रास्मत्पितरमुकशर्म
न्नवनेनिक्ष्वेति प्रत्येकमवनेजनं दत्वा। ॐ अमुकगोत्रास्मत्पितरमुकशर्मन्नेष पिंडस्ते
स्वधेति प्रत्येकं पिंडं दत्वा पुनः अमुकगोत्रास्मत्पितरमुकशर्मन्नत्रावनेनिक्ष्वेति प्रत्येकं
प्रत्यवनेजनं दत्वा पिंडान् पुष्पधूपदीपनैवेद्यद्रव्यैः संपूज्य दक्षिणां दद्यात्। अमुकगोत्रा
णां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां तथा
मुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्मणां सपत्नी
कानां वसुरुद्रादित्यस्वरूपाणां कृतैतत्तीर्थश्राद्धसांगतासिध्यर्थं इमां दक्षिणां ब्राह्मणेभ्यो दा
तुमहमुत्सृजे अमुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकशर्मणां स
पत्नीकानां तथा अमुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां अमुका

© Dharmartha Trust J&K. Digitized by eGangotri

मुकशर्मणःप्रीतयेइदंमेमामान्नंसोपस्करंब्राह्मणेभ्योदातुमहमुत्सृजेदेवताभ्यइतित्रिर्ज

८२ पित्वाइदंतीर्थश्राद्धंयत्कृतंतत्सुकृतमस्तुयद्विध्यादिहीनंतद्ब्राह्मणवचनात्पितॄणांप्र

सादात्सर्वंपरिपूर्णमस्त्वितिवदेत्।अत्रपित्रादिपिंडदानानंतरंसामान्यपिंडोदयः।तत्र

मंत्रः।पितृवंशेमृतायेचमातृवंशेचयेमृताः।गुरुश्वशुरबंधूनांयेचान्येबांधवामृताः।ये

82 मेकुलेलुप्तपिंडाःपुत्रदारविवर्जिताः।क्रियालोपगताश्चैवजात्यंधाःपंगवस्तथा।विरूपा

आमगर्भाश्चज्ञाताज्ञाताकुलेमम।तेषांपिंडोमयादत्तोह्यक्षय्यमुपतिष्ठतामिति।तथाऽ

न्यदपिपिंडांतरंदद्यात्।मंत्रः।आब्रह्मणोयेपितृवंशजातामातुस्तथावंशभवामदीयाः।कु

लद्वयेयेममदासभृताभृत्यास्तथैवाश्रितसेवकाश्च।मित्राणिसख्यःपशवश्चवृक्षाःस्पृ

ष्टाश्चदृष्टाश्चकृतोपकाराः।जन्मांतरेयेममसंगताश्चतेभ्यःस्वधापिंडमहंददामीति।

© Dharmartha Trust J&K. Digitized by eGangotri

तीर्थश्राद्धे पिंडप्रतिपत्तिस्तीर्थजले एव द्रष्टव्यं तीर्थनिमित्तकश्राद्धं दशमासोत्तरे पुनस्ती
र्थप्राप्त्यभावावश्यकं अन्तरा तु फलेच्छया अत्र जीवत्पितृकस्याप्यधिकारः। तेन रुच येभ्य
एव पितृभ्यः पिता ददाति तेभ्य एव देयं यदा च अविभक्ता भ्रातरः सहैव गच्छन्ति तदा श्राद्धं
ज्येष्ठेनैव कार्यं। विभक्तैस्तु पृथक्। पित्रा सह गतेन पुत्रेण न कार्यं। विधवा तु यदा सपु
त्रा पुत्रेण विना तीर्थं गच्छति तदा ब्राह्मणद्वारा श्राद्धं कारयेत्। अपुत्रा तु स्वयमेव। तीर्थे
पितृव्यादीनामप्येकोद्दिष्टानि तर्पणं क्रमेण कार्याणि॥ न तीर्थे प्रतिग्रहः कार्यः। स्वल्पेनैकं
गतैरपि। अपि कामातुरो जन्तुरेकोऽरक्षन्तिमान्तरं। तीर्थे प्रतिग्रहो यस्तु तीर्थविक्रय एव
सः। विक्रीतायां तु गंगायां विक्रीतः स्याज्जनार्द्दनः। जनार्द्दने तु विक्रीते विक्रीतं भुवनत्रयं।
तीर्थपरिमाणं तु प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयं। तत्र नारायणः स्वामी नान्यः स्वा

© Dharmartha Trust J&K. Digitized by eGangotri

मीकथंचन। नतत्रप्रतिगृह्णीयात्प्राणैः कंठगतैरपि। तेन पुष्करादौ तडागवाप्यादिरूपेती
८३ र्थे च सर्वत्रैव जलमवधीकृत्य हस्तचतुष्टयाभ्यंतरे निषेधः। भाद्रशुक्लचतुर्दश्यां यावदा
क्रमते जलं। तावद्गर्भं विजानीयात्तदूर्ध्वं तीरमुच्यते। सार्द्धहस्तशतयावद्गर्भंतस्तीरमु
च्यते। अत्र गर्भे प्रतिग्रहनिषेधः प्रसिद्धनदीषु। प्रसिद्धेतरगंडक्यादिषु तु उभयतः सार्द्ध
83 हस्तशतमिते तीरे निषेध इति शिष्टाः। क्षेत्रे निषेधस्तु गंगाविषयः। एवं तीर्थकृत्यं विधा
य पुनस्तथैव गृहमागत्य तत्रापि गणेशं देवांश्च संपूज्य पूर्ववद्दधिश्राद्धं विधाय ब्राह्मणे
भ्यो गोभूहिरण्यादि दत्वा तीर्थयात्रां संपूर्णां वाचयेदिति। इति तीर्थयात्राविधिः॥ अ
थ प्रसंगाद्धेमाद्रिप्रोक्तो गोनामीविषयको महासंकल्प उच्यते॥ स्वस्ति श्रीमत्समस्तज
गदुत्पत्तिस्थितिलयकारणस्य रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्याच्युतानं ८३

© Dharmartha Trust J&K. Digitized by eGangotri

तवीर्यस्यश्रीमद्भगवतोमहापुरुषस्यश्रीमदादिनारायणस्याचिंत्यापरिमितशक्त्या
ध्रियमाणस्यमहज्जलौघस्यमध्येपरिभ्रममाणानामनेककोटिब्रह्मांडानामेकतमेव्यक्ते
महदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृतेऽस्मिन्महतिब्रह्मांडखंडयोर्मध्येआ
धारशक्तिकूर्मानंताद्यष्टदिग्गजोपरिप्रतिष्ठितस्यातलवितलसुतलनितलरसातल
तलातलमहातलसप्तपाताललोकस्योपरितलेभूर्लोकभुवर्लोकस्वर्लोकमहर्लोकज
नलोकतपोलोकसत्यलोकस्याधोभागेचक्रवालशैलमहामलयसह्यमध्यवर्तिन्योमहा
कालायमानमहाफणिराजराजस्यशेषस्यसहस्रफणामंडलमंडितेऐरावतपुंडरीकवा
मनकुमुदांजनपुष्पदंतसार्वभौमसुप्रतीकाख्याष्टदिग्दंतिशुंडादंडोत्तंभितेअमराव
त्यंभोगवतीनयनवतीशुद्धवतीगंधवतीकांचीवतीअलकावतीयशोवतीनामपुण्य

© Dharmartha Trust J&K. Digitized by eGangotri

पुरीप्रतिष्ठितेइन्द्राग्नियमनैरृतिवरुणवायव्यकुवेरेशानादिदिक्प्रतिष्ठितेलोकालो
८४ काचलवलयितेलवणेक्षुसुरासर्पिर्दधिक्षीरशुद्धोदकादिसप्तार्णवपरिवृतेजंबूप्लक्ष
शाल्मलीकुशक्रौंचशाकपुष्कराख्यसप्तद्वीपांतरद्वीपेमहेंद्रमलयसह्यशुक्तिहिमवत्विं
ध्याद्रिपारिजाताख्याष्टकुलपर्वतविराजितेमतंगहिरण्यशृंगमाल्यवंतकिष्किंधऋष्य
84 शृंगादिपंचमहानगसहितेहेमशैलहेमकूटसुधाचलश्वेताचलशृंगवंताख्यमहाशै
लप्रतिष्ठितेइंद्रखंडकेसरखंडताम्रखंडगभस्तिखंडनागखंडसौम्यखंडगंधर्वखंड
चारणखंडभरतखंडाख्यनवखंडात्मकेमहामानसरोवराकारपंचाशत्कोटियोजन
विस्तीर्णभूमंडलविस्तृतेभारतकिंपुरुषहरिवर्षेलावर्त्तकुरुभद्राश्वमकरमणरहि
रण्मयकेतुमालाख्यनववर्षाणांमध्येचंद्रप्रस्थचंद्रशुक्तावर्त्तकरमणमदहारणकल ८४

© Dharmartha Trust J&K. Digitized by eGangotri

हारण्येपांचजन्येसिंहलेलंकेत्रिनवखंडखंडितेप्रजापतिक्षेत्रेदंडकारण्येविंध्यारण्ये
इक्ष्वाकारण्येबदरिकारण्येनैमिषारण्येचंपकारण्येनक्षुशारण्येगुहारण्येद्वैतारण्ये
देवदारुकारण्येपतिदशारण्येपुनेस्वाम्यवंतिकुरुक्षेत्रेगंगाकावेरीयमुनासरस्वत्यादि
महानदीपुण्यतीर्थविलसितेअयोध्यादिमहामुक्तिस्थलेसगरनगवच्छनगकश्यपन
गस्वामिनगमहामानससरोवरामरावतीसेतुलोहिकाद्रिचकोरश्रीशैलकैलासानामु
परिसमभूमध्यरेखायाः पूर्वदिग्भागेश्रीशैलस्यपश्चिमदिग्भागेकृष्णागोदावर्योरन्त
रेदेशेस्वगृहेशालग्रामविश्वेश्वरादिसकलदेवतासन्निधौअस्यश्रीमज्जलनिधिमध्य
मध्यासितभुजंगभोगपर्यासितपरिजनाम्बवनाभिसरोवराधिवसुदेवत्तिर्यङ्मनुष्या
दिसकलजगत्स्रष्टुःपरार्द्धद्वयजीवितस्यआदिब्रह्मणःप्रथमपरार्द्धेपंचशतातीते

© Dharmartha Trust J&K. Digitized by eGangotri

वर्षेप्रथमेमासेप्रथमेपक्षेप्रथमेदिवसेअह्निद्वितीययामेतृतीयमुहूर्त्तेप्रथमप्रयाण
८५ कालेपार्थिवकल्पकूर्मकल्पअनंतकल्पब्रह्मकल्पश्वेतवाराहकल्पप्रलयकल्पइति
सप्तकल्पानांमध्येसप्तमेवैवस्वतमन्वन्तरेसप्तविंशन्महायुगानिगतानियुगानांत्रिषु
पातेषुयुगानामष्टाविंशतितमेमहायुगेषस्मवत्तिषुसहस्रांतलक्षांत्रेतायुगेचतुःषष्टि २
सहस्रांतलक्षाद्वेवर्त्तमानेव्यावहारिकेआदिश्रीमहाविष्णुमत्स्यादिदशावतारेषुतन्म
85 ध्येबौद्धावतारेयुधिष्ठिरविक्रमशालिवाहनविजयाभिनंदननागार्जुनकल्कीतिषट्
कलौयुगेवर्त्तमानेएवंगुणविशेषणविशिष्टायांपुण्यतिथौममानेकजन्मस्विहजन्मे
न्येतत्क्षणपर्यंतंबाल्ययौवनवार्द्धकेषुरहसिप्रकाशेचकामाकामकृताभ्यस्तोपपु
त्तिकमनोवाक्कायकर्मकृतब्राह्मणहननमद्यपानसुवर्णस्तेयविक्रयेंधनार्थद्रुमछे ८५

© Dharmartha Trust J&K. Digitized by eGangotri

द्रस्त्रियोषधजीवहिंसामंत्राभिधानभ्रूणहत्यासंकलीकरणमलिनीकरणअपात्री
करणजातिभ्रंशप्रकीर्णकगोब्राह्मणवृत्तिछेदनविवाहकंटकधैर्यकंटकपशुवध
द्विजपत्नीविधवास्त्रीशूद्रागमनाद्युपपातकागम्यागमनाभक्ष्यभक्षणअभोज्यभो
जनापेयपानअलेह्यालेहनाचोष्याचोषणअवाच्यवाचनअस्पृश्यस्पृष्टिपरकर्मोच्छा
दनदेवब्राह्मणवृत्तिछेदनविघ्नादिगर्वपंक्तिभेदकौटसाक्ष्यमित्रवादब्राह्मणद्रव्या
पहरणनिषिद्धान्नपतितान्नगणिकान्नकृष्णान्नसूतकान्नराजान्नभार्याविसर्जनमा
तापितृतिरस्कारआत्मस्तुतिगुरुनिंदाब्राह्मणनिंदापरनिंदाब्राह्मणद्वेषत्रिरात्रसं
भाषणकृतकर्मान्नतलुब्धचौरपाखंडचितास्थिचांडालस्पर्शवास्थिस्पर्शकुग्रामवा
सकुभोजनकूपशौचवाङ्निष्ठुरदुर्मैथुनदुर्भांडदुःप्रतिग्रहअसाक्षितोवूलादि

© Dharmartha Trust J&K. Digitized by eGangotri

भक्षणखट्वाशायखट्वारोहाद्रक्षेणाऽहसंगमस्वयेंद्रियनयनेंद्रियादिग्रहकरण
८६ स्पर्शहेष्वालापस्वग्रामश्रोत्रियवर्ज्येब्राह्मणवंदनरहिताशीगोविक्रयहयविक्रयर
सद्रव्यादिविक्रयशूद्रप्रेषणहीनयोनिचारणसेवितदेवतार्थतैलद्रव्यापहरण
स्नानविरहश्रौपासनविरहश्रौपासनविरहस्पर्शनादिपापानामन्येषांचासंख्याताना
86 ज्ञाताज्ञातानांनिर्हरणार्थंसिंहाराशिस्थितेजीवेपर्वनिमित्तंश्रीशिवप्रीत्यर्थंदेवब्राह्मण
संनिधौचतुर्विधप्रायश्चित्तमहंकरिष्ये।पारुष्यमनृतंचैवपैशून्यंचापिसर्वशः।असंबद्ध
प्रलापश्चवाङ्मयंस्याच्चतुर्विधंपरद्रव्येष्वभिध्यानंमनसानिष्टचिंतनं।वितथाभिनिवे
शश्चमानसंत्रिविधंस्मृतम्।आत्मनःशुद्धिकामोवापितॄणांतृप्तिहेतवे।वपनंकारय।
प्रयागेतीरेहंतवगौतमि।यानिकानिचपापानिब्रह्महत्यासमानिचकेशानाश्रित्यतिष्ठं ८६

© Dharmartha Trust J&K. Digitized by eGangotri

तितस्मात्केशानूवपाम्यहं।षष्टिवर्षेति॥५॥तिस्रः।६॥सिंहेगुरौगोतमिदेविमध्येब्रह्मांड
भांडेनविहासपुण्यमाप्नुवंतरिक्षेदिविनागलोकेसर्वाणितीर्थानितवोदरेस्युः।इतिश्री
हेमाद्रिमदृकृतमहाप्रयोगः।परेतुप्राणानायम्यकुर्वीतसर्वकर्माणिसंयतइतिवृहन्म
नुः।देवार्चनादिकर्माणितथागुर्वभिवादनंकुर्वीतसम्यगाचम्यप्रयतोपिसदाद्विजः।संकल्प्य
विधिवत्कुर्यात्स्नानदानव्रतादिकमितिमार्कंडेयः।मासपक्षतिथीनांचनिमित्तानांचसर्व
शः।उल्लेखनमकुर्वाणोनतस्यफलभाग्भवेत्।इतिदेवलः।अत्रमासादयःप्रयोगाधिक
रणीभूताःसर्वेपिएतेनानेकदिनसाध्यकर्माणिआद्यदिनेसंकल्पकालीनांतिथिमृधिक
रणत्वेनोल्लिखेद्यज्योतिष्टोमेनाहंपक्ष्येइत्यादिसंकल्पवाक्यकरणेयायजूकानामपास्तपदा
नामनन्वयात्तूयनुतत्तद्रूपेणप्रयोगांगतयाविहितानामेवमासादीनामुल्लेखइतितन्त्रेमा

© Dharmartha Trust J&K. Digitized by eGangotri

नाभावात् अविहितमासादिके आधानादौ मासपक्षतिथीनां ज्योतिष्टोमे एकादशीव्र
८७ तादौ च मासपक्षयोरनुल्लेखप्रसंगाच्चातो ज्योतिष्टोमादावेकादश्यादिपूर्णिमांतानामुल्ले
ख एवमन्यत्राप्यत्र तत्त्वमन्यत्तो बोध्यम् अनुसर्वश इति पदाद्यघन्निमित्तीकृत्य पुरुषः स्ना
नदानादौ प्रवर्त्तेते तेषां सर्वेषां काश्यादितीर्थसूर्योपरागादिदेशकालानां फलानां च नि
87 मित्तानां संग्रहः। देशकालादिसंकीर्त्य तुभ्यं संप्रददे त्वहं इति फलं समभिसंधाय प्रदद्या
त् श्रद्धयान्वित इति च स्मृत्यंतरवसिष्ठोक्तिभ्यामेकवाक्यत्वात् तथा च व्यापकानां व्याप्यानां
वा येषामार्यावर्त्तकाश्यंपतगृहादिदेशानां कार्त्तिकपौर्णमास्यादीनां कालानां च सामान्यतो विशे
षा षतश्च वाक्यांतरैर्भिन्नफलसंबंधः श्रुतस्तेषां सर्वेषामुल्लेखः कार्यः अत एव प्रभवादौ तिलादि
दानोक्तेस्तेषामपि निर्देशः मासादीनां तु निमित्तत्वभावेऽप्युल्लेखः अन्यथा वैयर्थ्यात् तथा च ते ८७

© Dharmartha Trust J&K. Digitized by eGangotri

षामुल्लेखेनैव फलं नान्यथा अत एव शाबरभाष्यमुद्दिश्य न हि तादर्थ्यं विविच्यत इति तेन या
मल्पिकादेरुल्लेखापत्तिर्मूर्खोक्ता निरस्ता संकल्पादौ चोमिति निर्दिशेत् । ओं तत्सदिति निर्दे
शो ब्रह्मणस्त्रिविधः स्मृतः ॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्त्तन्ते विधानोक्ताः
सततं ब्रह्मवादिनामिति गीतोक्तेर्न ममेति स्वसत्तायानिवृत्तिमपि कीर्त्तयेत् । नाम गोत्रे समुच्चा
र्य संप्रदानस्य चात्मनः । द्रव्यस्य नाम गृह्णीयाद्ददामीति तथा वदेत् । ततस्तत्कीर्त्तयेत्सार्द्धं द्र
व्येण द्रव्यदैवतमित्युक्तेस्तथा चेत्यादिवचनपर्यालोचनपाऽयं प्रयोगो निष्पन्नः । तथा हि । ओं तत्
सदमुकमासेऽमुकपक्षेऽमुकतिथौ काश्यादितीर्थे सूर्योपरागादिकालेऽमुकसगोत्रोऽमुक
शर्माऽमुकफलप्राप्तिकाम इदं द्रव्यममुकदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्य
महं संप्रददे न मम । एवं कालनिर्देशानन्तरं स्वास्येत्यादिपरिभाषाप्रश्ने आपस्तंबोपि कृत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

दौ क्रतुकामं कामयेतेति क्रतोरादिरारंभः कार्मः फलं क्रतुना सह साधुपद युक्ते न लौकिके
८८ न वाक्येन संकल्पयेदित्यर्थः स च संकल्पः प्राणायामपूर्वकः क्रतुसंकल्पश्च वैदिकैरेव लिं
८८ गैर्विज्ञायते योपक्ष्ये इत्युक्त्वा न यजते अकृत्वा हि पुरुषो यजेयेति कामग्रहणं चोपलक्षणं नित्ये
पि संकल्पः स स्मृतवाक्येन कार्य एवं तथा च दक्षपतेयः सन्ध्याया गुरस्तेयदि सन्ध्याया गत्र्येन यज
त इति व्याख्यातं तस्मात्श्रौतेषु स्मार्तेषु च प्रयोगारंभात्प्राणायामपूर्वकं संकल्पः कार्य इति सिद्धं
तत्र सर्वत्र प्रधानकालिकी तिथिः स्मृतेरव्या संकल्पकालिकी वेति विचारे उत्तरमन्यत्र प्रपंचितं
व्रतादौ तिथीनां युग्मत्वेन प्राशस्त्ये सति एकस्मिन्दिने द्वितीयादितिथिद्वयसंभवे द्वितीयाविहि
तं कर्म द्वितीयाभाग एव कार्यं न तृतीयाभागेपीति तु न तिथिद्वयभागेपि कर्तव्यत्वात् सामा
न्यदिवावेधस्य त्रिमुहूर्त्तात्मकत्वेन तत्कालेऽन्यव्रतानां चाकस्य विधानत्वेपि नक्तोपवासयोः कर्तु ८८

© Dharmartha Trust J&K. Digitized by eGangotri

मशक्यत्वात् ननु तृतीयाविहितनक्तोपवासावपि द्वितीयाभागमुल्लंघ्य तृतीयाभागप्रवेशमा
रभ्य क्रियेतामिति चेन्न व्रतस्य प्रातरेवोपक्रम्य कर्त्तव्यताविधेः तदाह दक्षः प्रातरारभ्य मनिमा
न् कुर्यात्लक्तव्रतादिकं नापराह्णे न मध्याह्ने पित्र्यकालो हि तौ स्मृताविति प्रारंभश्चात्र संकल्पस्त
दुक्तं प्रारंभो वरणं यज्ञे संकल्पइत्यादि अत्र सर्वत्रापि अनुक्तविशेषे प्रातरेव संकल्पः। व्रतोपवा
सादावुत्तरविद्धतिथेः प्रातरसत्वेपि नामग्राह्या यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः। सा
तिथिः सकला ज्ञेया दानाध्ययनकर्मसु इति देवलोक्तेः। न च ब्रह्मावर्त्तः परो देशस्तस्मिन् देशस्व
नंतरः। मध्यदेशस्ततो न्यूनः आर्यावर्त्तस्त्वनंतरः इत्यादिवाक्ये कतत्पर्षजनकत्वबोधनेन ब्रह्मा
वर्त्तादीनामप्युल्लेखप्रसंग इति वाच्यं। यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंति रो
गार्तेषु च यद्दत्तं तेन तस्याद्भुफलं धनं इत्यादिवाक्येरपि वेदविदोगार्त्तानामप्युल्लेखापत्ते

रितिसंक्षेपः अस्योदाहरणं यथा। शुक्लप्रतिपत्पूर्वविद्धैव ग्राह्या। तस्य च व्रतस्य संकल्पः प्रा

८९ तरेवामावास्यायामिति राद्धान्तः। तत्र तिथिनिर्देशोपि अमावास्यायामित्येव न तु प्रतिपदीति।

अन्यथा नान्वितं वदेदिति निषेधो विरुध्येत। यत्तु यां तिथिं समनुप्राप्य यात्यस्तं सपद्मिनीप

89 तिः। सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु इति वचनेन तत्तु तिथेरसत्वात्तत्र युक्तव्रत

क्रियापूर्वविद्धकर्तव्यत्वेन संगच्छेत तद्गतिर्भ्रंशकार्या तिथेरसत्वेपि स्मृत्या अस्तमपव्यापि

त्वमात्रेण साकल्यस्योक्त्या सैव व्रतानुष्ठाने पूर्णतिथिरित्यभिप्रायेण न तु निर्देशोपि तथैवेत्य

भिप्रायेण निर्देशो ज्योतिःशास्त्रस्यैवोपजीव्यत्वादित्यवधेयं इत्याहुः। अथात्रैव केचिदुक्तप्र

संगा लिख्यन्ते। नत्वा कोटीन्दुसंकाशं कोटीशं कुलदैवतं। महागणपतिं विघ्नगणप्रशोषप

भ्मिने। अधित्रिस्थलिसंकल्पे द्विविधे स्मृत्युक्तदिते। तथा प्रयागमरणेनुपपत्तौ विविदएवता। ८९

।पौत्रेण केलदीशस्य सदाशिवमहीपतेः। वेंकटाद्रिमहीभर्त्रा प्रष्टः अस्मान्परोक्षतः।त
स्मै प्रत्युत्तरं दित्सुः करोमि न्यायदीपिकां।तत्रोद्दिश्यपोतिमक्षेत्रं संकल्पे मध्यवर्त्तिनः।प्रसं
गसिद्धिरुद्देश्ये पूर्णे प्रासंगिके फले।अर्द्धमित्यादिमे कल्प उक्तो ह्यनुपपन्नयः।ब्रह्महत्या
पनुत्त्यर्थं षष्ठ्युत्तरशतत्रये।कष्टाणां विहितेतस्य प्रत्याम्नायेन कीर्त्तिते।काशीयात्रादिकं
चेत्स्यात्तावद्द्देशपतीर्थतः।प्रासंगिकस्यार्द्धनीत्या तावद्देवद्वयोर्भवेत्।इतिधीकृत्तह
स्नायाअपि स्यान्निष्कृतिस्तदा।वहुस्मृतीनां व्याकोपः किंचान्यान्यपि भूरिशः।कृष्णाभी
मरथीगोदावर्यादीनि महांतिच।तेषामप्यर्द्धक्लृप्तेवगणने वहु जायते।भैरवाराधनादि
श्चशिष्टाचारो विरुध्यते।यस्तु प्रत्येकसंकल्पः प्रयागादित्रयेश्रितः।संपूर्णफलमेनस्मि
न्प्रत्येकं त्रितयेपिहि।इतिद्वितीयकल्पेपिहेताअनुपपन्नयः।प्रत्यागमनहीनायायात्रा।

© Dharmartha Trust J&K. Digitized by eGangotri

यानफलं भवेत्। प्रत्यागत्युत्तरांगेन हीनत्वात्काम्यकर्मणः। सांगात्फलमिति न्यायात्प्रया
९० गास्मरतो नहि। काशीयात्रा भवेदेवं न गयागमनं ततः। कुर्वंति लोकाः सर्वेपीत्याचारा हि
विरुध्यते। प्रयागोद्देशविषये भैरवाराधनादिकं। विरुध्यत इति द्वेधा संकल्पेनुपपत्तयः
। तथा प्रयागमरणान्मोक्ष इत्यागमोदिते। नान्यः पंथा इति तथा ज्ञानादेवेति च श्रुतं बाध्यते
९० मरणान्मोक्षः काशीवच्चेत्तत्र यात्रकः। ज्ञानोपदेष्टा तत्रेशस्तारकं जपति श्रुतेः। ईशोपदेश
नो मुक्तिर्मणिकर्ण्यां मृतस्य हि। प्रमाणं कल्पकं नात्र प्रयागमरणे श्रुतं। इत्येषु पूर्वपक्षेषु
यथा मृत्युत्तरं ब्रुवे। चरमं तीर्थमुद्दिश्य संकल्पे यत्नचोदितं। तत्रोत्तरं द्विधा यात्रा पुराणेषू
पवर्ण्यते। स्वाराज्यादिफला चैका प्रायश्चित्तफलापरा। स्वाराज्यादिफलार्थीयां यत्र यावत्फ
लं श्रुतं। प्रसंगोद्देशभेदेन तत्र तावद्भवेत् ध्रुवं। प्रायश्चित्ततीर्थयात्रां यां यत्नकृच्छ्रादिकल्प ९०

© Dharmartha Trust J&K. Digitized by eGangotri

ते। तत्रावांतरतीर्थेषु नार्द्धकृच्छ्रप्रवतारणं। काश्यादितीर्थयात्रादौ कृच्छ्रकल्पनमीदृशं।
देशादिभेदे मार्गे च गिरिनद्यादिदुर्गमे। अष्टियोजनयात्रायाः षडब्दसमतोदिता। स्वर्द्धुनी
विषये कृच्छ्रत्रयं योजनं तत्सदा। देशादिविषमे चैतत्सुलभे द्वादिकल्पनं। ततो योजनवृद्धौ
तु कृच्छ्रार्द्धप्रतियोजनं। वर्द्धतेन्यत्र तीर्थेपि यत्र यावदुदीरितं। कृच्छ्रयोजनयोर्मानं ततो
योजनवर्द्धने। कृच्छ्रतुर्यांशवृद्धिः स्यादिति स्मृत्यादिबोधितं। नात्र प्रक्रमते युक्तिः शरणं नो
महद्वचः। एवं स्वल्पज्ञानकृत्या याः काशीयात्रापनोदिका। उत्क्रान्तमध्यतीर्थादावर्द्धसंश्रयणं
कृतं। कृच्छ्रस्यायासस्साध्यत्वादृष्टानुसरणेन च। कल्पितान्मध्यतीर्थेषु पथ्यगायासवर्ज
नात्। दृष्टानुसार्यदृष्टस्य नोपयोगोस्ति कल्पने। प्राजापत्यपराकादौ गुरुलाघवकल्प
ना। स्वपिभिः कल्पितायासभूयस्त्वाल्पत्वसंश्रया। तस्मादुद्देश्यपतीर्थादौ यावत् कृच्छ्रादि

© Dharmartha Trust J&K. Digitized by eGangotri

कल्प्यते। तावदेव परिग्राह्यं नान्यत्तीर्थेर्द्धसंश्रयः स्नानश्राद्धादिकर्त्तव्यं तत्रापि प्रसवा
९१ यहत्त। फले प्राप्तिस्त्विकं यच्च श्राद्धादौ तदपीष्यते। तस्मात्स्वर्गादिविषयमर्द्धमित्यादि
कं वचः। ननु स्वर्गादिविषयमपि न स्यादिदं वचः। उद्दिष्टमेव हि फलं सिद्ध्येन्नैव ततोन्य
था। महायात्राफले चेत्स्याज्ज्ञाव्यमस्यामनुष्ठितौ। नह्यवांतरतीर्थानां फलमुद्देश्यतो व्रजे
91 त्। एकेन कर्त्रा चैकस्मिन्काले नुष्ठीयमानयोः। भवेत्तंत्रप्रसंगो वा कर्मणोर्नेह तावुभौ।
काम्यत्वादनयोर्भिन्नकाले नुष्ठानसंभवात्। पृथगत्रापि संकल्पो ह्यनयैव निराकृतः।
अवांतरोद्देश्यतोक्तावर्द्धान्तिर्व्यर्थतो व्रजेत्। यावद्धि विधिशिरस्कं तत्सर्वं जातेष्टिवृज्ञवे
त्। तस्मान्न्यायवहिर्भूता तेषूद्देश्यत्ववागिह। तस्मादत्र गतिः काचिद्वक्तव्या सोच्यते स्फु
टा। सत्यं नन्यायतस्तेषामनुद्दिष्टं फलं भवेत्। किंत्वेतदेव वचनं विधत्तेऽप्राप्तमेव तत्। ९१

अर्द्धतादृशमेवात्रनन्यायेनविचारणा।नास्तिभारोस्तिवचसः।किन्नकुर्याद्वचोविभु।
तस्मात्पूर्वोक्तरीत्यैवस्वाराज्यादौव्यवस्थितं।अर्द्धतीर्थफलंतस्येतद्वचनमुत्तमं।कृच्छ्र न्ये
दौदृष्टगत्यैवकल्पत्वान्नोपतिष्ठते।सावकाशमिदंवाक्यंविषयेपूर्वदर्शिते।गयोद्देशे
कथंकालभैरवाराधनेतिचेत्।श्रूयतांसर्वतीर्थानांपालकोभैरवोयतः।।तदर्हणाहिक
र्तव्यासर्वैर्निर्विघ्नयात्रिभिः।।विशेषतस्तिहाच्योसौगयायात्रादिषुद्विजैः।।अन्यच्चत्रि
स्थलीपालुः कालभैरवइत्यपि।पुराणेषुसएवेतिवचनाद्यैःप्रकाश्यते।तस्मात्तदाराध
नेहिकर्तव्यंयात्रिणांनणां।इदंप्रयागसंकल्पेसमानंसंप्रतीयतां।इत्थंमतिमतीर्थायसं
कल्पेदूषणोद्धृतिः।।अथद्वितीयकल्पेपिपृथक्संकल्पसंश्रयं।दूषणंयत्तदुद्धारोवक्ष्य
तेन्यायमूलकः।।आदौप्रयागसंकल्पेयात्रातत्राप्यनेनतरंतीर्थकृत्यविधानंनानतत्राश्यं

© Dharmartha Trust J&K. Digitized by eGangotri

ताप्यवाभवेत्। ततः काश्यादियात्राणामेवमेव हि निर्णयः। ननु स्कंदपुराणादौ वाक्यं प्र
९२ त्यागमस्य हि। आगत्याभ्यर्च्य चेत्यादि बोधयत्यंगतां कथं। प्रयागात्काशिकायात्रा ततोपि च
गयागतिः। इति चेत् शृणु न स्कांदं ब्राह्मं वा वाक्यमंगतां। वदेदपि तु कल्प्या स्यात्काश्रुतेरं
गतास्य हि। वाक्यांतरविरोधे नु त्का श्रुतिः कुंठिता भवेत्। इह सप्तपुरीयात्राप्रतिपादक
92 वाक्कृतिः। प्रत्यागमविरुद्धार्थो ततः शास्त्रादिसंस्कृतेः। तीर्थात्तीर्थांतरः प्राप्तिं ब्रुवंती शिव
शर्मणः। अंगतां त्वर्कश्रुतेः कल्प्यां रुणद्धि पुनरागतेः। शिष्टाचारोप्येवमेव विरोधी सार्वदे
शिकः। प्राच्या उदीच्याः पाश्चात्या दाक्षिणात्यास्तथैव च। तीर्थात्तीर्थांतरं यांति प्रत्यागत्य
नपेक्षया। अत्र प्रमाणमार्याणां त्रिस्थलीसेतुगं वचः। केवलं प्रत्यवायी स्याच्छ्रद्धाघकू
रणे द्विजः। यात्रायाः फलमाप्नोति प्राप्तिमात्रादितीदृशां। तर्हि स्कांदादिवाक्यानां का गतिः ९२

© Dharmartha Trust J&K. Digitized by eGangotri

स्याद्वदेतिचेन्न।निमित्ततांबोधयेच्चापूर्वकालत्वबोधनात्।सत्राद्युदवसायेतिवागुद्धा
स्येत्तिवा।गपि।यथानिमित्ततांब्रूते उद्वासोदवसानयोः।पुनराधानविषयेयथोपृष्ठशाम
नीयके।तद्वदेतदपीत्येवंज्ञातव्यंसूक्ष्मदृष्टिभिः।यथोक्तफलभाक्त्वोक्तिर्यात्रीचेदृहमा
गतः।पित्रादेःपूजनंकुर्यात्पूर्ववन्नान्यथाफलं।इतिनैमित्तिकोगतंश्राद्धादेःप्रक्रियाव
लात्।अर्थप्राप्तपरावृत्तौबोधयेत्सप्ररोचना।अमुमर्थंपरित्यज्यहठादगलकल्पने।वा
क्यभेदोभवेद्व्यास्त्रिगुणद्वयविधानतः।संभवंत्यागतोवाक्यभेदोनैवेष्यतेबुधैः।तस्मात्पृ
थक्पृथक्कार्यःसंकल्पोत्रस्यलत्रये।इत्यस्मिन्नुज्वलेकल्पेनकश्चिद्दोषआपतेत्।अ
थप्रयागमरणेमुक्तिरित्यागमोदिते।यत्पूर्वपक्षितंतत्राप्युत्तरंसंप्रधार्यतां।स्नानात्स्व
र्गसमादिष्टपत्तद्वेषम्यायवैपदं।प्रयुज्यमरणान्मुक्तिंब्रुवाणवद्धृचश्रुतिः।अन्यथानु

© Dharmartha Trust J&K. Digitized by eGangotri

पपत्यैवज्ञानमायादयिष्यति। तत्रापिहिमहेशानश्रासैवरतरोरधः। क्षेत्रसंरक्षणंकुर्व
९३ न्प्राणिनांफलदायकः। विष्णुर्माधवरूपेणतत्क्षेत्रेसर्वदेहिनां। पुरुषार्थान्यथाभीष्टप्र
यच्छन्वर्त्ततेनिशं। तयोरन्यतरोज्ञानंमरणेषूपदेक्ष्यति। सारूप्यादिद्वयंवास्यादत्रस्व
मतशब्दभाक्। यतःसरूपतापाशावपुर्नभवष्यते। अवश्यंभाविहिज्ञानंसरूपत्वादिज
मुषः। आद्यद्वयेननियमःपुनरावर्त्तनश्रुतेः। सारूप्यादिद्वयेतत्रज्ञानान्नपुनरागमः। इत्ये
93 तद्विषयत्वोक्तौकल्पनालाघवंश्रुतेः। केचित्तुमरणादेवमुक्तिंकैवल्यरूपिणीं। प्रचक्षतेत
द्विचार्यंवाक्यांतरविरोधतः। तस्मात्कैवल्यरूपिण्यांमयामुक्तौपईरितः। पंथाःसएवन्या
य्यःस्यादितिसर्वंसमंजसं। इत्थंकोटीशवंशाब्धिसुधांशोःशास्त्रदृश्वनः। सुदर्शनराघवावि
दुषःपुत्रःसंख्यावतांमतः। विरूपाक्षाराध्यनामातेनराज्ञायशस्विना। कृतानांपूर्वपक्षा ९३

© Dharmartha Trust J&K. Digitized by eGangotri

णं परिहारे यथामति। विश्वनाथाय कोटिशापरनाम्ने व्याजिज्ञपत्। तेनासौ प्रीयतां स्वीय
सेवकानुजिघृक्षया॥ अतो वो वनतो याचे विद्वद्भिर्मामिकाकृतिः। निजोत्कमतसेकेन वा लौ
क्किरिव लाल्पतां। यदीमां पंडितंमन्या नाद्रियेरन्नतांत्रिकाः। तावता दूषणं नास्या धीरैः सा
धुभिरादृते॥ ॥इति न्यायदीपिका समाप्ता॥ अथ प्रयागविधिः॥ यानानि तु परित्यज्य भाव्यं
पादचरैर्नरैः॥ लुंठित्वा लोठनीं चैव कृत्वा कार्पटिकाकृतिं॥१॥ प्रथमं चालभेत्तीर्थं प्रणवे
न जलं शुचिः। मंत्रोऽयं च। ॐ नमो देवदेवाय शितिकंठाय वेधसे॥ रुद्राय चापहस्ताय दंडिने
चक्रिणे नमः॥२॥ सरस्वती च गायत्री वेदमानातथैव च॥ संनिधाङ्भवत्वत्र तीर्थपापप्र ना
णाशिनी॥३॥ आम्पां तीर्थं नमस्कृत्यालभेत्॥ ततस्तीर्थजलं गृहीत्वा तीर्थाच्चतुर्हस्तभूमिं
परित्यज्य पाणिपादमुखं च प्रक्षाल्य सयवाक्षतपुष्पफलं गृहीत्वा पठेत्॥ त्वन्नलकमंड

© Dharmartha Trust J&K. Digitized by eGangotri

लुसंभूते गंगे त्रिपथगामिनि ॥ त्रैलोक्यवंदिते देवि गृहाणार्घ्यं नमोस्तु ते ॥ गंगायमुनयोर्म
९४ ध्ये यत्र गुप्ता सरस्वती ॥ त्रैलोक्यवं० ॥ अनेन मंत्रेण जलिना तीर्थे क्षिपेत् ॥ आचम्य प्राण
नायम्य ॥ प्रायश्चित्ताधिकारार्थं मलस्नानमहं करिष्ये ॥ अमंत्रं त्रिःस्नात्वा द्विराचम्य बहिरा
95 गत्य सतिलदर्भं ब्रह्मदंडं गृहीत्वा समस्तसंपदित्यादिश्लोकान्पठन् सकृत्त्रिर्वा प्रदक्षि
णमावृत्य तत् ब्रह्मदंडं ब्राह्मणानां पुरतः संस्थाप्य साष्टांगं प्रणिपत्य तेषां पुरतः उपविश्य
भवदनुज्ञया मम इह जन्मनि जन्मांतरे च कृतानां पापानामनुवादनमहं करिष्ये ॐ कुरुष्वे
ति तैः कृते प्राणानायम्य ॥ ॐ नमो देवदेवाय शितिकंठाय वेधसे ॥ रुद्राय चापहस्ताय दं
डिने चक्रिणे नमः ॥ सरस्वती च गायत्री वेदमाता गरीयसी ॥ संनिधाना भवत्वत्र तीर्थे पा
पप्रणाशिनी ॥ तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम ॥ भैरवाय नमस्तुभ्यमनुज्ञां दातु ९४

© Dharmartha Trust J&K. Digitized by eGangotri

मर्हसि॥नमस्कृत्यसंकल्पंकुर्यात्॥श्रीमदनंतवीर्यस्यादिनारायणस्याचिंत्यापरिमित
शक्त्याध्रियमाणस्यमहाजलौघमध्येपरिभ्रममाणनामनेककोटिब्रह्मांडानामेकतमे
व्यक्तेमहदस्यहंकारपृथिवीअपतेजोवायुराकाशाद्यावरणैरावृतेतस्मिन्महतिब्रह्मांड
खंडयोर्मध्येनाधारशक्तिवराहकूर्मानंतनाष्टदिग्गजोपरिप्रतिष्ठितेसप्तपातालोपरिभा
गेसत्यादिलोकषट्कस्याधोभागेमहाकालायमानशेषस्यसहस्रफणमणिमंडितेदि
ग्दंतिदंतशुंडादंडोत्तंभितेलोकालोकाचलवलयितेलवणेक्षुसुरासर्पिर्दधिक्षीरो
दकार्णवपरिवृतेजंबूप्लक्षशाल्मलिकुशक्रौंचशाकपुष्करसप्तद्वीपदीपितेकास्यंता
म्रगभस्तिनागसौम्यगांधर्वचारणभारतादिनवखंडखंडितेभरतवर्षेभरतखंडेअयो
ध्यामथुरामायाकाशीकांच्यवंतीद्वारावतीकुरुक्षेत्रपुष्करादिनानातीर्थयुक्तकर्मभू

© Dharmartha Trust J&K. Digitized by eGangotri

सौमध्यरेखायाः पूर्वे दिग्भागे भागीरथ्याः पश्चिमे तीरे सकलजगत्स्रष्टुः परार्धद्वयजीवि
९५ नो ब्रह्मणो द्वितीयपरार्धे द्वितीयपरार्धस्य प्रथमवर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे
अह्नि द्वितीययामे तृतीये मुहूर्ते प्रथमघटिकायां सप्तमे वैवस्वतमन्वंतरे अष्टाविंशति
95 मे कलियुगे प्रथमचरणे बौद्धावतारे विक्रमशके यथावर्तमाने संवत्सरे ऽयने ऋतौ मासे
पक्षे तिथौ वारे नक्षत्रे योगे करणे च अमुकराशिस्थे चंद्रे ऽमुकराशिस्थे रवौ एवंगुणवि
शेषणविशिष्टायां पुण्यतिथौ इह जन्मनि जन्मांतरे वा सेचितानां पातकानां ब्रह्महनन म
द्यपान सुवर्णस्तेय गुरुतल्पगमन तत्संसर्गरूप महापातकानां बुद्धिपूर्वकाणां मनो
वाक्काय कृतानां बहुकालाभ्यस्तानां उपपातकानां च स्पृष्टास्पृष्टसंकरीकरण मलि
नीकरण यात्राकरण जातिभ्रंशकरण रसविक्रय कन्याविक्रय गोविक्रय खरोष्ट्र ९५

© Dharmartha Trust J&K. Digitized by eGangotri

महिषीविक्रयदासीविक्रयाश्वविक्रयाजाविपशुविक्रयब्रात्यब्रात्यब्राह्मणत्वदुर्ब्रा
ह्मणत्वनिरर्थकवृक्षछेदनक्रमणानपाकरणब्रह्मस्वाहरणब्राह्मणनिंदागुरुनिंदा
ऽभक्ष्यभक्षणभोज्यभोजनाचोष्यचोषणापेयपानास्पृश्यस्पर्शनाघ्राव्यघ्राणघ्रेया
घ्राणनिहिंस्यहिंसनावंद्यवंदनाचिंत्यचिंतनायाज्ययाजनापूज्यापूजनपूज्यपूजा
व्यतिक्रमणमातापितृतिरस्कारस्त्रीपुरुषप्रीतिभेदनपरस्त्रीगमनक्षत्रियस्त्रीग
मनवैश्यस्त्रीगमनशूद्रीगमनब्राह्मणीगमनविधवागमनदासीगमनवेश्यागमनचा
ण्डालीगमनहीनजस्त्रीगमनपशुयोनिगमनअयोनिबीजपातनकूटसाक्षित्ववाद
पैशून्यवादमिथ्याभिशापवादपरद्रोहाधिकरणम्लेच्छभाषाभाषणम्लेच्छैःसहासन
ब्रह्मद्वेषकरणस्वामिभेदमित्रवंचनभार्यावंचनगर्भपातनरजस्वलागमननिषि

द्दकालमैथुनसकामपरस्त्रीस्तनस्पर्शेनविकारभाषणपथितांबूलचर्वणहीनसेव
९६ नअनृतभाषणपरान्नभोजनअसाक्षिभोजनगणान्नभोजनभ्रूणहिंसापशुहिंसाबा
लहिंसास्त्रीहिंसास्नानत्यागसंध्यात्यागवैश्वदेवत्यागदेवपूजात्यागअतिथित्यागऔ
पासनत्यागआत्मार्थपाकएकाकीमिष्टान्नभोजनपङ्क्तिभेदकरणादीनांपातकानांल
96 घुस्थूलसूक्ष्माद्रीणांक्षालनपूर्वकराहूपरागनिमित्तकुरुक्षेत्राधिकरणश्रोत्रियसं
प्रदानकसहस्रसुवर्णभारदानजन्यफलदशगुणविंध्यसंगतगंगास्नानफलशत
गुणसागरसंगतगंगास्नानफलशतगुणकाश्युत्तरवहगंगास्नानफलशतगुणगंगाय
मुनासंगमस्नानसहस्रगुणकप्राप्तिपूर्वकंसमस्तपितृणामक्षय्यविष्णुवाद्दिलोकप्रा
प्तिकामः त्रिवेणीस्नानमहंकरिष्ये॥ ॥त्रिस्नात्वाद्विराचम्यमुंडनंकारयेत्॥ तत्रायं ९६

मेत्रः ॥ यावच्छेदनीयनखरोमसमानसंख्यवर्षसहस्रावच्छिन्नस्वर्गमहित्वकामरंस्त्रि
रायां समस्तपापक्षयार्थं वपनं करिष्ये ॥ ॥ आत्मनः शुद्धिकामो वा पितॄणां मुक्तिहेतवे
॥ वपनं कारयाम्यत्र तीरे हं तव जाह्नवि ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ के
शानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहं ॥ महापापोपपापौघाः केशलोमनखादिजाः ॥
क्षुरादिछिन्नसर्वांगास्तेमे दोषाः पतत्वधः ॥ यावंति नखरोमाणि वायुना प्रेरितानि वै ॥
पतंति जाह्नवीतोये नराणां पापकर्मणां ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ गंगां
प्राप्य सरिच्छ्रेष्ठां कंपंते पापसंचयाः ॥ केशानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहं ॥ के
शानां यावतीं संख्यां छिन्नानां जाह्नवीजले ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥
दक्षिणकर्णमूलमारभ्याशिरोवपनं उदकुसंस्थं ॥ नखनिकृंतनमप्युदक्संस्थमेव ॥ के

© Dharmartha Trust J&K. Digitized by eGangotri

शानखादिचत्तीरमुवि निक्षिपेत् ॥ प्राणानायम्य पूर्वांगानि करिष्ये दंतकाष्ठं गृहीत्वा आयुर्ब
९७ लं यशो वर्चः प्रजाः पशुवसूनि च ॥ ब्रह्मप्रज्ञां च मेधां च तन्नो देहि वनस्पते ॥ इति दंतकाष्ठं
प्रार्थ्य मुखदुर्गंधिनाशाय दंतानां च विशुद्धये ॥ ष्ठीवनाय च गात्राणां कुर्वेहं दंतधावनं ॥
दंतकाष्ठं भक्षयित्वा जिह्वामुल्लिख्य तद्विसृज्य दशस्नानानि कुर्यात् ॥ ॥ भस्म हस्तेन गृ
97 हीत्वा सर्वेषामेव देवानां पूज्यो रुद्रोत्र देवता ॥ तस्मात्पवित्रं भस्मैतत्तेन स्नानमघापहं
॥ अग्निरितिभस्म ॥ जलमितिभस्म ॥ स्थलमितिभस्म ॥ व्योमेतिभस्म ॥ सर्वं ह वा इदं भ
स्मेति भस्म गृहीत्वा ईशानाय नम इति शिरसि ॥ तत्पुरुषाय इति मुखे ॥ अघोराय नमः
हृदये ॥ वामदेवाय गुह्ये ॥ सद्योजाताय पादयोः ॥ प्रणवेन सर्वांगे ॥ पुनस्नात्वा द्विराच
म्य ॥ ततो गोमयस्नानं ॥ गोमये हस्ते गृहीत्वा ॥ अग्रमग्रे चरंतीनामोषधीनां वने वने ॥ ९७

© Dharmartha Trust J&K. Digitized by eGangotri

तासामृषभपत्नीनांपवित्रंकायशोधनं ॥ तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदा
॥ गंधद्वारामितिसर्वांगेपुनःस्नात्वाद्विराचम्य ॥ अथमृत्तिकास्नानं ॥ बलिस्थापर्वता
नापितिमृत्तिमभिमंत्र्य ॥ मावोरिषत्खनितेतिखनित्वास्योनापृथिवीतिमृदमादाय
। आयनेनेइतिदूर्वामादायगायत्र्याभ्युक्ष्यमृत्सोमदंनिधायाचम्यदेशकालौस्मृ
त्वामृत्स्नानमहंकरिष्यइतिसंकल्प्यमृदंकुशोदकेनाभ्युक्षेत् । ततोदिक्षुमृदंक्षिपे
त् ॥ त्रातारमितिपूर्वस्यां । यमायसोममितिदक्षिणतः ॥ तत्त्वायामीतिपश्चिमतः ॥ व
यंसोमेत्युत्तरतः ॥ तत्सूर्यमित्युपरिष्टात् ॥ अधःपश्यस्वेत्यधायः । कुक्षिरितिकुक्ष्योः
वहीनांपितेतिपृष्ठे । ऊरुभ्यांतदूत्पूर्वोः । मेहनाद्वनमितिमेहने । एतावानस्येतिपाद
योः । यस्यविश्वानीतिहस्तयोः । अंगादंगादित्यनेनपुरुषसूक्तेनचसर्वांगे । इत्तैनं ॥ अ

© Dharmartha Trust J&K. Digitized by eGangotri

ष्वक्रांतेरथ॰ पदेपदेइतिसतिलांदूर्वांशिरसिनिधाय॰ मृत्तिकास्थानंप्रक्षालयेत्।
९८ हिरण्यशृंगंवरुणंप्रपद्ये॰ यन्मेमनसावाचा॰ इमंमेगंगे॰ गंगागंगेति॰ सुमित्र्यामानआ
पः॰ समुद्रज्येष्ठाः॰ एतोन्विंद्र॰ तरत्समंदीधावति॰ पावमान्य॰ आपोहिष्ठेत्यादिभिर्मा
र्जनंकृत्वा॰ इमंमेगंगेइत्यृदकमालोड्य घमर्षणंकुर्यात्॥ ततःप्रवाहाभिमुखंत्रिर्मार्ज
98 यित्वास्नायात्॥ गायत्र्यागोमूत्रं॥ गंधद्वारांगोमयं॥ आप्यायस्वेतिक्षीरं॥ दधिक्राव्णो
दधि॰ तेजोसिशुक्रमसिघृतं॥ देवस्यत्वाकुशोदकं॥ एवंदशस्नानानिकृत्वाबहिरागृ
त्यवाससीपरिधायतिलकंधृत्वासंध्यादिसंपाद्यस्वपितृभ्योहिरण्यश्राद्धंकृत्वादे
वऋषितर्पणंकृत्वापुराणमंत्रैरेकोंजलिनादेयः॥ विष्णुपुराणे। देवासुरास्तथानागा
यक्षागंधर्वराक्षसाः॥ पिशाचगुह्यकाःसिद्धाःकूष्मांडास्तरवःखगाः॥ जलेचराभूमि ९८

© Dharmartha Trust J&K. Digitized by eGangotri

चरावायाधाराश्च जंतवः॥ तृप्तिमेतेन ते यांतु मद्दत्तेनांबुनाखिलाः॥ नरकेषु समस्ते
षु सुच ये स्थिताः॥ तेषामाप्यायनायैतद्दीयते सलिलं मया॥ ये बांधवा बांधवा ये न्यज
न्मनि बांधवाः॥ ते तृप्तिमखिलां यांतु ये चास्मत्तोयकांक्षिणः॥ यत्र क्वचन संस्थानां क्षु
त्तृषोपहतात्मनां॥ इदमक्षय्यमेवास्तु मया दत्तं तिलोदकं॥ शालग्रामसमीपे वैष्णवश्रा
द्धं कृत्वा॥ तत्प्रकारः॥ प्राणानायम्य श्रीविष्णुप्रीत्यर्थं प्रायश्चित्तांगभूतं वैष्णवश्राद्धं क
रिष्ये॥ गोदानं दद्यात्॥ गवामंगेषु तिष्ठंति भुवनानि गावो मे अग्रतः संतु॥ इति गोदानं
॥ विष्णुप्रीत्यर्थं प्रायश्चित्तांगभूतं हवनं करिष्ये॥ ततः परिसमूहनादि आज्यमष्टोत्तर
सहस्रमष्टोत्तरशतं वा व्याहृतिभिर्हुत्वा पंचगव्यहोमं कुर्यात्॥ गोमूत्रं ताम्रवर्णायाः श्वे
तायाश्चैव गोमयं॥ पयः कांचनवर्णाया नीलायाश्चैव वै दधि॥ घृतं तु कृष्णवर्णायाः स

© Dharmartha Trust J&K. Digitized by eGangotri

र्वं कापिलमेव वा। आसामभावे सर्ववर्णानां ग्राह्यं॥ पालाशमध्यपात्रे पद्मपात्रे सौवर्णे
९९ राजते ताम्रपात्रे वा पलपरिमितमष्टमासपरिमितमंगुष्ठार्धपरिमितं वा गोमूत्रं पूर्वोक्त
पात्रे गायत्र्या प्रणवेन वा निक्षिपेत्॥ षोडशमासपरिमितमंगुष्ठार्धपरिमितं वा गोम
११ यं गंधद्वारेति प्रणवेन वा॥ द्वादशमाषपरिमितं क्षीरमाप्यायस्वेति प्रणवेन वा॥ सार्धां
गुष्ठद्वयपरिमितं दधिक्राव्णोति प्रणवेन वा। माषाष्टपरिमितमाज्यं घृतं मिमिक्षिर
इति प्रणवेन वा। माषचतुष्टयं कुशोदकं देवस्य त्वेति प्रणवेन वा। प्रणवेन सर्वं हस्ते
नालोड्य पुनः प्रणवेन यज्ञकाष्ठेन निर्मथ्य पुनः प्रणवेनाभिमंत्र्य। सप्तकुशपत्रैर्गृही
त्वा इरावती० विष्णव इदं० इदं विष्णुर्विचक्रमे० मानस्तोके तनये० कद्रुद्राये दं० श
न्नइंद्राग्नी० इंद्राग्निभ्यामिदं० अग्नये स्वाहा॥ अग्नय इदं० सोमाय स्वाहा। सोमा ९९

© Dharmartha Trust J&K. Digitized by eGangotri

येदं० गायत्रिया० सवित्र इदं० व्याहृती चतुष्टये अग्नये स्विष्टकृत इति दशाहुती
हुत्वा होमशेषं समाप्य पंचगव्य शेषं सायान्हसंध्यादि कृत्वा प्रणवेन सर्वं प्राशये
त्। यत्वक्कर्मा स्थिगतं पापं देहे तिष्ठ मामके। प्राशनं पंचगव्यस्य दहत्यग्निरिवें ध
नं इति पंचगव्य विधिः। ततः प्रायश्चित्त द्रव्यं ब्राह्मणेभ्यो दत्वा। दशदानानि कुर्यात्।
तत्र मात्रे द्विवोदासा पिभूमिर्गोचर्म मात्रा पितिल द्रोण हूयंतथा। गोः सुशीला च दो
ग्ध्री च कुंभै राज्यं च पंच भिः। पलमेकं तु रोप्यस्य सुवर्णस्य सुवर्णकं। दशवस्त्रे महा
दानं दातव्यं च मुमुक्षुणा। गोभूतिलहिरण्याज्य वासो धान्य गुडास्तथा। रोप्यं च ल
वणं चेति दशदानान्यनुक्रमात्। अथ तेषां मंत्राः। गवामंगेषु तिष्ठंति भुवनानि च
तुर्दश। यस्मात्तस्माच्छिवं मे स्यादतः शांति प्रयच्छमे इति गोदानमंत्रः। १। सर्वभूता

© Dharmartha Trust J&K. Digitized by eGangotri

अया भूमिर्वराहेण समुत्सुता॥ अनंतपुण्यफलदा अतः शांतिं प्रयछ मे इति भूमि
१०० दानमंत्रः॥२॥ तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः॥ तिलदानेन सर्वमेवापं ना
शय केशव इति तिलदानमंत्रः॥३॥ हिरंण्यगर्भ गर्भस्थं हेमवीजं विभावसो॥ अ
100 नंतपुण्यफलदमतः शांतिं प्रयछ मे इति हिरण्यदानमंत्र॥४॥ कामधेनुसमुत्था
तु सर्वक्रतुषु संस्थितं॥ देवानामाज्यमाहारमतः शांतिं प्रयछ मे इत्याज्यदानमं
त्रः॥५॥ शीतवातोष्णसंत्राणं लज्जाया रक्षणं परं॥ देहालंकरणं वस्त्रमतः शांतिं
प्रयछ मे इति वस्त्रदानमंत्र॥६॥ धान्यं करोषि दातारमिहलोके परत्र च॥ तस्मान्न
मुच्यते धान्यमतः शांतिं प्रयछ मे इति धान्यदानमंत्रः॥७॥ यथा रसानां प्रवरः सदैवेक्षुर
सो मतः॥ मम तस्मात्परां लक्ष्मीं दद स्व गुड सर्वदा इति गुडदानमंत्रः॥८॥ पितॄणां वल्लभं १००

© Dharmartha Trust J&K. Digitized by eGangotri

यस्माद्धिरण्यगर्भस्य शंकरस्य च॥ पाहि मां सिद्धफलद दुःखसंसारसागरात् इति रौप्यदानमंत्रः॥९॥ रसानामग्रजं श्रेष्ठं बलवर्णबलवर्धनं॥ सर्वस्वादुरसं नित्यमतः शांतिं प्रयच्छ मे इति लवणदानमंत्रः॥१०॥ एवं दशदानानि कृत्वा भागीरथ्याः सौवर्णप्रतिमां कृत्वा तां ताम्रादिकलशोपरि संस्थाप्य पिधाय तदुपरि वस्त्रं प्रसार्य्य ध्वजं कृत्वा प्राणायामादि कृत्वा वेणीयात्रांगत्वा भागीरथी पूजामहं करिष्ये। षोडशोपचारैः संपूज्य॥ ततः प्रातरन्ये नतीर्थे श्राद्धं कृत्वा गंगाप्रीत्यर्थं सुवासिनीं भोजयित्वा आचार्याय गोदानेन सह प्रतिमां दत्वा तीर्थं प्रार्थयेत्॥ महापापोपपापादिनानायोनिषु यत्कृतं॥ बालभावाच्च यत्पापं परद्रोहादिकं मया॥ तीर्थेषु यत्कृतं पापं साक्षात्कर्मादि यत्कृतं॥ भूतं भव्यं भविष्यं च यत्पापं मम जाह्नवि॥ शुष्कमार्द्रं च यत्पापं जानताजानता कृतं॥ मनसा कर्मणा वाचा यद्यत्पापं मया कृतं॥ तस्मादशेषपा

© Dharmartha Trust J&K. Digitized by eGangotri

पोघात्राह्नि जान्हवि सर्वदा ॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ॥ निःपापोस्म्यधुना देवि प्र
१०१ सादात्तव नान्यथा ॥ इति प्रार्थ्य ॥ अथ वेणीं दद्यात् ॥ तत्र विधिः ॥ अत्र नोन्मुक्त सर्वकेशव
पनं किंतु वेणीं कृत्वा कुंकुमादि द्रव्येणालंकृत्य भर्त्तारं नमस्कृत्य तदनुज्ञया वापयेत् ॥ तां
च वेणीं मंजलौ निधाय तत्र यथाशक्तिकृतां सुवर्णमयीं रौप्यमयीं वा वेणीं मुक्ताप्रवालादि
च निधाय ॥ वेण्यां वेपि प्रदानेन सर्वपापं प्रणश्यतु ॥ जन्मांतरेष्वपि सदा सौभाग्यं मम व
र्धतां ॥ सुमंगलीरिति मंत्रं पठित्वा ॥ वेणीं जले प्रक्षिपेत् ॥ इदं च प्रथमयात्रायां ॥ अत्रैव
नान्यत्र कुत्रापि इति ॥ सर्वशिष्टानामाचारः ॥ वंशपात्रमिदं श्रेष्ठं सौभाग्याद्य समन्वितं ॥
वंशानामुत्तमं दानमतः शांतिं प्रयच्छ मे ॥ यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थिताः ॥ त
था शांतिं प्रयच्छंतु रत्नदानेन मे सुराः ॥ इति रत्नदानं ॥ इदं गृहं गृहाण त्वं सर्वोपस्कार १०१

© Dharmartha Trust J&K. Digitized by eGangotri

गयाप्राप्तिदिने फल्गुतीर्थे स्नानं तत्रैव सर्वपितृउद्देशेन तीर्थप्राप्तिनिमित्तकं श्राद्धं प्रेतशिलायां श्राद्धादि ततः रामतीर्थे प्रभासह्रदे स्नानं ततः श्राद्धं बलि
दानम् इति प्रथमदिनकृत्यम्
द्वितीयदिने फल्गुतीर्थे स्नानं प्रेतपर्वते मूलसंज्ञके ब्रह्मकुण्डे स्नानतर्पणश्राद्धानि प्रेतपर्वतोपरि श्राद्धं [illegible] दानं सकु
ते परं [illegible] तीयदिनकृत्यं

संयुते नव विप्रप्रसादेन दद स्वाभिमतं फलं ॥ दयानि वंशपात्राणि सन्न सोपस्कराणि
च ॥ जान्हवीतीरवासिभ्यो ब्राह्मणेभ्यो विशेषतः ॥ इति वंशपात्रदानं ॥ ॥ एतावत्पूर्वदि
नकृत्यं तीर्थश्राद्धानंतरं वा ॥ सायान्हे प्यथ वा रात्रौ तीर्थश्राद्धं न युज्यते ॥ पूर्वाह्णे चैव क
र्त्तव्यमिदं श्राद्धं ततः परं ॥ ॥ इति प्रयागविधिः समाप्तः ॥ अथ गयापद्धतिः प्रथमदिने
गयापूर्वदिकृत्य फल्गुतीर्थे प्रातः श्रायामादि पंचांगस्मरणं त्वा पितृणां विष्णुलोकावाप्त्ये आत्म
नश्च भुक्तिमुक्तिसिद्धये स्नानमहं करिष्ये इति संकल्प्य प्रागुक्तरीत्या स्नात्वा देवादितर्प
णं यथापूर्वं कृत्वा तीर्थप्राप्तिनिमित्तकमर्घ्यावाहनादिरहितसर्वपितृदेशेन पार्वणैको
द्दिष्टात्मकं श्राद्धं कृत्वा ऽसंभवे पिंडदानमात्रमेव कृत्वा तद्दिने एव नदीपश्चात्तीरलग्नां ग
योत्तरस्यां प्रेतशिलां गत्वा तत्र ध्रुवः संस्कृत्याचांत उपविष्टः कृतापसव्यो दक्षिणमुखः

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ कव्यवाउनलः सोमपमश्चैवार्यमा तथा अग्निष्वात्ता वर्हिषदः सोमपाः पितृदेवताः
९०२ आगच्छंतु महाभागा युष्माभिरक्षितास्त्विह मदीयाः पितरो ये च कुले जाताः सनाभयः ते
षां पिंडप्रदानार्थं मागतोस्मि गयामिमां तेसर्वे तृप्तिमायांतु श्राद्धेनानेन शाश्वतीमिति
मंत्रं पित्राद्यावाहनरूपं पठित्वा पितॄन् ध्यात्वा सव्यं कृत्वाचम्य प्राणानायम्य पुंडरीकाक्षा
102 यनमइति श्राद्धीयसामग्रीं कुशोदकेन प्रोक्ष्य पंचांगंस्मृत्वामुकगोत्राणाममुकशर्मणां
पित्राद्यानां प्रेतत्वविमुक्तिकामः श्राद्धमहं करिष्ये इति संकल्प्य दक्षिणदानांतं त
त्कृत्वा तद्वेदिं दक्षिणात उपविश्य कृतापसव्यो दक्षिणामुखः कुशात्रयं गृहीत्वा कव्येत्या
दि पठित्वा तेषु कुशेषु सकृत्तिलोदकांजलिदानरूपमावाहनं कृत्वा तत्रैतानि पाद्यादी
नि पित्रादिभ्यो नम इत्यनेन क्रमेण पंचोपचारैः पित्रादीन्संपूज्य । ॐ आब्रह्मस्तंबपर्यन्तं ९०२

देवर्षिपितृमानवाः। तृप्यन्तु पितरः सर्वे मातृमातामहादयः। अतीतकुलकोटीनां सप्त
द्वीपनिवासिनां। आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकमिति पूर्ववदंजलिदानरूपं मि
लितपित्राद्यावाहनं कृत्वा ओं अमुकशर्मन्नेष ते पिंडः स्वधेति तिलजलदधिमधुमिश्रं पा
यसाद्यन्यतमद्रव्यनिर्मितं पिण्डं पित्रे दद्यात्। एवं पितामहादिभ्य एकादशभ्योपि पिंडान्
दद्यात्। ततो दक्षिणत उपविश्य समूलान्दक्षिणाग्रान्कुशानास्तीर्य ओं कव्येत्यादि पठित्वा
प्राग्वदावाहनं कृत्वा। ओं पितापितामहश्चैव तथैव प्रपितामहः। मातापितामही चैव तथैव
प्रपितामही। मातामहस्तत्पिता च मातामहकादयः। तेषां पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठ
तां इति पौराणमंत्रमुच्चार्य तिलघृतदधिमधुजलयुतं मुष्टिमितं सक्तुकृतमेकं पिंडं द्वाद
शभ्यो दद्यात्। ततः षोडशी कर्म। तद्यथा। ऊनविंशतिदास्यमानपिंडस्थानां नियमाद्दक्षि

© Dharmartha Trust J&K. Digitized by eGangotri

णं कृत्वा प्रत्येकं पंचगव्यरालिप्यतेषु पूर्ववद्दक्षिणाग्रं कुशत्रयं धृत्वा। ॐ अस्मत्कुले मृता
१०३ ये च गतिर्येषां न विद्यते। आवाहयिष्ये तान्सर्वान्दर्भपृष्ठे तिलोदकैः। ॐ मातामहकुले ये च ग
तिर्येषां न विद्यते। आवाहयिष्ये तान्सर्वान्दर्भपृष्ठे तिलोदकैः। ॐ बंधुवर्गकुले ये च गतिर्ये
षां न विद्यते। आवाहयिष्ये तान्सर्वान्दर्भपृष्ठे तिलोदकैः। इति मंत्रैराहूत तदर्भेषु तानावाह्य
गंधादिभिरभ्यर्च्य यदा देवतापदे षोडशी क्रियते तदा तद्दैवतामपि तन्मंत्रेण संपूज्याब्रह्मस्त
103 वेति श्लोकमंत्राभ्यां प्राग्वत्सकृत्त्रत्तिलोदकांजलिं दत्वा तेषु स्थानेषु मृत्तिकादितः पिंडान्द
द्यात्। तद्यथा अस्मत्कुले मृता ये च गतिर्येषां न विद्यते तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहं
मातामहकुले ये च गतिर्येषां न विद्यते तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहं। बंधुवर्गकुले ये
च गतिर्येषां न विद्यते तेषामु०। अजातदंता ये केचिद्ये च गर्भे प्रपीडिताः तेषामु०। अग्निदग्धा १०३

© Dharmartha Trust J&K. Digitized by eGangotri

श्च ये केचिन्नाग्निदग्धास्तथापरे विद्युच्चौरहता ये च तेभ्यः पिंडं ददाम्यहं दावदाहे मृता ये च
सिंहव्याघ्रहताश्च ये दंष्ट्रिभिः शृंगिभिर्वापि तेभ्यः० उद्बंधनमृता ये च विषशस्त्रहताश्च ये आ
त्मनो घातिनो ये च तेभ्यः पिं० अरण्ये वर्त्मनि वने क्षुधया तृषया हताः भूतप्रेतपिशाचाश्च ते
भ्यः० रौरवे चांधतामिस्रे कालसूत्रे च ये गताः तेषामु० अनेकयातनासंस्थाः प्रेतलोकं त्वमे
गताः तेषामु० अनेकयातनासंस्था ये नीता यमसादने तेषामुद्धरणार्थाय० नरकेषु समस्ते
षु यातनाया च संस्थिताः तेषामु० पशुयोनिगता ये च पक्षिकीटसरीसृपाः अथवा वृक्षयो
निस्थास्तेभ्यः पिं० जात्यंतरसहस्रेषु भ्रमंतः स्वेन कर्मणा मानुष्यं दुर्लभं येषां तेभ्यः० दिव्यां
तरिक्ष्यभूमिवाः पितरो बांधवादयः मृता असंस्कृता ये च तेभ्यः० ये केचित्प्रेतरूपेण वर्त्तं
ते पितरो मम ते सर्वे तृप्तिमायांतु पिंडेनानेन सर्वदा ये बांधवा बांधवा वा ये न्यजन्मनि बां

© Dharmartha Trust J&K. Digitized by eGangotri

धवाः तेषां पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठतो पितृवंशे मृता ये च मातृवंशे च ये मृताः गुरुश्व
२०५ शुरबंधूनां ये चान्ये बांधवाः स्मृताः ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः क्रियालोपगता
ये च जात्यंधाः पंगवस्तथा विरूपा आमगर्भाश्च ज्ञाताऽज्ञाताः कुले मम तेषां पिंडो मया दत्तो ह्य
क्षय्यमुपतिष्ठतो एभिस्त्रिभिरेकः पिंडः आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा
मदीयाः कुलद्वये ये मम दासभूता भृत्यास्तथैवाश्रितसेवकाश्च मित्राणि सख्यः पशव
श्च वृक्षाः स्पृष्टाश्च दृष्टाश्च कृतोपकाराः जन्मांतरे ये मम संगताश्च तेभ्यः स्वधा पिंडम
हं ददामि द्वाभ्यामेकः पिंडः एवमपसव्येनो न विशंति पिंडान् दद्यात् ततः स्त्रीषोडशीनां
त्र चास्मत्कुले मृता याश्चेत्येवं प्रकारेण आवाहनमंत्रादारभ्य ददामीत्यंतं यथासंभवं स्त्री
लिंगतयोहनीयं विशेषं पुंषोडशीवत्॥ ॥ततः सर्वेषु पिंडेषु तिलयुतजलपात्रेण प्र २०५

105

© Dharmartha Trust J&K. Digitized by eGangotri

वचाक्यप्रयोग आपद्येतेत्यास्तां तावत्। न नु पठ्यमानवेदार्थानुष्ठाने अध्ययनजन्यं ज्ञान
मेगं नानुमेयवेदार्थानुष्ठाने उपत एव पुराणोक्तकर्मानुष्ठाने स्त्रीशूद्राणां संकल्पस्तत्क
र्मादौ कर्मसंकल्पं कुर्यादिति स्मृत्याचारानुमितवेदार्थ एवेति कथं पठ्यमानानुष्ठेयत्वं संक
ल्पस्येति चेत् न। नहि कर्मादौ कर्मसंकल्पं कुर्यादिति साधारणविध्यर्थज्ञानमात्रात्सोमे
न पक्ष्ये ज्योतिष्टोमेनाग्निष्टोमेन रथंतरसाम्ना द्वादशशतदक्षिणेन स्वर्गं लोकमवाप्नवा
नीति एवंरूपः संकल्पोऽनुष्ठातुं शक्यः। किंत्वेतावद्विशेषणविशिष्टत्वेन यागज्ञानान्तु एता
वद्विशेषणविशिष्टत्वेन यागज्ञानं अध्ययनजन्यमपि भवतीति तस्यैवानुष्ठानोपयोगित्वे
पत्यास्तु तदभावान्न पठ्यमानुष्ठेयत्वं संकल्पस्य न नु पूर्वोक्तविशेषणविशिष्टत्वेन यागसंक
ल्पः कर्तव्य इति विधिः पुनः कल्प्य एवेति पूर्वोक्तदोषस्तदवस्थ एवेति चेन्न आम्नायानव

© Dharmartha Trust J&K. Digitized by eGangotri

वोधात्तथाहि प्रयोगविधेः कल्पत्वेपि मंत्रांगककर्मस्थले मंत्रजन्यस्मरणस्यामंत्रककर्म
१२१ स्थले स्मृतिविधिजन्यस्मरणस्य साक्षादनुष्ठानोपयोगित्वेन साक्षादध्ययनजन्यज्ञान
स्य साक्षादनुष्ठानांगत्वाभावेपि यथा साक्षादध्ययनजन्यज्ञानमेव परंपरया प्रयोजकं
कल्पयित्वाऽपस्मृत्यधिकरणे श्रुत्यव्याप्तिः कर्मणि समर्थिता तथोक्तविशेषणविशिष्टत्वे
121
नाध्ययनजन्ययागज्ञानमेव परंपरया संकल्पप्रयोजकमिति तदभावान्नपत्न्यनुष्ठेयत्वं
संकल्पस्य अन्यथा कल्पप्रयोगविध्यर्थज्ञानस्य स्मृतिविध्यर्थज्ञानस्य च श्रुत्यसंभवाद
नग्निसाध्यकर्मणि श्रुतस्याप्यधिकारापत्तेरिति वस्तुतस्तु संकल्पवाक्यस्य स्मृत्याचारा
नुमितकर्मादौ कर्मसंकल्पं कुर्यादिति वाक्यमूलकत्वेपि तस्यादृष्टद्वारा कर्मांगत्वं मंत्रन्या
येन स्वजन्यप्रयोगावधारणद्वारा वा प्रयोगांगत्वं एवं च संकल्पस्य फलिसंस्कारत्वादि १२१

© Dharmartha Trust J&K. Digitized by eGangotri

कुकल्पनायाः पूर्वोक्तरीत्यानिरासे सत्येकमुख्यविद्घयजमानानुष्ठेयसंकल्पेनैव कर्म
णः सांगतासिद्धेति न पत्न्यनुष्ठेयत्वं संकल्पस्य स्त्रीमात्रकर्त्तृकपुराणोक्तकर्मानुष्ठाने परं
स्त्र्यनुष्ठेयत्वं संकल्पस्येति तत्त्वं बोध्यं यत्तु वैयाकरणंमन्येनोक्तं आधुनिकयत्किंचित्तूग्रं
थकारलिखितायां यजमानः सपत्नीकः प्राणानायम्य संकल्पं कुर्यादित्ति तद्धि कायानु[illegible] ल्प
योगार्थकसहशब्देन सपत्नीकशब्देन तेनसहेति सूत्रविहितसमास एव पत्न्याः संकल्पं
ज्ञापयतीति तन्न प्राणायामस्यापि पत्नीकर्तृकत्वापत्तेः। तेनसहेति सूत्रस्य प्रत्याख्याना
त्। फलांतरार्थं भगवदंगीकृतेपि सूत्रे इतिशब्देन तुल्ययोगग्रहणस्य प्रायिकत्वस्य सूच
नात्। सकर्मकइत्यादौ विद्यमानवाचिकर्मादिसमानाधिकरणसहशब्देनानेकमन्येति
समासवत्सपत्नीकशब्देपि तथासम्भवाच्च। साकांक्षे साकांक्षेसपूर्वस्य सपूर्वायाइत्या

सपूर्वाच्च

दिङ्निर्देशेवोपसर्जनस्येत्यत्रप्रतिपदोक्तपरिभाषायाअप्रवृत्त्यासादेशःसुलभः॥सपूर्वेत्य
११२ त्रसर्वनामसंख्ययोरित्यस्याप्रवृत्तिरनित्यत्वात्।तस्मात्सपत्नीकइत्यत्रापिविद्यमानार्थ
कएवसहशब्दः।स्पष्टंचेदंसहितशब्देतिसूत्रेकैयटेइतितत्त्वमितिदिक्प्रकृतमनुसरामः
122 अथोपाकर्मोत्सर्जनप्रयोगबोधकप्रयोगकारसंग्रहः श्रावण्यांपौर्णमास्यांसहशिष्यैर
ध्यायोपाकर्मकरिष्येइतिसंकल्प्यनूतनब्रह्मचारिणामुपाकरणेविशेषोऽस्यब्रह्मचारि
णोवेदग्रहणाधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थमुपाकरणंकरिष्यइतिसंकल्प्य
गणेशपूजनंस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्यत
तोमहापगासुस्नात्वानिवीतिप्रजापतिंकांडऋषिमावाहयामीत्यादिनवकांडर्षीनर्चयें
तितर्पयंत्युपवीतीयत्रक्वचेतिविधिनाऽग्निमुखांतेप्रजापतयेकांडऋषयेस्वाहेतिसु ११२

© Dharmartha Trust J&K. Digitized by eGangotri

वेण स्रुच्याज्यमादाय प्रयोगेणैष्टो कृत्वा सदसस्पतिमिति नवमीं जुहोति तिलां जुहो
तीति सक्तुहोमो यज्ञोपवीतं कृत्वा दत्वा च धारयेद्दर्भेष्वासीनो दर्भाधारयमाणश्चतुरो
ऽनुवाकान्वेदस्याध्यानधीयीरन्समिधमिध्मसंनहनं चाग्नौ प्रहृत्य जयादिहोमो जुह्वा
परिधीननक्तिपात्रप्रयुक्तं दर्भाग्राणीत्यादि परिधीनग्नौ प्रहृत्य संस्रावहोमोऽनाज्ञात
त्रयं यद्वो देवा भूर्भुवःस्वःस्वाहेत्यादि तेन्वमं स्याद् इति प्रणीताविमोकादि ब्रह्माणं विसृजे
न्न् तन ब्रह्मचारिणां तु यज्ञोपवीतधारणं नेन वाजिनुकटिसूत्रकौपीनवस्त्रमेखला
दंडानि धारयेत् इत्युपाकरणमेवमुत्सर्जनन्ते प्यपौर्णमास्यां विधीयतेऽध्यायमुत्स
जे यिष्ये इति संकल्पयेन्न वेदस्याध्यानानुवाकानधीयीतेति निश्चितमुत्सर्जनस्य का
लान्निपतेऽश्रावण्यां पौर्णमास्यां प्राप्तायामपि तस्मिन्दिने प्रायश्चित्तपूर्वकमुपाक

© Dharmartha Trust J&K. Digitized by eGangotri

रणात्पूर्वमुत्सर्जनं करिष्येऽत्र प्रायश्चित्तं तैष्यां पौर्णमास्यायोत्सर्जनस्य कालातिक्र
१२३ मे प्रायश्चित्तार्थमष्टोत्तरसहस्रसंख्यमष्टोत्तरशतं वा जुहुयाद्वाजपेद्वा कामोकार्षीन्
मन्युरकार्षीदित्येतावानेव मंत्रस्तैष्यां पौर्णमास्यामध्यायोत्सर्जनप्रकारेण श्रावण्यां
पौर्णमास्यां स्वरूपेणानुष्ठेयमित्युत्सर्जनमिति॥ यद्यप्यापस्तंबेन धर्मसूत्रे प्रथमप्रश्ने
123 तृतीयपटले प्रथमखंडे श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयी
त तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेदर्धपंचमान्मासान् चतुरो मासानित्येके इत्यु
क्तं तत्रैव नवमपटले सप्तविंशतिखंडे श्रावण्यां पौर्णमास्यां तिलभक्ष उपोष्य वाश्वो
भूते महानदमुदकमुपस्पृश्य सावित्र्या समित्सहस्रमादध्याज्जपेद्वेत्युक्तं गृह्यप्रश्ने च
तृतीयपटले नवमखंडे पौर्णमास्यां पौर्णमासी यस्यां क्रियते उपाकरणसमापने १२३

© Dharmartha Trust J&K. Digitized by eGangotri

चरु षिर्यः प्रज्ञायते सदसस्पतिर्द्वितीयः पृथक्त्येतावन्मात्रमुक्तं प्रयोगो नोक्तः अंड्रि
ल्लाकारेण चयस्यां पौर्णमास्यां श्रावण्यां मार्गशीर्ष्यां च स्थालीपाकः क्रियते तदुक्तम
न्यत्र तेनैव तस्य सैव पौर्णमासी देवता उपाकरणे समापने च ऋषिभ्यः प्रज्ञायते स
दसस्पतिर्द्वितीयः अध्यायोपाकरणस्य प्रयोगो वक्ष्यते श्रावण्यां पौर्णमास्यामाचा
र्यः सह शिष्यैः कृतप्राणायामोऽध्यायोपाकरणं करिष्य इति संकल्प्य माहानदमुद
कमुपस्पृश्य स्नात्वा नववस्त्रः षीस्तर्पयेत् प्रजापतिं काण्डऋषिं तर्पयामि सोमं अग्निं वि
श्वान्देवान् सांहितीः याज्ञिकीर्दे॰ वारुणीः ब्रह्माणं सदसस्पतिं ततः स्थण्डिलाद्यग्ने
रुपसमाधानादि अग्निमुखान्तेऽन्वारब्धेष्वन्तेवासिषु नवाज्याहुतीर्जुहोति प्रजापत
ये काण्डऋषये स्वाहा सोमाय अग्नये विश्वेभ्यो देवेभ्यः सांहितीभ्यः याज्ञिकीभ्यः

© Dharmartha Trust J&K. Digitized by eGangotri

वारुणीभ्यः ब्रह्मणे स्वयंभुवे सदसस्पतये नमः सदसस्पतिमित्यृचा ततः सर्वे आचा
१२४ र्यप्रमुखा दर्भेष्वासीना दर्भान् धारयमाणा वेदस्यादितश्चतुरो वराध्यायाननुवाकानधी
यते जयादिपरिषेचनान्ते ब्राह्मणतर्पणं मासं प्रदोषे नाधीयीत तत्तिलभक्षणं चम्यो भुक्ते
ब्रह्मचारिभिः सह माहानदमुदकमुपस्पृश्य सावित्र्या समित्सहस्रमादध्यात् तस्य
124 प्रयोगः स्थण्डिलाद्यग्निमुपसमाधाय संपरिस्तीर्य कृत प्राणायामः सावित्र्या समित्स
हस्रमाधास्य इति संकल्प्य परिषिच्य घृतेन पयसा वा समिधोऽभ्यक्ता सावित्र्याऽऽद
ध्यात् ततः परिषेचनं ब्राह्मणभोजने समिदभावे सामर्थ्याभावे वा जपः एवमेवोत्स
र्गस्य कालस्तैष्याम् इत्यादि अ त्सर्जनं करिष्ये इति संकल्प्य स्नानादिहोमान्तं कृत्वा
तत्रैव स्वाध्यायं विसृजेत् ततो जपादि पूर्ववत् तत्र श्लोको उपक्रमोत्सर्जनयोः स १२५

ध्यायो २

© Dharmartha Trust J&K. Digitized by eGangotri

शिष्यश्चाचार्यश्चास्नुत्य महापगासुः संतर्प्य वार्य्यंजलिभिर्मुनीस्तानेभ्यस्त होष्यन्स
दसस्पतिं चाग्राघानुवाकांश्चतुरावराध्यानधीयुते तत्र ततो जपादि इति व्याख्यातं
विघारएयुश्चिंगाभद्दवोपष्यमद्दाअपिएवंसत्कूपवीतहोमांत्रोऽवांतरविश्रोषःमिश्र
सुत्रयोगोशउदासीनः अथचेद्दचूडीश्रावण्यांपौर्णमास्यामाचार्यः शिष्यैः सहमलान
द्यादेविधिवत्स्नात्वाऽऽचम्य कृतप्राणायामोध्यायमुपाकरिष्ये इति संकल्प्य लौकि
काग्निमाहृत्योपसमाधाय परिस्तीर्य दर्भमयान्ऋषीन्कृत्वा पीठ निधाय पूजापत्यादि
नवकांडऋषीनावाहनादिषोडशोपचारैर्निवीतिना संपूज्य पवित्रपाणिर्नवकांडऋ
षीस्तर्पयेत् प्रजापतिं कांडऋषिं तर्पयामि सोमं कांडऋ० अग्निं कां० विश्वान्देवा०
सांहितीर्देवताउपनिषदः० याज्ञिकीर्देवता उ० वारुणीर्देवताउ० ब्रह्माणं स्वयंभु

© Dharmartha Trust J&K. Digitized by eGangotri

वं० सदसस्पतिं तर्पयामि इति तर्पयित्वा पात्रप्रयोगादि मुखहोमांते अन्वारब्धेषु ते वा
१२५ सिषु प्रजापतये कांडऋषये स्वाहा। सोमाय कांडऋषये० अग्नये कांडऋषये० विश्वेभ्यो
देवेभ्यः कांडऋषिभ्यः० सांहितीभ्यो देवताभ्य उपनिषद्भ्यः याज्ञिकीभ्यो देवताभ्य उप
निषद्भ्यः० वारुणीभ्यो देवताभ्य उपनिषद्भ्यः० ब्रह्मणे स्वयंभुवे स्वाहा। सदसस्पतये स्वा
हा। सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं। सनिं मेधामयासिषं स्वाहा। इति नवाहुती
र्हुत्वा मंत्रोक्ता देवता ततः आचार्यप्रमुखा दर्भेष्वासीना दर्भान् धारयमाणाः संहिताया आ
दितश्चत्वारोनुवाका निषत्वेत्यादीन धीयीरन्। ततो जयादि प्रतिपद्यते परिधीन्प्रहृत्य ब्रा
ह्मणो हासनांतं कृत्वा यथाशक्ति ब्राह्मणान्भोजयेत्॥ एवमुपाकर्म कृत्वा स्वाध्यायमधी
यीतेति। एवमेवोत्सर्जनं अन्यूनानधिकं कुर्यादिति बोध्यं। न तत्राध्ययनं इति केचित् १२५

© Dharmartha Trust J&K. Digitized by eGangotri

उत्पक्ष्येइतिसंकल्पविशेषइतीतिनथापिप्रचुरतराचारविषयप्रागुक्तंप्रयोग
स्सव्याख्यानःसप्रपंचोविविच्यतेतत्रादावुपयुक्तोपस्तवर्गस्सस्त्रंत्रं।अथकर्मण्या
चाराद्यानिगृह्यंतेउदगयनपूर्वपक्षाहःपुण्याहेषुकार्याणियज्ञोपवीतिनाप्रदक्षि
णंपुरस्तादुदग्वोपक्रमस्तथापवर्गोपरपक्षेपित्र्याणिप्राचीनावीतिनाप्रसव्यं
दक्षिणतोऽपवर्गोनिमित्तावेक्षाणिनैमित्तिकान्यग्निमिध्वाप्रागग्रैर्दर्भैरग्निंपरिस्तृ
णातिप्रागुदगग्रैर्वादक्षिणाग्रैःपित्र्येषुदक्षिणप्रागग्रैर्वोत्तरेणाग्निंदर्भान्संस्तीर्य
द्वंद्वंन्यंचिपात्राणिप्रयुनक्तिदेवसंयुक्तानिसकृद्देवमनुष्यसंयुक्तान्येकैकशःपितृ
संयुक्तानिपवित्रयोःसंस्कारआयामतःपरिमाणंप्रोक्षणीसंस्कारःपात्रप्रोक्षइ
तिदर्शपूर्णमासवत्तूष्णीमपरेणाग्निंपवित्रांतर्हितेपात्रेऽपआनीयोदगग्राभ्यांपवि

© Dharmartha Trust J&K. Digitized by eGangotri

त्राभ्यां त्रिरुत्पूय समं प्राग्रौ हुत्वोत्तरेणाग्निं दर्भेषु सादयित्वा दर्भैः प्रच्छाद्य ब्राह्मणं द
१२६ क्षिणतो दर्भेषु निषाद्याज्यं विलाप्यापरेणाग्निं पवित्रान्तर्हितायामाज्यस्थाल्यामाज्यं
निरुप्योदीचोऽङ्गारान्निरूह्य तेष्वधिश्रित्य ज्वलतावद्युत्य द्वे दर्भाग्रे प्रत्यस्य त्रिः पर्यग्नि
कृत्वोदगुद्वास्याङ्गारान्प्रत्यूह्योदगग्राभ्यां पवित्राभ्यां पुनराहारं त्रिरुत्पूय पवित्रेऽ
126 नुप्रहृत्य येन जुहोति तदग्नौ प्रतितप्य दर्भैः संमृज्य पुनः प्रतितप्य प्रोक्ष्य निधाय दर्भा
नद्भिः संस्पृश्याग्नौ प्रहरतीत्याम्याः परिध्यर्थे विवाहोपनयनसमावर्तनसीमन्त
चौलगोदानप्रायश्चित्तेष्वग्निं परिषिञ्चत्यदितेऽनुमन्यस्वेति दक्षिणतः प्राचीनमनुम
तेऽनुमन्यस्वेति पश्चादुदीचीनं सरस्वतेऽनुमन्यस्वेत्युत्तरतः प्राचीनं देव सवितः प्रसु
वेति समन्तं पेत्रकेषु समन्तमेव तूष्णीमिध्ममाधायाघारावाघारयन्ति दर्शपूर्णमा १२६

© Dharmartha Trust J&K. Digitized by eGangotri

सवत्नूक्षीमथाज्यभागौजुहोत्यग्नये स्वाहेत्युत्तरार्द्धपूर्वार्द्धेसोमायस्वाहेत्तिदक्षिणा
र्द्धपूर्वार्द्धे समंपूर्वेणयथापदेशंप्रधानाहुतीर्हुत्वाजयाभ्यातानानाराष्ट्रभृतःप्राजा
पत्यान्व्याहृतीर्विहृताःसौविष्टकृतीमित्युपजुहोत्तियदस्यकर्मणइत्तिपूर्वंवत्सरिषे
चनमन्त्वमंस्थाःप्रासावीरित्तिमंत्रसन्नामइति।अत्रौडुला।अथानंतरं तानिक
र्माणिगृह्यतेकर्त्तव्यत्वेनज्ञायंते नानिकर्माण्उदगयनपूर्वपक्षाहःपुण्याहेषुकार्या
णिउदगयनादिप्रसिद्धंपुण्याहास्तु देवस्यसवितुःप्रातःप्रसवेप्राणइत्यनुवाके पंचपु
ण्याहाउक्ताः प्रातर्मध्यंदिनापराह्णादिशब्दवाच्यानाडिकात्रयंनाडिकात्तृतीयांशश्च
कोभागःपुण्याहस्तेषुतानिकार्याणिचौलादीनिसीमंतादीनांनैमित्तिकानामपिपूर्व
पक्षपुण्याहामवंतिनतूदगयनादयःसर्वंयज्ञोपवीतिनाकार्यंयथाप्रादक्षिण्यंभ

© Dharmartha Trust J&K. Digitized by eGangotri

वर्त्तिनथाकर्माणिकरोतिसर्वत्रपुरस्तादुदग्वाकर्मणामुपक्रमः।तथापवर्गोपिपु
१२७ रस्तादुदग्वाभवतिअपवर्गःसमाप्तिःअपरपक्षेपित्र्याणिकर्माणिकरोतिवुदगयु
नादिर्निवर्तिप्राचीनावीतिनापित्र्याणिकार्याणियथाप्रसव्यंतथाकरोतिअपवर्ग
श्चदक्षिणतोभवतीतिअग्निममग्रेस्फुरीभविष्यति।उक्तपौर्णमास्यांशिष्यैःसहाचा
127 र्यःस्नानाहृतादिकुशादिसामग्रीयुतोदर्भपवित्रपाणिःकृतनित्यक्रियःसतिसं
भवेमहापगासुप्रागुक्तविधिनामृत्तिकास्नानंसंकल्पपूर्वंकृत्वाततीरेगृहेवाआग
त्यस्थंडिलादिनिर्मायपद्धिराचम्यप्राणानायम्यएवंगुणविशेषणविशिष्टायांपुण्य
तिथौएतैःसहयानतयामदोषपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थमध्यायोपाकर्म
करिष्येइत्युपाकर्मणिपूर्वोक्तसहितमध्यायमुत्सर्जयिष्येइतिउत्सर्गकर्मणियथा १२७

© Dharmartha Trust J&K. Digitized by eGangotri

यथेसंकल्प्य तदंगत्वेन नवकांडऋषिपूजनं करिष्ये इति संकल्प्य तन्निर्विघ्नतासि
ध्यर्थं गणपतिपूजनं करिष्ये इति संकल्प्य गणपतिं संपूज्य ततस्तदंगत्वेनाग्निस्थाप
नं करिष्ये इति संकल्प्याग्निमाहृत्योपस्तरणांतं कृत्वा उपवीतभस्त्रानवकांडऋषीन्
षोडशोपचारैः पूजयेत् तर्पयेच्च ॥ न तु पूजनाद्युत्तरमग्निस्थापनं । आग्निसाक्षिकं क
र्म कुर्यादिति वचनात् हिरण्यकेशिसूत्रासम· वारथ्येष्ठे तेवासिष्ठपदे वयजनोल्लेख
नप्रभृत्याग्निमुखान्तं कृत्वेति वोधायनसूत्रोक्तः । ततउत्तरेणाग्निं दर्भानुसंस्तीर्य द्वंद्वंन्य
चीत्यादिना पात्रासादनमिति चेंद्रचूडीकारमतं । अन्येषां तु विधारणांडिलाकारशि
गाभद्र्वोपप्लाभद्यानोमतेन नवकांडऋषिपूजातर्पणांतं कृत्वाऽग्निस्थापनादि न तु पूजा
दितः प्राक् इति एवं च यथासंप्रदायमनुष्ठानं वोध्यं भद्रीयं लिख्यते यत्राग्निः स्थाप्य

© Dharmartha Trust J&K. Digitized by eGangotri

तेतत्र प्राचीरुदक्संस्था उदीचीः प्राक्संस्थास्तिस्रस्तिस्रो रेखा लिखित्वाऽद्भिरवोक्ष्य
१२८ भूर्भुवः सुवरोमित्यग्निं प्रतिष्ठाप्य शेषमुत्सृजेदिति पाठः।। क्वचिदवोक्ष्येत्युत्तरं शेषमित्या
दि पठ्यतेऽनुष्ठीयते च न तथा तत्रोभयत्र निर्मूलत्वाच्चिंत्यत्वं तस्मादग्निस्यापनोत्तरमेव शे
षजलोत्सर्गः अत एवाग्निमिध्वेत्यत्र धर्मशास्त्रोक्तविधिनाऽग्निप्रतिष्ठापनं किं पुन
128 स्तन्नित्यं लोके उपदिशंति यत्र क्वचाग्निमुपसमाधास्यंत्स्यात्तत्र प्राचीरुदीचीश्च तिस्र
स्तिस्रो रेखा लिखित्वाऽद्भिरवोक्ष्याग्निमुपसमिंध्यादुत्सिच्यैतदुदकमुत्तरेण पूर्वेण
वान्यतोयमुपदध्यादिति तस्यायमर्थः लोके यत्र कर्मोपदिशंति तस्यां दक्षिणमारभ्य
प्राचीः प्राङ्मुखा उदगपवर्गाः पश्चादारभ्य उदीचीः उदङ्मुखाः प्रागपवर्गाः करोति ह
स्तेनावाग्भूतेनावोक्ष्याग्निं प्रतिष्ठाप्यावोक्षणशेषं तोयमुत्सिच्य प्रागुदग्वाऽन्यतो १२८

© Dharmartha Trust J&K. Digitized by eGangotri

येनिदर्घातितत्र श्लोकाः श्रुतिस्मृतिप्रचोदितं करिष्यते यदा तदा। स्वकर्मयत्तरादि
तोयत्तास्सुरागुरुं वदेत्। प्राचीः पूर्वमुदक्संस्थं दक्षिणारंभमालिखेत्। तथोदीचीः पु
रः संस्थं पश्चिमारंभमालिखेत्। अर्वाक्करोभ्युक्ष्य निधाय वह्निमुत्सिच्यते चोक्षणेन्तो
यशेषं प्राक्कोयमन्यान्निरुधात्युदग्वायया वह्निः स्याच्च परिस्तृतिस्तथेति श्रां। ऽविलाका
रोक्तिः संगच्छते। तत्र उत्तरेण पूर्वेण वाऽन्यतोयमुपदध्यात्। उत्तरस्यां पूर्वस्यां वा तद्दि
ता तमेतत्। अग्निसमीपोत्तरदिशि तत्समीपपूर्वदिशि वाऽन्यत्र जलं स्थापयेत्॥ त
तोऽग्निमिध्वा ज्वलंतमप्रज्वलंतं वाऽग्निमिध्मप्रक्षेपेण प्रज्वाल्य दक्षिणोत्तरे रुत्त
राधरैः प्रागुदगग्रैर्दर्भैरग्निं परिस्तृणाति। त्रीण्यपि दर्भाणां विशेषणानि तत्र प्रागुदग
ग्रैरित्यस्यार्थो यं दक्षिणोत्तरदिक्स्थैः प्रागग्रैः पूर्वपश्चिमदिक्स्थैश्चोदगग्रैरिति

© Dharmartha Trust J&K. Digitized by eGangotri

दक्षिणेनेत्यादि समस्तपदद्वयस्यार्थोयम् दक्षिणोत्तरैः दक्षिणस्यामुत्तराणि मूलाग्रा
१२९ णि येषामिति कृत्वा दक्षिणस्यामुत्तरैरिति षष्ठी तत्पुरुषो बोध्यः। तथा उत्तराधरैः॥ उत्त
रस्यामधराणि अधो मूलाग्राणि येषामिति कृत्वा उत्तरस्यामधरैरिति षष्ठी तत्पुरुषो बोध्यः
।एवं गुणैर्दर्भैः उत्तरेण पूर्वेण वेति स्थापितजलपात्रं बहिः कृत्वा चतुर्दिक्षु पूर्वतः परिस्त
णीयात् इत्यर्थः। दैवे कर्मणि चेदं। पित्र्येषु दक्षिणप्रागग्रैरिति। उत्तरेणाग्निं दर्भान्संस्ती
129 र्यपरिस्तरणादौ दक्षिणत्वादिकं प्रसिद्धदिग्द्वारावगम्यते अन्तरा वोत्तरेणाग्निमित्यादिकं
संगच्छते केचित्तु परिस्तरणादिविषये दर्भाणामियत्ताविशेषमाहुः। तथा हि अग्निं षोड
शभिर्दर्भैः पुरस्तात्तु परिस्तरेत् अत्र पुरस्तादिति प्रसिद्धपूर्वैवगम्यते नतु पूज्यपूजकयोरं
तरालमेवेति परिस्तरणमन्येषामेवं संख्यं विधीयते। अन्येषां दक्षिणोदगंतानां। १२९

© Dharmartha Trust J&K. Digitized by eGangotri

एवंषोडशषोडशेत्यर्थः। पात्राणांतुद्विषट्कंस्यात् प्रणीतासादनेतथा। दर्व्यादिसादनेत
था द्वादशेत्यर्थः। अष्टभिराच्छादनंतस्यत्रिभिर्वेलासनंभवेत्। द्वौतुदर्भौपवित्रस्यतथा
प्रत्यसनस्यच। संमार्जनंत्रिभिर्दर्भैर्ज्वलनस्यैकउच्यते। पर्यग्निकरणस्यैकमेवमष्टो
त्तरंशतमिति। संकलनयोक्तसंख्येत्यर्थइत्याहुः। अतएवततोऽग्निमुपसमाधायप्रागु
दगग्रैर्दर्भैरग्निंपरिस्तरणातियथोत्तरेणपूर्वेणवेत्युपहितमुदकंवहिर्भवतितथापरि
स्तरणातिप्रागग्रैरुदगग्रैश्चपश्चिमपूर्वाः प्रागग्रादक्षिणोत्तरा उदगग्राः पश्चात्पुरस्ताच्च
दक्षिणपरिस्तरणंतुनेरान्करोतिउत्तरानधरानपिच्येषुदक्षिणाग्रैः प्रागग्रैश्चपरिस्त
रणमुत्तरेणाग्निंकुशान्संस्तीर्यतेषुकुशेषुदेवानिपात्राणिद्वंद्वंन्यंचिप्रयुनक्तिद्वंद्व
अधोबिलेप्रयुंज्यादित्यर्थोऽद्वत्यंङ्घिलासंगच्छन्ते। द्वंद्वंन्यञ्चिपात्राणिप्रयुनक्ति। अधोमु

© Dharmartha Trust J&K. Digitized by eGangotri

स्वे द्वे द्वे पात्रे युगपत्प्रयुंज्यात्। तथा च यदेकमेकं संभरेत्यत्र देवत्यानि स्युर्यत्सह सर्वा
१३० णि मानुषाणि द्वे द्वे संभरति याज्यानुवाक्ययोरेवरूपं करोतीति श्रुतिः सूत्रे च प्रागुक्तमे
130
व। मानुषाणि पात्राणि सकृदेव प्रयुनक्ति पित्र्याणि पात्राणि एकैकशः प्रयोक्तव्यानि तनो
दर्शपूर्णमासवत्पवित्रसंस्कारं प्रोक्षणीसंस्कारं पात्रप्रोक्षणं च वक्ष्यमाणप्रकारेण तू
ष्णीं करोतीत्यंह्लिलाचार्या दर्व्याज्यस्थाल्यौ प्रोक्षणपूर्णपात्रे इध्मस्रुवावितीउपाकर्मणि
यज्ञोपवीतसक्तुहोमगृहीतत्वपक्षे जुहूस्तत्स्थानीयमध्यमपर्णस्य वा संस्कारः आति
देशिको न तु तद्गृहीतत्वपक्षे। चतुर्गृहीतत्वरूपसंस्काराभावात्। एवमुत्सर्जने जुहू
तत्प्रतिनिध्योरभाव एव। प्रयोजकतत्संस्काराभावात्। संहितायां स्रुक् स्रुवो तेजसो
ग्राह्यो न कांस्यायससीसकौ। यज्ञदारुमयो वा तु पर्णो वा पिप्पलोद्भवैः। तथा पलाश १३०

© Dharmartha Trust J&K. Digitized by eGangotri

पत्रे निश्छिद्रेकृचिरे स्रुक्स्रुवौ मुने। विदध्याद्वाश्वत्थपत्रैः संछिन्ने होमकर्मणीति। मध्य
मेन पर्णेन जुहोतीति श्रुतिश्च। अत एव मध्यमपर्णयुतपलाशपत्रावल्या नमुं जीनेति
निषेधः। ननु द्वितीयाघारे स्रुचा द्वितीयाहुतिनिमित्युक्तत्वात् उत्सर्जनेपि दर्व्या आवश्यक
त्वा। किंच कर्ममात्रे आघारस्य सत्त्वेनाज्यमात्रहोमे कथमनावश्यकत्वं ब्रूषे इति चेत्।
सत्यं मुख्याभावे स्रुवेणैव तदिति वृद्धाचारात्। एवं चोत्सर्जने जुहूस्थाने स्रुवं इति स्रु
वाज्यस्थाल्यो प्रोक्षणपूर्णपात्रे इध्मं च तृणं चेति पात्रप्रयोगनियमः। एवं च यत्र यत्रा
ज्यमात्रहविष्कहोमस्तत्रैवं निर्णय इति केचित्। स्विष्टकृति चतुरवदानार्थं असंभवे त
थाचारेपि संभवे तथैवयुक्तमिति च तदावश्यकत्वमित्यन्ये। समौ साग्रौ दर्भौ प्रादेशमा
त्रौ पवित्रे कृत्वा साग्रौ अप्रच्छिन्नाग्रौ तन्निर्माणं अनुमार्जनादिकं च तूष्णीं तृणं काष्ठं

© Dharmartha Trust J&K. Digitized by eGangotri

वाऽन्तर्धायछिंद्यात् ननखेनेतिछित्वाऽप उपस्पृशेत्। ततअद्भिरनुमज्य॰ मूलादार
१३१ भ्याग्रपर्यंतं प्रोक्ष्य प्रोक्षणपात्रे निधाय प्रोक्ष्य प्रोक्षणपात्रे पवित्रस्थापनानंतरं पुनस्ते
प्रोक्ष्येत्यर्थः। अपरेणाग्निं पवित्रांतर्हिते पात्रेऽप आनीय हस्तयोरंगुष्ठोपकनिष्ठिका
131 भ्यामुदगग्रेगृहीत्वा प्राचीस्त्रिरुत्पूय पात्राण्युत्तानानि कृत्वेध्मं च विस्रस्य त्रिः प्रोक्षती
ति पात्रेऽपो आनीयो प्रोक्षणपात्रे नाभिरद्भिः सपवित्रेण पाणिना त्रिः प्रोक्षेत्। शिष्टः स्प
ष्टार्थः। ततः पूर्णपात्रमादाय पूर्ववत्कृत्वा मुखसममुद्धृत्योत्तरेणाग्निं दर्भेषु सादयि
त्वा दर्भैः प्रच्छाद्य ब्राह्मणं दक्षिणतो दर्भेषु निषाद्येति प्रणीतास्थानीय पूर्णपात्रमग्नेः प
श्चात्संस्थाप्य सर्वं प्रोक्षणपात्रं वत्कृत्वा प्राणैः सममुखपर्यंतमुद्धृत्य पात्रासादन
तो दक्षिणतोऽग्नेश्चोत्तरतो दर्भेषु तदासादयेदित्यर्थः। उत्तरेणाग्निमित्यत्र पुनरग्नि १३१

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रहणं तु शिघ्रः स्पष्टार्थ इति। आज्यं विलाप्य। विलीनमविलीनं वाज्यमदृष्टार्थं विला
पयेदित्यर्थः। अपरेणाग्निं पवित्रान्तर्हितायामाज्यस्थाल्यामाज्यं निरूप्योदीचोंऽगारान्निरू
ह्य तेष्वधिश्रित्य ज्वलताऽवद्युत्य द्वे दर्भाग्रे प्रत्यस्य। आज्यं निरूप्येति ह्रस्वमध्यः पाठः। व
पू धातोः ल्यपि सम्प्रसारणेहि रूपं प्रघासान्निरूप्य तेइति श्रुतिरपि प्रसिद्धा। निर्वा
पं कृत्वेत्यर्थः। धातूनामनेकार्थत्वात्। निरू[illegible] इति तु दीर्घमध्य एव। उक्तप्रक्रियया हि
ऊहते रूपं न तत्तो निःसार्य संस्थाप्येत्यर्थः एवमेव प्रत्यूह्येत्यपि। प्रकृति[illegible] तेऽ[illegible] प्रत्या
वृत्य प्रक्षिप्येत्यर्थः। उक्तहेतोः। उपसर्गो ह्रस्व इति ह्रस्वत्वकृतो। निर्प्रत्यो निर्गमन प्रत्या
वृत्त्यर्थान्वयित्वेन संस्थापनप्रक्षेपरूपधात्वर्थान्वयित्वाभावेन यत्क्रियायुक्ता इति
वचनादुपसर्गत्वाभावात्। अत एवोदीचोंऽगारान्निरूह्याधिश्रयतीत्यादिश्रुति

© Dharmartha Trust J&K. Digitized by eGangotri

रपिसंगच्छते। प्रत्यूहे स्वत्रस्कत्यादौ क्वचिद्यदि ह्रस्वघटितपाठोपलब्धिस्तर्हि वहते रूपेण
१३२ निर्वाह इति बोध्यं। एवमेवेतीद्र्दूत्याः प्रतिवाचमर्धे प्रत्यूहस्वसैषा मिथेव यस्या इति नैषधप्र
ष्ठसर्गस्य प्रश्नोत्तरश्लोके ह्रस्वपाठे दीर्घपाठे चेवबोध्यं अनेकार्थत्वाश्रयणस्य तुल्यत्वात्। व
कृत्वं विवक्षितं ज्वलतानलेनाधोगामिन्यादीर्घ्याऽवद्योतयेत्। इदमाग्रेऽनियततायामे
132 पूर्ववक्त्रोरनं ननखेनेति बोध्यं। तोरनोत्तरमप उपस्पृश्योत्ततोऽद्भिः प्रक्षाल्य युगपदा
ज्येनिक्षिपेदित्यर्थः। त्रिः पर्यग्निकृत्वा उदग्गुह्यस्यांगारानुत्सृष्टोदगग्राभ्यां पवित्राभ्यां पु
नराहारं त्रिकृत्सूयपवित्राग्रे थिंवि स्वस्याद्भिरनुमृज्य प्रागग्रे पवित्रे अग्नौ अनुप्रहरन्ति।
ततोज्वलदुल्मुकेन कुशेन वा ज्वलता पूर्ववत् त्रिः पर्यग्निकरणं। अंगाराणमग्नेः पुनः
प्रक्षेपो न आपवर्हे कर्मणि लौकिकः संपद्यत इति न्यायादिति केचित्। वस्तुतस्तु आवद्यो १३२

© Dharmartha Trust J&K. Digitized by eGangotri

तनपर्यग्निकरणाग्नेर्यदामुख्याग्नेरुपादानं तदाऽपवृत्तकर्मत्वेनलौकिकत्वात्तत्त्यागः
।यदातूदकुस्थागारादवधानतनादितदातूदकुस्थेनसहमुख्यएवनिक्षेपोनत्यागः।य
तउदकुस्थागाराणामपवृत्तकर्मत्वेपिनत्यागः।प्रत्यूहनविधानसमर्थ्यानूउदकुस्थां
गारानूमुख्याग्निनासंयोज्येतितदर्थादितिनमाख्यातारइतिबोध्यं।तत्काप्रत्ययोनत्वात्तद
व्यवहितमुद्वासितपात्रकदेशस्थितेएवाज्यपात्रेत्रिरुत्पवनं।पवित्रप्रक्षेपोत्तरमेवाज्य
स्याल्याग्ने।पश्चादानयनंन्याय्येनतुतत्रानीयत्रिरुत्पवनंवचनाभावात्।केचिदग्नेःप
श्चात्स्वस्थानेआज्यपात्रंपुनराहारंपुनराहृत्यत्रिरुत्पवनंकुर्यादित्यर्थः।अन्यथापुन
राहारमित्यस्यवैयर्थ्यापातादितिवदंति।नचिंत्यं।प्रमाणाभावात्।पुनराहारपदंतुआ
ज्यस्यपूर्वभागतआरभ्यपश्चाद्भागंपवित्रेनीत्वापुनस्ततएवपूर्वदेशेनसंयोज्येत्यर्थ

© Dharmartha Trust J&K. Digitized by eGangotri

कंसत्तथाकृत्वात्रिरुत्पवनमितिआज्यसंस्कारेनियमंबोधयितुंप्रोक्षणपात्रेतुपुनरा
१३३ हरणपूर्वकंनकिंतुप्राक्संस्थंत्रिरुत्पवनमात्रमेवेतिबोध्यं।अग्रमध्यमूलानिअनुक्रमे
णवह्नौप्रहरेदित्यर्थः।शिष्टंस्पष्टं।स्रुक्स्रुवावग्नौप्रतितप्यदर्भाग्रैःसंमार्ष्टिस्रुवमग्रैरं
तरतोभ्याकारंसर्वतोबिलमभिसमाहारंमूलैर्दंडंजुहूमग्रैरंतरतोऽभ्याकारंप्राचीमध्ये
133 र्बाह्यतःप्रतीचीमूलैर्दंडंपुनःप्रतितप्यप्रोक्ष्यनिधायदर्भानद्भिःसंस्पर्श्याग्नौप्रहरति
स्रुक्शब्देनहोमसाधनंभूतादर्वीतत्प्रतिनिधिर्वाएवंचयस्मिन्कर्मणिदर्व्योःप्राप्तिस्तत्रा
यंसंस्कारोज्ञेयः।उत्सर्जनेतुतदभावात्तत्स्थानेकल्पिताज्यहोमसाधनस्रुवस्यैवसंस्का
रःमतोनंतरमपिप्रागुक्तेयत्रचास्याःसंस्कारस्तत्रपूर्वंस्रुक्स्रुवौक्रमेणवामदक्षिणहस्ता
भ्यामादाययुगपदग्नौप्रताप्यततोवामांगुलीषुस्रुक्स्रुवौधृत्वादर्भाग्रैःसंमार्ष्टिउभा १३३

© Dharmartha Trust J&K. Digitized by eGangotri

विति शेषः संमृज्यादित्यर्थः इदमुपलक्षणं येन जुहोति तस्य संस्कारः कार्यः अत एव ये
न जुहोतीति सूत्रे दर्व्यञ्जलिना वेति तेनोक्तं । तत्प्रकारमाह । स्रुवमग्रे इत्यादिमूले दंडमि
त्यंतेन स्रुवमग्रे अंतरतोऽभ्याकारं । एतमुक्तं तमेनन्तू । एवं समाहारमित्यपि । एवं च दक्षिण
हस्तस्य दर्भाग्रैः स्रुवबिलस्यांतरभ्याकृत्य संमार्ज्य इत्यर्थः । तथा तैरेव स्रुवबिलस्य पाव
दुपरितनभागमभिसमाहृत्य संमार्ज्य ततः कुशमूलैः स्रुवदंडमभिसमाहारं दंडं तस्या
नहस्तं स्रुवसर्वतो मार्जयित्वा इति स्रुवसंस्कारं कृत्वाऽथ जुह्वाः संस्कारः जुहूमिति पूर्ववद
क्षिणहस्तेनांगुलिस्थापितस्रुक्स्रुवावादाय स्थापितदेशं प्रदक्षिणीकृत्य मध्यांगुल्यो
र्व्युत्क्रमेण स्रुक्स्रुवौ संस्थाप्य तिवदुकारिकाकारोक्तक्रमं एवं कृत्वा पश्चात् जुहूमग्रे
रिति संस्कारो बोध्यः ततश्च जुहूं तत्स्थानीयां स्रुचं वा अंतरतः घृताधारभागं गृहीतद

© Dharmartha Trust J&K. Digitized by eGangotri

भौग्नेरभ्याकारमभ्याकृत्यसम्यक्मार्जयित्वा ततोमध्येस्तद्दर्भमध्यैः प्राचीमुपरितनप्राग
१३४ ग्रभागंयावत्संमार्ज्यतेनैववाह्येनस्तदूर्ध्वभागतः प्रतीचीमुग्विलप्रतीचीपर्यंतंसंमार्ज्य
कुशमूलैर्दंडंतत्स्थानहस्तंचसंमार्ज्यस्रुवंतेनैवंतद्दर्व्याः संस्कारविशेषंकृत्वापुनरग्नौ
उभौप्रतितप्यप्रोक्ष्याज्यस्थालीं तदुत्तरतःक्रमेणनिधायस्पर्शः। शिष्टंस्पष्टं। अत्रदर्भा
134 ग्रमध्यमूलानांमार्जनमुक्तंतत्त्रिवारंप्रत्येकंकुर्यादितिबोध्यं। अग्निंपरिस्ततत्कुशयो
र्मध्येपरिधीन्परिदधाति। स्थविष्ठंपश्चाद्दक्षिणतोऽणीयांसंदीर्घंआणिष्ठंह्रस्वमुत्तरतउद
गग्रंमध्यमंप्रागग्रावित्तरोमध्यमंपरिधिमुपस्पृश्यपुरस्तादूर्ध्वे द्वेआघारसमिधावाद
धाति। आग्नेयस्थालीपाकवर्जंसांगविवाहोपनयनसमावर्तनसीमंतचौलगोदानप्रा
यश्चित्तेषुपरिधिस्थानेशम्याभवंतीतिसौत्रादिसमयात् बिल्वखदिरपलाशान्यतम १३४

© Dharmartha Trust J&K. Digitized by eGangotri

निर्मिताः शम्यास्तूष्णीं परिदधातीत्यर्थः। आघारसमिधोर्मध्ये एका माग्नेय्यामन्यामीशान्या
मग्निनिकटे आदध्यादित्यर्थः परिधित्रयस्यायाम स्तु प्रादेशत्रयं। पाश्चात्यपरिधेरंगुष्ठा
ग्रपर्ववत्स्थौल्यं। दक्षिणपरिधेस्तर्जन्यग्रपर्ववत्स्थौल्यं मध्यात्किंचिद्दीर्घं उत्तरपरिधेर्मध्य
मांगुल्यग्रपर्ववत्स्थौल्यं प्रादेशात्रयात्किंचिन्न्यूनं। आघारसमिधोस्तु कनिष्ठिकाग्रपर्व
वत्स्थौल्यं। आयामस्तु प्रादेशमात्रमिति विवेकः। अग्निं परिषिच्य। परिध्याज्यादिकं विहाय
न तु नत्सहितमग्निं अग्निपदोल्लेखात् अदितेनुमन्यस्वेति दक्षिणेनोदक्षिणस्यां प्राचीनं
प्रागपवर्गमनुमतेनुमन्यस्वेति पश्चात्पश्चिमायामुदीचीनमुदक्संस्थं सरस्वतेनुमन्य
स्वेत्युत्तरत उत्तरस्यां प्राचीनं प्राक्संस्थं कुर्यात्। देव सवितरिति मंत्रेण चेशानीमारभ्येशा
नीपर्यंतं चतुर्दिक्षु परिषिंचेत् अत एव समंतमिति सूत्रे उक्तं नथापेत् केषु मासिश्राद्धादि

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मसुसमंतमेवाप्रदक्षिणं तत्स्त्रीपरिषेचनं वोध्यं समिधमेकां तत्संनहनेचावर्हिंष्प्र
१२५ जापतयेस्वाहेति पंचदशेध्ममादधाति इध्मानादधातीत्यपपाठः इध्मशब्दस्यनित्यनपुंस
कत्वात् अनन्तावसूत्रेन तथैवोक्तं इध्मश्चमहत्यत्र तु छांदसत्वात्पुंस्त्वं पंचदशसंख्याकदारुक
मिध्मं अनामिकाग्रपर्ववत्स्थूलं मायामतोद्विःप्रादेशं आहवनीयश्रौतादिकाष्ठसमूहं दक्षिणे
135 नकरेणवामे निधायादितः प्राक्संस्थं स्रौवेणाज्येन तत्स्त्रीमासिच्योक्तमंत्रवोध्यप्रजापति
देवतां ध्यात्वा ब्राह्मणेनानुज्ञातस्तूष्णीमग्नावादध्यात्तत्स्यागमुच्चारयेत् अत्र प्रमाणं का
रिका। समित्काष्ठस्यचेध्मस्य परिधीनां यथाक्रमात्। स्थौल्यं प्रमाणं विज्ञेयं वृद्धाचारा
च्चशास्त्रतः। कनिष्ठिकाग्रपर्वणो यावत्स्थौल्यं प्रतीयते। तावत्स्थूलं समित्काष्ठं गृह्यभा
ष्याद्विनिश्चितं। तथैवानामिकाग्रस्य चेध्मकाष्ठस्य मानतः। एतदंतेन स्थौल्यमुक्तं अत्र १२५

© Dharmartha Trust J&K. Digitized by eGangotri

थ्यायाममात्रशिष्ठांगुलित्रिकस्योर्ध्वमानाः परिधयः खलुः। तत्रापि नारत्न्याद्विस्थविष्ठा
दिक्रमो भवेत्। समित्यविवृत्ते वेदिश्चत्र यः प्रादेशसंमिताः। द्विस्त्राविधानानि कुर्वीत त्रिस्ताव
त्परिधिः स्मृतः इति आयामस्योल्पनिरूपणं। प्रादेशतालगोकर्णस्तर्जन्यादियुते नतेऽङ्
गुष्ठसकनिष्ठस्युर्वितस्तिर्द्वादशांगुला इति प्रादेशादिलक्षणं। ततः स्रुवेण ज्यमादायोत्तरं
परिधिसंधिमन्ववहृत्य प्रजापतिं मनसा ध्यायन् दक्षिणप्राञ्चमृजुं संततमाघारयति स्रु
वाद्वितीयमैन्द्रमितरः संधिमन्ववहृत्य प्रागुदञ्चमिति। दक्षिणप्राञ्चं प्रागुदञ्चमित्यनयोर
रयमर्थः दक्षिणस्याः प्राच्याश्चान्तरालं भवादिक् दक्षिणप्राङ् आग्नेयीत्यर्थः। एवं प्राच्याउ
दंचश्चान्तरालं भवादिक् प्रागुदङ् ईशानीत्यर्थः। अत्राद्ये प्राच्योश्चेति द्वितीये उदीच्याश्चे
ति विग्रहे ऽन्याय्यः यतः पुंवद्भावानापत्त्यात् दक्षिणप्राचीमित्यापद्येत द्वितीयेपि दक्षिणत्रा

© Dharmartha Trust J&K. Digitized by eGangotri

द्रवत् प्राचीशब्दे पुंवत्त्वेपि उदीचीशब्दे तदभावस्याप्रागुदीचिमिस्यापद्येत। अतः प्रजार्थको
१३६ चत्संतेन षष्ठ्यंतेन विग्रह उचितः अत एव स्मनकारकश्च वर्णं। लक्षणया तत्तद्दिक्पर्यंतम
र्थः। तथा च वायव्यकोणमारभ्य आग्नेयकोणपर्यंतमनवच्छिन्नघृतधारं पूर्वं वह्देवतांध्या
यन्स्रुजुहं सेतत्तेज्योतिष्मत्या जुमाघारयन्सर्वाणि धर्मकाष्ठानि संस्पर्शयन्तूष्णीं हुत्वा
136 प्रजापतय इदं न ममेति सम्यगुच्चार्य त्यागं कृत्वा पुनः स्रुवेणाज्यमादाय दर्वीस्रुचे वा संपू
र्य दक्षिणे परिधिसंधिमन्ववहृत्य निर्ऋतिकोणमारभ्य ईशानकोणपर्यंतं तथैव घृतधा
रां ऐंद्रं इंद्रदेवताकमिंद्राय स्वाहेति मंत्रं सम्यगुच्चार्य हुत्वा तथा त्यागं इति द्वितीयमाघा
रणम्। तथा च आपस्तंबः। मंत्रांतैः कर्मादीन्संनिपातयेदिति अस्यापवादः आघारे धा
रायां चादिसंयोग इति मंत्राणमंतामंत्रांत्ताः कर्मणामादयः कर्मादयः संनिपातः संवं १३६

धः आघारः स्रुत्वादिधारावसोर्धारादीति पूर्त्तं मंत्रप्रकाशितस्यानुष्ठितस्य कर्मणो निः
श्रेयसकरत्वान्मंत्रोच्चारणेन पूर्वं भवितव्यमनंतरं कर्मणा अतो मंत्रांतकर्मयोः संनि
पात इति कपर्दी मंत्रांते मंत्रसमाप्तिभिः कर्मादीन् कर्मोपक्रमान् संनिपातये योजयेत् स
मग्रं मंत्रं पठित्वा कर्म कुर्यादित्यर्थ इति महार्णवकृत् मंत्रांते कर्मारंभ इति वृत्तिः ई इधमा
घारद्वयं वौधायनस्यापि संमतं यदानुद्दितीयाघारे प्रजापतेरेव देवतात्वं तदा प्रथमा
घारवत्सर्वं वोध्यं। इदं द्वितीयमाऽविलाकारेण दर्शपूर्णमासवत् स्रुमिति ग. सू. सूत्र
स्वारस्यात्प्रथमपक्षे तेनोक्तमिति वोध्यं। तैत्तिरीयाणामिदमेव युक्तमिति स्पष्टं ग. सू
व्याख्यायां अथाज्यभागौ जुहोत्यग्नये स्वाहेत्युत्तरपूर्वदेशे सोमाय स्वाहेति दक्षिणपूर्व
देशे समं पूर्वेण। प्रथममाज्यभागं स्रुवेणाज्यं गृहीत्वा मंत्रमुच्चार्येशानदेशसमीपे जुहु

© Dharmartha Trust J&K. Digitized by eGangotri

यात्त्यागं च कुर्यात्पुनर्द्वितीयमाज्यभागं स्रुचाज्जुहुयादाग्नेयदेशसमीपेऽन्यत्सर्वं प्रथम
१३७ वत्। उत्तरा च पूर्वा चेति द्वंद्वं कृत्वा तयोर्मध्यवर्ती देश इति दिङ्नामेति समासे एवं तत्पूर्वो
त्तरदेशशब्दस्य कर्मधारय इति वा समासः उभयत्रैशान्यामित्यर्थः एवं दक्षिणा च पूर्वा
चेति द्वंद्वं कृत्वा तयोर्मध्यवर्ती देश इति समासः तत्राग्नेय्यामित्यर्थः पूर्वोक्तद्वितीयपक्षो
137 ऽत्रापि प्रागुदीच्यां दक्षिणपूर्वस्यामिति च यथाक्रमं व्याख्यातं सुदर्शनाचार्यैः अग्नए वा
ग्नये स्वाहेत्युत्तरार्द्धपूर्वार्द्धे सोमाय स्वाहेति दक्षिणार्द्धपूर्वार्द्धे इति गृह्यसूत्रेऽर्द्धपदद्वय
घटितपाठः संगच्छते। उत्तरार्द्धं च पूर्वार्द्धं चानयोः समाहार इति तदर्थः एवमुत्तरत्रापि
स च समाहार ईशान्यामाग्नेय्यामेव च संभवति। क्वचित्सूत्रोत्तरे उत्तरपूर्वार्द्धे दक्षिण
पूर्वार्द्धे इत्येकार्द्धपदघटितः पाठोऽस्ति तत्रापि तयोरर्द्धे इति बोध्यं — — स्मभदलिखि १३७

© Dharmartha Trust J&K. Digitized by eGangotri

तदेशपदघटितसूत्रंतुनोपलभ्यतेइतिवोध्यम्।।नागरस्यसूत्राणांप्रागुदीच्यांदक्षिण
पूर्वस्यामितितत्रव्याख्यानुरोधेनानेकसमासकल्पनयाईशान्यादेर्होमाधारताव्याख्या
ता।।आज्यभागप्रशंसकयोश्चक्षुषीवाएतेइतितैत्तिरीयश्रुतितन्त्राप्याययोपर्यालोचनेतू
क्तसर्वगन्धस्यपूर्वत्तरार्धेपूर्वार्द्धत्वंपदोदग्धइतिवदारोप्यकर्मधारयएवकर्त्तव्यइतिल
भ्यते।तथाचैकस्यांपूर्वार्धेपक्षौउत्तरदक्षिणदेशक्रमेणशाब्दनएवैच्छिकहोमाधारदेशो
लभ्यतेनत्वीशानीतितत्त्वज्ञैर्यथान्यायमनुष्ठानेससंप्रदायंवोध्यंइतिकेचित्तुवस्तुतःउ
क्तश्रुतिबलात्षष्ठीसमासोराजदन्तादित्वंचेतिवोध्यं।अत्रएतावान्विशेषः।अग्निमध्य
मवधिंकृत्वाऽरध्यानवच्छिन्नाज्यधारयेशानदिक्पर्यन्तमग्निमध्येएवजुहुयात्तथा
यावत्येवान्तरेपूर्वंआज्यभागोहुतस्तावत्येवान्तरेतथैवमध्यादाग्नेयदिक्पर्यन्तंतन्म

© Dharmartha Trust J&K. Digitized by eGangotri

ध्येद्वितीयं जुहुयादिति समं पूर्वेणेत्यस्यार्थः अनएव समपदस्वारस्यमस्याश्च स्रुषीत्वं चो
१३८ पपद्यते। न तु एकस्य द्वयोर्वा आहुतिप्रक्षेपः पुनरित्यर्थः सर्वमेतत्कपर्दिमतेनोक्तं। तथा
न्यदपि। प्रथमाघारहोमश्च प्रधानाहुत्यनंतरं। यद्वोतव्यं तु तत्सर्वं स्रुवेणोक्तं कपर्दिना
द्वितीयाघारहोमश्च प्रधानाहुनयस्तथा। आज्यभागौ तु सर्वत्र स्रुचा होमः कपर्दिनेति। ए
138 वं चाज्यभागद्वयमपि स्रुचैवेति मते इति प्रतीयते। आहुतिप्रमाणमुच्यते। पाण्याहुतिर्द्वाद
शपर्वपूरिका रसाहुतिः स्यात् स्रुवमात्रपूरिकेति। ततोऽग्नये स्वाहेति मुखाहुतिं हुत्वा त्यागं
कुर्यात् उक्तं च कर्मस्वौषधिमत्स्वेव व्रतेषु हि चतुर्ष्व[illegible]पि मुखाहुतिरवश्यं हि सर्वाचार्यैः स्मृति
श्चितेति। एवं चोत्सर्जनेन मुखाहुतिः ततो यथोपदेशं प्रधानाहुती हुत्वा। यस्मिन्यस्मिन्क
र्मणि याया: प्रधानाहुतयो येन येन मंत्रहविरवदानादिविधिनोपदिष्टास्तास्तास्तेन ते १३८

नविधानेन होतव्याः। इदमग्निमुखं सर्वकर्मसाधारणं। प्रकृते उपाकर्मप्रयोगे वेदव्रते
षु चतुर्षु तथैवोत्सर्जने षु च। उपाकर्मणि तद्वच्च स्विष्टकृत्सदसस्पतिः। यदग्निः सदसस्प
तिः स्मार्त्तकर्मणि चोदितः। स्विष्टकृद्धोम इत्येकस्त्रिविधः कर्मभेदतः। यदस्येति स्विष्टकृते
व्याहृतीनामनंतरमिति वचनात्तु व कांडऋषिहोमोत्तरं सदसस्पतिमद्भुतमिति मंत्रेण स्वि
ष्टकृतं कृत्वा तिलान्जुहोमीत्यादि मंत्रैस्तिलाज्यसंस्कृतसक्तुं जुहुनेत्। तथा च पूर्णश्रमः तिल
प्रयोजितान्सक्तूंस्तिलानित्यादि मंत्रकैः नवाज्यहोमकं कृत्वा हुनेद्यथाविचक्षणः सक्तुघना
कया स्रुच्या। हविरादाय पुनस्तथा। संस्कुर्याद्धविरातेच स्रुचं चैव पुनः क्रमः। सक्तुहोममभि
व्याप्य चतुर्वीरं यथाभवेत्। विमुच्यते ध्रुवं जुह्वन्समस्तात्पातकात्तु द्विजः। श्रियं वलादि संप
त्तिं समाप्नोति सुनिश्चितं ब्रूते पूर्णश्रमः। स्मरस्यं ततो यज्ञोपवीतकं। संकल्प्य चाथ गायत्र्या सं

© Dharmartha Trust J&K. Digitized by eGangotri

स्कृत्यविधिवत्ततः। स्रुचं संस्कृत्य संस्थाप्य संस्कृत्यमनु नाक्षिपेत्। संस्त्यागमग्नावेषोऽत्रक्रमो
१३९ मूलं तु संस्मृतेः। उभयत्र स्वगृह्यादिसूत्रे नास्त्येव यद्यपि। तथापि न तद्द्वयोर्हीमकथं चिदुप
लभ्यते। तथाहि। यज्ञोपवीतानि नवानि कृत्वा तदुक्तमंत्रेण हुनेद्यथाग्नौ। स्वयं तु देवात्मपितृ
139 भ्य इत्थं दद्यात्ततो धार्यमिति प्रसिद्धमिति निःसत्यव्रतोक्तिः। वेदारंभणतः पूर्वं सक्तुप्रशनतः परं न
वयज्ञोपवीतानि हुत्वा दत्वा च धारयेत्। इति कार्ष्णाजिन्युक्तिः। कृत्वा यज्ञोपवीतानि नवानि
द्विजसत्तम। हुत्वाग्नौ गुरवे दत्वापि तेभ्यो धारयेत्तत इति गालवोक्तिश्चेति। केचित्तु धारण
वत्संस्कारमकृत्वा ग्रंथिरहितमेव यज्ञोपवीतं जुहुति। तत्र मूलं मृग्यं। संस्कारं ब्रह्मग्रंथिं
च विना यज्ञोपवीतत्वस्यैवाभावात्। ततो ग्रंथिविस्रस्य त्यागः इति केचित्। नथैव त्यागइत्य
न्ये। अत्र दंडो ध्येयः। बहूनां गृह्यसूत्रे रधिसक्तुहोमस्योक्तत्वादनुष्ठानवत् यज्ञोपवीतहोमस्या १३९

© Dharmartha Trust J&K. Digitized by eGangotri

नुक्तत्वेप्यनुष्ठानं। सामवेदिनां तु स्वसूत्रे उभयोरनुक्तत्वादननुष्ठानं। तथा वाजसनेयि
नां स्वगृह्ये ऽविहितत्वान्नयोरननुष्ठानं। तैत्तिरीयाणां तु स्वगृह्ये ऽविहितत्वेप्यनुष्ठानं।
तस्मात्स्वे संप्रदाय एव शरणमिति। तथा च सकृत्होमोत्तरं यज्ञोपवीतहोमः स च ग्रंथिं वि
मुच्य कार्यस्ततो ऽस्य ब्याद्युद्देशेन द्विजेभ्यो दत्वा विधिवत्संस्कृत्य धारयेत्॥ अथ स्पष्टार्थं
प्रयोगक्रम उच्यते। एवं विधपौर्णमास्यां शिष्यैः सहाचार्यस्तीर्थादिका स्नुस्नात्वा प्राणाना
यम्य अध्यायोपाकर्म करिष्य इति संकल्प्य निवीती भूत्वा प्रजापतिं कांडर्षिमावाहया
मि। सोमं कांडर्षिमावाहयामि। अग्निं कांडर्षिमावाहयामि। विश्वान्देवान्कांडर्षीनावा
हयामि। सांहितीर्देवता उपनिषद आवाहयामि याज्ञिकीर्देवता उपनिषद आवा
हयामि। वारुणीर्देवता उपनिषद आवाहयामि। ब्रह्माणं स्वयंभुवमावाहयामि। स

© Dharmartha Trust J&K. Digitized by eGangotri

दसस्पतिमावाहयामि इति तंडुलकृतस्थंडिले एतान्ऋषीनावाह्य षोडपचारैराराध्य न
१५० वर्षीणां तर्पणं कृत्वा अग्निप्रतिष्ठापनाद्याज्यभागांते स्रुचाऽऽज्यमादाय अग्नये स्वाहा
अग्नय इदं इति मुखाहुतिं जुहुयात् मादाय प्रजापतये कांडर्षये स्वाहा प्रजापतये कां
150 डर्षय इदं। सोमाय कांडर्षये स्वाहा। सोमाय कांडर्षय इदं। अग्नये कांडर्षये स्वाहा। अग्न
ये कांडर्षय इदं विश्वेभ्यो देवेभ्यः कांडर्षिभ्यः स्वाहा। विश्वेभ्यो देवेभ्यः कांडर्षिभ्य इदं सा
ंहितीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा। सांहितीभ्यो देवताभ्य उपनिषद्भ्य इदं
। याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्य इदं। वारु
णीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा। वारुणीभ्यो देवताभ्य उपनिषद्भ्य इदं। ब्रह्मणे स्व
यंभुवे स्वाहा। ब्रह्मणे स्वयंभुव इदं। सदसस्पतये स्वाहा। सदसस्पतय इदं। सद १५०

© Dharmartha Trust J&K. Digitized by eGangotri

सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं।सनिंमेधामयासिषंंस्वाहा।सदसस्पतयइदं।इ
यमाहुतिःस्विष्टकृत्स्थानीया।ततःसक्तुभिर्जुहोति।तिलान्जुहोमिसरसांंसपिष्टां
गंधारममचित्तेरमंतुस्वाहा।मंत्रोक्तदेवताभ्यइदं।गावोहिरण्यंधनमन्नपानंंसर्वे
षांंश्रियैस्वाहा।मंत्रोक्तदेवताभ्यः।श्रियंचलक्ष्मिंचपुष्टिंचकीर्त्तिंचानृण्यतां।ब्रह्मण्यं
वहुपुत्रतां।श्रद्धामेधेप्रजाःसंददतुस्वाहा।मंत्रोक्तदेवताभ्यइदं।तिलाःकृष्णास्ति
लाःश्वेतास्तिलाःसौम्यावशानुगाः।तिलाःपुनंतुमेपापंयत्किंचित्दुरितंमयिस्वाहा
।मंत्रोक्तदेवताभ्यइदं।चोरस्यान्नंनवश्राद्धंब्रह्महागुरुतल्पगः।गोस्तेयंसुरापानं
भ्रूणहत्यातिलाःशांतिंंशमयंतुस्वाहा।मंत्रोक्तदेवताभ्यइदं।श्रीश्चलक्ष्मीश्चपुष्टी
श्चकीर्तीश्चानृण्यतां।ब्रह्मण्यंवहुपुत्रतां।श्रद्धामेधेप्रज्ञातुजातवेदःसंददातुस्वाहा।

© Dharmartha Trust J&K. Digitized by eGangotri

मेत्रोक्तदेवताभ्यइदं।प्राणापानव्यानोदानसमानामेशुध्यंतांज्योतिरहंविरजाविपा
२५१ प्माभूयासꣳस्वाहा।मेत्रोक्तदेवताभ्यइदं।वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुध्या
कूतिःसंकल्पामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासꣳस्वाहा।मेत्रोक्तदेवताभ्य
(141) इदं।त्वक्चर्ममाꣳसरुधिरमेदोमज्जास्नायवोस्थीनिमेशुध्यंतांज्योतिरहंविरजा
विपाप्माभूयासꣳस्वाहा।मंत्रोक्तदेवताभ्यइदं।।शिरःपाणिपादपार्श्वपृष्ठोरूदरजं
घशिश्नोपस्थपायवोमेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासꣳस्वाहा मंत्रोक्तदे
वताभ्यइदं।उत्तिष्ठपुरुषहरितपिंगललोहिताक्षदेहिदेहिददापयितामेशुध्यंतां
ज्योतिरहंविरजाविपाप्माभूयासꣳस्वाहा।मंत्रोक्तदेवताभ्यइदं।पृथिव्यापस्तेजोवायु
राकाशामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासꣳस्वाहा।मंत्रोक्तदेवताभ्यइदं।शब्द २५१

© Dharmartha Trust J&K. Digitized by eGangotri

स्पर्शरूपरसगंधा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। मंत्रोक्तदेव
ताभ्य इदं। मनोवाक्कायकर्माणि मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा।
मंत्रोक्तदेवताभ्य इदं। आत्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। मंत्रो
क्तदेवतायै। अंतरात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। मंत्रोक्त
देवतायै। परमात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। मंत्रोक्तदे
वतायै स्वाहा। क्षुधे इदं॰। क्षुत्पिपासाय स्वाहा। क्षुत्पिपासाय इदं॰। विविद्यै स्वाहा। विवि
द्यै इदं। स्रग्विधानाय स्वाहा। स्रग्विधानाय इदं॰। कषोत्काय स्वाहा। कषोत्काय इदं॰। क्षुत्पि
पासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहं। अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानं स्वा
हा। मंत्रोक्तदेवताभ्य इदं॰। अन्नमय प्राणमय मनोमय विज्ञानमय मानंदमय मात्मा मे

© Dharmartha Trust J&K. Digitized by eGangotri

मुध्यंतां। ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। मंत्रोक्तदेवताभ्य इदं। इति हुत्वा
२४२ सर्वपापेभ्यो विनिर्मुक्तो भवति श्रियं वलोदिसे पदं च प्राप्नोति ततो यज्ञोपवीतमिति मं
त्रेण अग्नावेकं यज्ञोपवीतं हुत्वा नवर्षिभ्यो यज्ञोपवीतानि समर्प्य स्वयं पितॄननुद्दिश्य
ब्राह्मणेभ्यो यज्ञोपवीतानि दत्वा स्वयं च यज्ञोपवीतानि धृत्वा सर्वानू धारयित्वा सर्वेपि
142 दर्भेष्वासीना दर्भान् दूर्वां वा धारयमाणा वेदमध्येष्यामह इति संकल्प्य आद्यान् चतुरो
नुवाकान् पठेयुः केचित्तु दशाग्रंथान् जपेयुः वेदादीन् आचार्यादयः ॐ अग्निमीले पुरोहि
तं०। ॐ इषे त्वोर्जे त्वा वायवो० ॐ ब्रह्म संधत्तं तन्मे जिन्वतं० ॐ भद्रं कर्णेभिः शृणुयाम देवाः
०। ॐ अथातो दर्शपूर्णमासौ व्याख्यास्याम इत्यादि शिष्यानध्याप्य जयादि ब्रह्मविसर्ज
नांतं कृत्वा आभ्युदयिकं कुर्यात् एवमुत्सर्जनं कुर्यात्। अध्यायोत्सर्जनं करिष्य इति सं २४२

© Dharmartha Trust J&K. Digitized by eGangotri

कल्प्य। सर्वमेवं कुर्यादिति ततो दर्भेष्वासीनो दर्भान्धारयमाणश्चतुरो नुवाकानध्वेदस्या
धीन् अध्येतुं प्राङ्मुखः सन् सव्योरो दक्षिणं पादं निधाय दक्षिणजानुप्रदेशे सव्यं हस्तं स
पवित्रमुत्तानं निधाय तदुपरि सपवित्रं दक्षिणहस्तं न्यंचं निधाय। ॐ भूर्भुवः स्वः। तत्स
वितुर्वरेण्यं। भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् इति पच्छः तत्सवितुर्वरेण्यं भ
र्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् इत्यर्धर्चशः। तत्सवितुर्वरेण्यं भर्गो देव
स्य धीमहि धियो यो नः प्रचोदयात् इति सकृदेव जपित्वा ततो नधीयीत। अत्र यथा पूर्वं ते
बोध्यं इति स्पष्टं भाषप्रकारेण छंदऋषिदेवतादिकं तु यत्रापस्तंबानामुक्तं न तत्रैव नान्यत्रेति
बोध्यं। ततो नमो ब्रह्मणे नमोस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः। नमो वाचे नमो वाच
स्पतये नमो विष्णवे बृहते करोमि इति परिधानीयां त्रिः पठेत्। प्राणवं पूर्वमुच्चार्य व्याहृति

© Dharmartha Trust J&K. Digitized by eGangotri

त्रयमेवञ्चसकृदुच्चार्यहिततोगायत्रीपच्छआदितंअर्द्धर्चशोविरम्येवस्तृकुशाःसंहितया
१४३ पठेत्इत्युत्सर्जनोपाकर्मस्वाध्यायेषुप्रतीयतेश्रुतिनञ्चाप्यतोह्नेयस्तैत्तिरीयैरनुष्ठितावि
तिचारुःएवंचपच्छआदिपाठपक्षेपिप्रत्येकंव्याहृतीनांसंबंधोनकल्पनीयइतिसिद्धांतः
।अतएवसहवैइतिप्रश्नेब्रह्मयज्ञविधौभूर्भुवःस्वरित्याहैतद्वैवाचःसत्यंयदेववाचःसत्यं
143 तत्प्रायुंक्ताथसावित्रीगायत्रीत्रिरन्वीहपच्छोर्द्धर्चशोनवानंसवितेत्युक्तेएवंचस्वरित्येव
पाठ्यःएवंभूःप्रपद्येइत्यत्रत्वमग्नेइत्यनुवाकेभूर्भुवःस्वःस्वाहेत्यत्रस्वरादित्येचादिवंचभूर्भु
वःस्वश्छंदइमसेचदिशाश्चमांचेत्यत्रभूर्भुवःस्वःओजोबलमित्यत्रअग्नाविष्णूइत्यनुवाकेभू
र्भुवःस्वःस्वाहेत्यत्रान्नपतेन्नस्यसन्ततेअग्नेसमिधइत्यनुवाकयोर्भूर्भुवःस्वःस्वाहेत्यत्र
तत्रैवस्वर्गमित्यत्रचबोध्यं।संहितायांसुवर्गइतिप्रचुरःपाठब्राह्मणेस्वर्गइतिएवंचतत्रै १४३

© Dharmartha Trust J&K. Digitized by eGangotri

त्तिरीयस्यपत्रविशिष्यनयोक्तं तत्र तथाऽन्यत्र तथेति बोध्यम्। आश्वलायनानां तु ॐ पू
र्वव्याहृतयः सावित्रीमन्वाह पच्छोऽर्द्धर्चशः सर्वामिति तृतीयमिति पंचमायज्ञप्रकरणे
स्यस्वगृह्यसूत्रान्नित्यस्वाध्यायविषये तैत्तिरीयवदेवानुष्ठाने तेषामेवश्रवणकर्मणि
ॐ पूर्वव्याहृतयः सावित्रीं च त्रिरभ्यस्य वेदादिमारभेदिति उपाकरणप्रकरणे च घटिता
त् विशिष्याश्वलायनगृह्यसूत्रपाठात् पच्छ आदिपाठेपि ॐ पूर्वकव्याहृतीनां त्रिवारं
गायत्र्याः संबंधबोधनात्तथैवानुष्ठानेपि विशेषः॥ एवं यथायथमूह्यं नित्यस्वाध्याये विघ्नमा
नेपि विघ्नदृष्टीनोपाकर्मणीत्यन्यत्रस्पष्टं। प्रकृतेऽध्ययनानामुपाकर्म कृत्वा। उत्सर्जनेतु
सक्तुहोमयज्ञोपवीतहोमौ तद्दाने च विनैव वेदानधीत्योत्सृज्य जपेच्च धर्मसन्नह नेरुद्रायतं ति
चरायस्वाहेति मंत्रतः सक्तून् वन्हौ प्रक्षिप्याप उपस्पृशेत् आचामेत् एवं सर्वत्र बोध्यं नतु

© Dharmartha Trust J&K. Digitized by eGangotri

जलस्पर्शनमात्रमर्थः अत्रमूलंचिंत्ययतः उपस्पर्शस्याचमनमितिकोशाच्चाराण्वंजया
१४४ दिहोमेरौद्रेपित्र्येचबोध्यं अस्मिन्कर्मणिकर्मसमृध्ध्यर्थंजयादिहोमंकरिष्येइतिसंक
ल्प्यतद्धोमंस्रुवेणकुर्यात्। चित्तंचस्वाहा। चित्तायेदंनमम। चित्तिश्चस्वाहा। चित्त्याइदंनम
मा। आकूतंचस्वाहा। आकूतायेदंन०। आकूतिश्चस्वाहा। आकूत्याइदंन०। विज्ञातंचस्वा
144 हा। विज्ञातायेदंन० विज्ञातंचस्वाहा। विज्ञातायेदंन०। मनश्चस्वाहा। मनसइदंन०। शाक
रीश्चस्वाहा। शाकरीभ्यइदंन। दर्शश्चस्वाहा। दर्शायेदंन०। पूर्णमासश्चस्वाहा। पूर्णमासा
येदंन०। बृहच्चस्वाहा। बृहतइदंन०। रथंतरंचस्वाहा। रथंतरायेदंन० प्रमेतिकेचित्
वस्तुतस्तुयत्प्रजापतिर्जया। आपध्यतस्मात्तेयाः प्राजापत्याइतिश्रुतेः सर्वत्रप्रजापतये
इदंनममेत्येवंत्यागइतिबोध्यम्। प्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रः पृतनाज्येषु १४४

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मै विशः समनमंत सर्वाः स उग्रः स हि हव्यो बभूव स्वाहा । प्रजापतय इदं न ० ॥ अग्निर्भू
तानामधिपतिः स मावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्न
स्यां देवहूत्यां स्वाहा । अग्नये भूतानामधिपतय इदं न । इंद्रो ज्येष्ठानामधिपतिः स माव
त्वस्मिन्ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा
। इंद्राय ज्येष्ठानामधिपतय इदं न ० यमः पृथिव्या अधिपतिः स मावत्वस्मिन्ब्रह्मन्नस्मि
न् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा । यमाय पृथिव्या
अधिपतय इदं न ० वायुरंतरिक्षस्याधिपतिः स मावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामा
शिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा । वायवेंतरिक्षस्याधिपतय
इदं न ० सूर्यो दिवोधिपतिः स मावत्वस्मिन्ब्रह्मन्न ० सूर्याय दिवोधिपतय इदं ० चंद्र

© Dharmartha Trust J&K. Digitized by eGangotri

मानक्षत्राणामधिपतिः समावत्वस्मिन्ब्रह्मन्न्० चंद्रमसे नक्षत्राणामधिपतयइदं०। वृ
१४५ हस्पतिर्ब्रह्मणोधिपतिः समावत्वस्मिन्ब्रह्मन्न्०। वृहस्पतयेब्रह्मणोधिपतयइदं०। मित्रः
सत्यानामधिपतिः समावत्वस्मिन्ब्रह्मन्न्०। मित्रायसत्यानामधिपतयइदं०। वरुणोपाम
धिपतिः समावत्वस्मिन्ब्रह्मन्न्०। वरुणायामधिपतयइदं०। समुद्रः स्रोत्यानामधिपतिः या
145 समावत्वस्मिन्ब्रह्मन्न्०। समुद्रायस्रोत्यानामधिपतयइदं०। अन्नं साम्राज्यानामधि
पतितन्मावत्वस्मिन्ब्रह्मन्न्० अन्नायसाम्राज्यानामधिपतिनइदं०। सोमओषधीनाम
धिपतिः समावत्वस्मिन्ब्रह्मन्न्० सोमायोषधीनामधिपतयइदं०। सविताप्रसवानामधि
पतिः समावत्वस्मिन्ब्रह्मन्न्० सवित्रेप्रसवानामधिपतयइदं०। रुद्रः पशूनामधिपतिः स
मावत्वस्मिन्ब्रह्मन्न्० रुद्रायपशूनामधिपतयइदं०। अपउपस्पृश्य। त्वष्टा रूपाणामधि १४५

© Dharmartha Trust J&K. Digitized by eGangotri

पतिः समावत्वस्मिन्ब्रह्मन्न्त्रं० त्वष्टे रूपाणामधिपतय इदं०।विष्णुः पर्वतानामधिपतिः समा
वत्वस्मिन्ब्रह्मन्न्त्रं०विष्णवे पर्वतानामधिपतय इदं०।मरुतो गणानामधिपतयस्ते मावंत्व
स्मिन्ब्रह्मन्न्त्रं०।मरुद्भ्यो गणानामधिपतिभ्य इदं०।पितरः पितामहाः परे वरे ततास्ततामहा
इह मावत।अस्मिन्ब्रह्मन्न्त्रं०पितृभ्यः पितामहेभ्यः परेभ्यो वरेभ्यस्ततेभ्यस्ततामहेभ्य इदं०
।अप उपस्पृश्येति केचित्। वसुन्तसु यद्विश्वे देवाः समभरन्। तस्माद्भ्याता नावैश्वदेवा इति
श्रुतेर्विश्वेभ्यो देवेभ्य इदं न मम इत्येवं सर्वत्र त्यागः इति बोध्यं।ऋतताषाड् ऋतधामाग्निर्गंधर्वस्त
स्योषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा।।ऋतस
हे ऋतधाम्ने अग्नये गंधर्वायेदं न मम।ताभ्यः स्वाहा।।ओषधीभ्योऽप्सरोभ्य ऊर्ग्भ्य इदं०।सं
हितो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम स इदं ब्रह्मक्षत्रं पा०सं

हितायविश्वसाम्ने सूर्यायगंधर्वायेदं० ताभ्यः स्वाहा । मरीचिभ्योऽप्सरोभ्य आयुभ्य इदं । सु
१४६ षुम्नः सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो वेकुरयो नाम स इदं ब्रह्म क्षत्रं पा०
सुषुम्नाय सूर्यरश्मये चंद्रमसे गंधर्वायेदं । ताभ्यः स्वाहा । नक्षत्रेभ्योऽप्सरोभ्यो बेकुरिभ्य
इदं० । भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणा अप्सरसस्तवा नाम स इदं ब्रह्म क्षत्रं पा० । भु
146 ज्यवे सुपर्णाय यज्ञाय गंधर्वायेदं । ताभ्य स्वाहा । दक्षिणाभ्योऽप्सरोभ्यस्तवाभ्य इदं । प्रजाप
तिर्विश्वकर्मा मनो गंधर्वस्तस्य ऋक्सामान्यप्सरसो वह्नयो नाम स इदं ब्रह्म क्षत्रं पा० । प्रजापत
ये विश्वकर्मणे मनसे गंधर्वायेदं । ताभ्यः स्वाहा । ऋक्सामेभ्योऽप्सरोभ्यो वह्निभ्य इदं० । इषिरो
विश्वव्यचा वातो गंधर्वस्तस्यापोऽप्सरसो मुदा नाम स इदं ब्रह्म क्षत्रं पा० । इषिराय विश्वव्य
चसे वाताय गंधर्वायेदं० । ताभ्य स्वाहा । अद्भ्योऽप्सरोभ्यो मुदाभ्य इदं० । भुवनस्यपनेयस्पत १४५

© Dharmartha Trust J&K. Digitized by eGangotri

उपरिगृहा इह च । अस नो रास्वाज्यानिं रायस्पोषं सुवीर्यं संवत्सराणां स्वस्तिं स्वा
हा । भुवनस्य पत्या इदं नः । परमेष्ठ्याधिपतिर्मृत्युर्गंधर्वस्तस्य विश्वमप्सरसो भुवो नाम स
इदं ब्रह्म क्षत्रं पा० । परमेष्ठिनेधिपतये मृत्यवे गंधर्वायेदं० । ताभ्यः स्वाहा । विश्वस्मा अप्स
रोभ्यो भूभ्य इदं० । सुक्षितिः सुभूतिर्भद्रकृत्सुवर्वान्पर्जन्यो गंधर्वस्तस्य विद्युतोऽप्सरसो
रुचो नाम स इदं ब्रह्म क्षत्रं पा० । सुक्षितये सुभूतये भद्रकृते सुवर्वते पर्जन्याय गंधर्वा
येदं० । ताभ्यः स्वाहा । विद्युद्भ्योऽप्सरोभ्यो भूभ्य इदं० । दूरेहेतिरमृडयो मृत्युर्गंधर्वस्तस्य प्र
जा अप्सरसो भीरुवो नाम स इदं ब्रह्म क्षत्रं पा० । दूरेहेतये अमृडयाय मृत्यवे गंधर्वाये
दं० । ताभ्यः स्वाहा । प्रजाभ्योऽप्सरोभ्यो भीरुभ्य इदं० । चारुः कृपणकाशी कामो गंधर्वस्तस्याध
योऽप्सरसः शोचयंतीर्नाम स इदं ब्रह्म क्षत्रं पा० । चारवे कृपणकाशिने कामाय गंधर्वाये

© Dharmartha Trust J&K. Digitized by eGangotri

दं॰। ताभ्यः स्वाहा॥ आधिभ्यो ऽप्सरोभ्यः शोचयंतीभ्य इदं॰ इति केचित् वस्तुतस्तु दशापर्यो
१४७ येषुस्तनाषाड्ऋतधामाग्निर्गंधर्वः स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। तस्यौषधयोऽप्सरस ऊर्जो
नाम ता इदं ब्रह्म क्षत्रं पांतु ताभ्यः स्वाहेत्यादिक्रमेणाहुतय इति बोध्यं। स नो भुवनस्य पते
यस्य त उपरिगृहा इह च। उरुब्रह्मणेऽस्मै क्षत्राय महिशर्म यच्छ स्वाहा। ब्रह्मण इदं॰ प्रजा
147 पते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं
स्याम पतयो रयीणां स्वाहा। प्रजापतय इदं॰। भूः स्वाहा। अग्नय इदं॰। भुवः स्वाहा। वाय
व इदं॰। सुवः स्वाहा। सूर्यायेदं न॰। यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरं। अग्नि
ष्टत् स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु स्वाहा। अग्नये स्विष्टकृत इदं॰। शम्या आपो १४७
ह्य॥ अस्मिन्कर्मणि ज्ञाताज्ञातदोषपरिहारार्थं प्रायश्चित्ताहुतीर्होष्ये। अनाज्ञातं यदाज्ञा

© Dharmartha Trust J&K. Digitized by eGangotri

तं यज्ञस्य क्रियन्ते मिथुः। अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं स्वाहा। अग्नय इदं॥ पु
पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने तद०। अग्नय इदं०। यत्पाकत्रा मनसा दीनद
क्षा न यज्ञस्य मन्वते मर्त्तासः। अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवां ऋतुशो यजाति
स्वाहा। अग्नय इदं०। सर्वप्रायश्चित्तं करिष्ये। भूर्भुवः सुवः स्वाहा। प्रजापतय इदं न मम। असुरे
भ्यः पराजित इन्द्रः चित्तं च चित्तिश्चेत्यादिमंत्रैर्हुत्वा पुनस्तान् जितवानित्येषां मंत्राणां जयत्वं
। तथा च श्रुतिः। ततो वै देवा असुरानजयन्। यदजयन् तज्जयानां जयत्वमिति। तथैवाभिर्भू
तानामित्यादीनामप्यभ्यातानत्वं पराजिता विश्वे देवा असुरानभ्यातन्वत। लङि बहुवचनं अ
भ्याङ्पूर्वस्तनोतिर्वशीकारे स्ववशी चक्रुरित्यर्थः। तथा चाभ्यातन्वत स्वाधीनीचक्रुर्यैर्मंत्रै
स्तेऽभ्यातानाः करणे घञ्। अनेन मे तन्तूए वं राष्ट्रभृत्रियन्ते स्वीक्रियन्ते यैर्मंत्रैस्ते राष्ट्रभृत इति। विभ

© Dharmartha Trust J&K. Digitized by eGangotri

त्रैः करणं क्लिवं तं रूपं। न तथा त्वस्कृतिः। ते देवा अभ्यातानैरसुरानभ्यातन्वत तदभ्यातानाना
१५८ मभ्यातानत्वमिति तथैवस्त्ताषाडिति मंत्राणामपि राष्ट्रभृत्त्वं यद्राष्ट्रभृद्भी राष्ट्रमाददत
तद्राष्ट्रभृतां राष्ट्रभृत्त्वमिति॥ अतस्तत्तन्नाम्नैव मंत्राणां व्यवहारः। जयराज्यादिप्राप
कत्वात्तैरवश्यं होतव्यमित्यर्थः। जयाभ्यातानान्राष्ट्रभृत इति। अग्निमेलेपजुहोतीत्यने
148 न संबंधः। ततः प्राजापत्यां व्याहृतीर्विहृताः सोविष्टकृतीमित्युपजुहोति। प्रजापतिर्देव
ताकां प्रजापतेन्नत्वदेतान्नीत्यनया स्त्रचेत्यर्थः। जयाभ्यातानानित्यादिर्विहृता इत्यंतेषु द्वि
तीयावहुरवनेत्ततीयार्थे नेन तत्तन्नामकैर्मंत्रैर्व्यस्ताभिर्व्याहृतिभिश्चोपजुहोति उप
जुहुयात् लिङर्थे लेट्। सोविष्टकृतीमिति द्वितीया स्वार्थे स्विष्टकृद्देवताकामाहुतिं यद
स्यपि तिमंत्रेण जुहुयादिति वोद्धव्यं। स्वागस्कप्रसिद्धः। स्विष्टकृन्मंत्रमाह यदस्य कर्मण १५८

इति। अग्नये स्विष्टकृत इदं। अत्र चितं चेतित्रयोदश अग्निर्मूर्त्तानामितिसानुषंगाः अ
ष्टादशात्तत्र पितर इति मंत्रे जीवत्पितृकस्य पितर इत्यस्य लोपः पितामहा इत्यादिर्मंत्रः
जीवत्पितामहस्य पितामहा इत्यस्य लोपः जीवत्पितृपितामहस्योभयोर्लोपः केचिद्
विकृतं जुह्वति जीवत्पितृकाणां च नास्ति विशेष इत्याहुः स्तनाषाडिति राष्ट्रभृतः पर्यो
येण हूयंते इत्यण्डिलाकेचित्तु ततो जुह्वा परिधीनन्क्तिपात्रप्रयुक्तदर्भाग्राणि हस्ताभ्या
मादाय होमद्रव्योमग्रमनक्ति स्रुवे मध्यमूलेऽनक्ति एवं त्रिः मूलं जनेद्दक्षिणपाणिम
धः कुर्यादेकं तृणमपादाय पाणिभ्यां दर्व्यां प्रतिष्ठाप्य वर्हिरग्नौ प्रहरंति अग्नय इदं सो
माय इदं प्रजापतये कोऽदस्य षय इत्यादि अग्नये स्विष्टकृत इदं तृणं प्रहृत्य त्रिरंगुल्पानिर्दि
श्यापाग्निमभिमंत्र्य भूमिमुपस्पृश्येत्मध्यमं परिधिं प्रहृत्येतरौ प्रहरन्सुत्तरार्धस्यांगारे

© Dharmartha Trust J&K. Digitized by eGangotri

घृपोहतिपरिधीनभिमंत्र्य आघारसमिधौ प्रहृत्य जुह्वां स्रुवं निधाय संस्रावेण जुहोति
१४९ ।ततोऽस्मिन्कर्मणि ज्ञाताज्ञातदोषनिर्हरणार्थमनाज्ञातमिति मंत्रत्रयेण जुहुयादिति।
एतदनुषंगोऽग्रेपि बोध्यः।अनाज्ञातं पुरुषसंमितः।यत्पाकत्रेति त्रिष्टुप्।अग्नय इदं नम
मेति त्यागः।तथा कर्मांतरे तत्कर्मविपर्यासदोषपरिहारार्थं त्वन्नो अग्न इति मंत्रद्वयेन त्व
149 न्नो अग्ने० स त्वन्नो अग्ने द्वयोः अग्नीवरुणाभ्यामिदं० त्वमग्ने अयासीति।अग्नये अया इदं
नममेति त्यागः।अयाशब्दस्याव्ययत्वादिति बोध्यं।ततः सर्वप्रायश्चित्तं करिष्ये इति संक
ल्प्य समस्तव्याहृतिभिर्जुहुयादेतदंतं प्रकृताभिप्रायेण बोध्यं।अग्निमंतु यथायथं होमा
भियेण प्रासंगिकं।तथाह्रिवाङ्नियमलोपदोषपरिहारार्थं प्रजापतेन त्वदेतेति मंत्रेण।
प्रजापतय इदं न०।तथास्त्विङ्मोघदोषपरिहारार्थं आभिर्गीर्भिर्यदतो न— नमाप्याय १४९

यहरिवो वर्द्धमानः। यदा स्तोतृभ्यो महि गोत्रा रुजासि भूपिष्ठभाजो अध ते स्याम स्वाहा। इं
द्राय हरिवते वर्धमानायेदं न ममेति अक्षरपदस्वरादिदोषपरिहारार्थं यद्विद्वांसो यद
विद्वांसो मुग्धाः कुर्वन्ति स्त्विजः। अग्निर्मा तस्मादेनसः अश्रद्धा देवी च मुंचतां स्वाहा। अग्नये
श्रद्धादेव्या इदं न ममेति सर्वप्रायश्चित्तार्थं इदं विष्णुर्वि० त्र्यंबकं य० इति मंत्रद्वयेन हु
त्वा त्यागं च कृत्वा। पुनस्त्वादित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन
त्वं तनुवो वर्द्धयस्व सत्याः संतु यजमानस्य कामाः स्वाहा। अग्नये वसुनीथायेदं इति एवं पूर्वो
क्तमंत्रै राज्याहुतीर्जुहुयात्। वस्तुतः प्रागुक्तप्रयोगेऽनाज्ञातत्रयं यद्वोदेवा भूर्भुवः स्वः स्वा
हेत्युक्ते स्तावन्मात्रमेव प्रकृतेऽनुष्ठेयमत्र स्वरिस्तु तस्यानर्थैवानुष्ठानं तैत्तिरीयस्यापि एव
मापस्तंवश्रौतसूत्रेपि स्वरिति पाठात् तत्र तथैव प्रयोग इति वोध्यं मित्या रुः वसुन स्तु उपा।

© Dharmartha Trust J&K. Digitized by eGangotri

कृतौमुखाहुतिंहुत्वाप्रधानाहुतीश्चाग्निंस्विष्टकृतंचसत्कादिंचजयादिसौविष्टकृत्यंतेच
१५० कृत्वासंनहनंतथाकृत्वालेपयोःप्रस्तरवत्तूलींवर्हिरत्काग्रहत्यन्तूलींपरिधीनाघारस
मिधोसंस्त्रावंचजुहुयादुत्सर्जनेमुखाहुतिवत्स्विष्टकृदंजनणेरमावात्सत्कादिहोम
वर्जमवशिष्टंकुर्यादितिवोध्यं।ततोऽग्निंपरिषिंचतिअदितेन्वमंस्थाइत्यादिमंत्रैरिति
150 ।ततआस्तीर्णदर्भस्थानेस्वपुरतआज्यस्थाल्याउत्तरतःप्रणीतास्वपआनीयप्रतिदिशं
व्युत्सिच्यशिरसिमार्जयित्वापत्यंजलोशेषंनिनीयब्रह्माणंविसृजेत्।साग्निकस्यप्रणी
तापात्रस्यसत्वात्प्रोक्षणीपात्रोत्तरंतस्याएवासादनात्तदुत्तरेणाग्निंदर्भेषूपस्याएवासा
दितत्वेनचतामेवोक्तस्थलेआनीयतथाकुर्यादितिप्रणीतास्वित्युक्तं।निरग्निकस्यतस्या
अभावात्पात्रासादनेऽप्युदकस्थापनेचतत्प्रतिनिधिपात्रमेवतत्त्वपूर्णपात्रपदेनसा १५०

© Dharmartha Trust J&K. Digitized by eGangotri

ग्निकनिरग्निकसाधारणतयाव्यवह्रियते। पात्रासादने तदभावात्कथं प्रणीतास्वि
त्युक्तिरिति न शंक्यं। उभयसाधारण्येन तथोक्तेः पूर्णपात्रेऽप आनीय सदर्भेण हस्तेन
प्रागादि पंचदिक्षु प्राच्यां दिशि देवा इत्यादिमंत्रैस्तूष्णीं वा संमार्जयेत्। तच्छेषं भूमौ क्षि
पेत्। भूमिष्ठमेव तोयं शिरसि मार्जयेत्। ततो यथाकर्मानुरोधेन पस्संजलौ वटुहस्तेऽ
न्या ब्राह्मणहस्ते वा तत्पात्रस्थशेषं निनीय ब्रह्माणमुद्वास्य स्थापितदेवताः संपूज्यो
द्वास्य च कृतस्य कर्मणः सांगतासिद्ध्यर्थं ब्राह्मणभोजनं भूयसीं दक्षिणां च यथाश
क्ति संकल्पयेत्कुर्याच्च। अनेन कर्मणा नारायणः प्रीयतामित्युक्त्वा जलं क्षिपेत् भुवी
ति उत्सर्जने कश्चिद्विशेष उच्यते। तस्य कालस्तैषीपूर्णमासी तदीयरोहिणी वेत्युक्त
मेव मेधारहिते स्त्रूपाकर्मदिने कार्यं तदुक्तं हेमाद्रौ खादिरगृह्ये निष्पेतदुत्सर्जनं कुर्या

© Dharmartha Trust J&K. Digitized by eGangotri

दुपाकर्म दिने प्यवेति कात्यायनोपि प्रत्यब्दं यदुपाकर्म सोत्सर्गविधिवत् द्विजैः क्रियते
१५१ छंदसां तेन पुनराप्यायनं भवेदिति तत्र संकल्प उक्त एव तत्र नादितश्चतुर्णामनुवाका
नामध्ययनमुत्सर्गत्वात् सौ दर्शनेप्येवं योवा अश्वस्येत्यारभ्याश्वस्य योनिः समुद्रो बंधु
151 रित्यंतं शिष्याननध्यापयेदित्येके जयादपस्कभवंत्येव तथा च तैत्तिरीयाणामध्यायोत्स
र्जनस्य पौषपौर्णमास्यां पौषमासगतरोहिण्यां वा विहितत्वेन तस्य मुख्यकालत्वात्त
त्रैवाननुष्ठीयमानेनास्मिन्मुख्यकालातिक्रमजन्यदोषपरिहारार्थं श्रीपरमेश्वरप्रीत्यर्थं
कामोकार्षीन्मन्युरकार्षीदित्येतन्मंत्रद्वयेनाष्टोत्तरसहस्रसंख्याकमष्टोत्तरशतं
वा होमं जपं वा प्रायश्चित्तमहमाचरिष्ये इति संकल्पयेत् । स च संकल्पः श्रावण्यां पौ
र्णमास्यां प्रातःकाले कर्तव्यः तत्त उक्तसंख्याकं होमं वा जपं वा कृत्वा उपाकर्म ततः पूर्वं १५१

© Dharmartha Trust J&K. Digitized by eGangotri

ततः स्वरूपेणोत्सर्गानुष्ठानं कुर्यात्। श्रावण्यां प्रातरसंभवे तु तत्पूर्वदिने संकल्पपू
र्वकं प्रायश्चित्तमात्रं कुर्यात्। उपाकर्मदिने तूत्सर्जनं कृत्वोपाकर्मानुष्ठेयमिति विवेको
बोध्यः। ॐ कामोकार्षीन्नमो नमः। कामोकार्षीत्कामः करोति नाहं करोमि कामः कर्त्ता नाहं
कर्त्ता कामः कारयिता नाहं कारयिता एष ते काम कामाय स्वाहा। ॐ मन्युरकार्षीन्नमो
नमः। मन्युरकार्षीन्मन्युः करोति नाहं करोमि मन्युः कर्त्ता नाहं कर्त्ता मन्युः कारयिता ना
हं कारयिता एष ते मन्यो मन्यवे स्वाहा। अत्र च मूलमापस्तंबसूत्रं तथाहि। काममन्यु
भ्यां वा जुहुयात्। कामोकार्षीन्मन्युरकार्षीदिति जपेद्वेति स्वाहाकारांताभ्यां होमः। आ
ज्यद्रव्यं जपपक्षे न स्वाहाकारः केचित्तु कामाय स्वाहा मन्यवे स्वाहेति होममिच्छंति जप
पक्षे तु सौत्रौ मंत्रावितिदोषाभ्यासानुरूपा च होमजपयोरावृत्तिरिति। हरदत्तः।

© Dharmartha Trust J&K. Digitized by eGangotri

अथान्यो विशेषो धर्मसूत्रे पर्वणि वा तिलभक्ष उपोष्य वाऽश्वोभूते उदकमुपस्पृश्य सा
१५२ वित्रीं प्राणायामशः सहस्रं कृत्वा आवर्तयेद् प्राणायामशो वा श्रावण्यां पौर्णमास्यां ति
लभक्ष उपोष्य वाऽश्वोभूते महानदमुदकमुपस्पृश्य सावित्र्याः समित्सहस्रमादध्याज्ज
152 पेद्वा इत्यादि पर्वणि पौर्णमास्याममावास्यायां वा तिलानेव भक्षयति नान्यदोदनादि
कमिति तिलमात्रभक्षः सन् उपोष्य वा उदकमुपस्पृश्य स्नात्वा प्राणनियमनपूर्वकं
सहस्रवारं गायत्रीं जपेत् अप्राणनियमनपूर्वकं सहस्रं वा तां जपेत् । प्राणायामशः प्रा
णायामेन एकस्मिन् प्राणायामे यावत् कृत्वा आवर्तयितुं शक्यं तावत् कृत्वा आवर्तयेदेवं
मा सहस्रावर्त्तेः प्राणायामावृत्तिः अप्राणायामशो वा जपकाले प्राणनायच्छेन्नसौ जप
द्विति तात्पर्यं श्रावण्यामिति गिरिप्रस्रवाः समुद्रगा महानदी तत्र भवं माहानदं समि १५२

त्सहस्रं यज्ञियवृक्षस्यादध्यादिति वचनान्न होमधर्मः स्वाहाकार इति हरदत्तः अत्र द्वि
तीये ब्रह्मचारिपरं ॥ माघं गृहस्थपरं ॥ तथा च ब्रह्मचारिणः समित्सहस्राधानं मुख्यपक्षो
जपो गौणः गृहस्थानां तु तज्जप एव सः तथा च श्वोभूते महानद्यां विधिवत्स्नात्वाचम्य प्राणा
नायम्य दर्भपवित्रपाणिः सन्दर्भेष्वासीनो ब्रह्मचारी सावित्र्या समित्सहस्रमाधास्ये तज्ज
पं वा करिष्ये इति संकल्प्य तथा कृत्वा आसत्येनेत्यादि सूर्यं दृशे इत्यन्तेनादित्यमुपस्था
य गुरूं नमस्कृत्यार्पयेदिति गृहस्थोप्येवं संकल्प्य तथा तथा वा तज्जपमात्रं कुर्यादिति बोध्य
म् । यत्तु आश्वलायनानां स्वगृह्यकारिकादिषु फाल्गुनसिताष्टमीपौषमाघाषाढपूर्णिमा
श्चोत्सर्जनकाला उक्ताः । तैत्तिरीयाणां पौष्यां पौर्णमास्यां रोहिण्यां वा विरमेदर्धपंचमांश्चतु
रो मासानित्येके इत्यापस्तंबोक्त उत्सर्जनकालः । बौधायनानां आषाढ्यामुपाकृत्य तैः

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यामुत्सृजेत्तु श्रावण्यामुपाकृत्य माघ्यामुत्सृजेदिति तद्वचनादुत्सर्जनकालः ॥ सिंहे
१५३ रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः । छंदोगा मिलिताः कुर्युरुत्सर्गं सर्वछंदसामिति वचनात्सा
मगानां सिंहेऽर्के पुष्यनक्षत्रमेवोत्सर्जनकालः ॥ एवं चैते कालाः स्वस्वगृह्यसूत्रादिप्रामा
153 ण्याद्यथायथं मुख्यास्तथा पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिने एवेति खादिरगृह्यादुपा
कर्मकालोपि तस्य मुख्यः कालः ॥ एवं च बह्वृचोक्तकालानुत्तमकालस्येव परिगृहीत
त्वान्मुख्यत्वाच्च तत्र प्रायश्चित्तं विना सर्वेषां प्रवृत्तिर्निर्वाधैवेति तदनुष्ठानं प्रागुक्तं चायु
क्तमिति तन्न खादिरगृह्यस्य छंदोगशाखीयत्वेन सामगानां तत्कालविधायकत्वेपि त
दितरेषां तत्कालविधायकत्वाभावात् ॥ किंच सामगानामपि पुष्ययुक्तमुख्यकालमा
त्रविधायकत्वेन उपाकर्मकालस्यानुकल्पत्वेन बोधनाच्च ॥ सिंहे रवावित्युक्तवचने १५३

© Dharmartha Trust J&K. Digitized by eGangotri

कृवाक्यतया पुष्पकालस्य मुख्यत्वप्रतीत्याऽर्थात्तदितरकालस्यानुकल्पत्वसिद्धेश्च किं
चाश्वलायनसकलपद्धतावुपाकर्मदिनेऽन्तरितमुत्सर्जनाख्यं कर्म करिष्ये इति संकल्पे
ति ग्रंथस्तत्कालस्य मुख्यत्वप्रतिपादकः भवत् ग्रंथेन सह विरुध्येत। अंतरितमित्युक्तेर
संगतिकृत्वापातात् चेन्न दिक्। एवं तर्हि सामगानामुपाकर्मदिने गौणकाले उत्सर्जनानु
ष्ठानसिद्धावपि तदितरेषामुपाकर्मदिने तदनुष्ठानस्याप्रामाण्यापत्तिस्तद्विधायकवु
चनानुपलब्धेरिति चेत् सत्यं श्रावण्यां प्रोष्ठपद्यां वा प्रतिपत्स्वेऽमुहूर्तकैः। विद्धायां च्छं
दसां तत्रोपाकर्मोत्सर्जनं भवेत् इति निगमवचनादुपाकर्मदिने सर्वेषामुत्सर्जनस्यापि
विधानात्तस्य च उक्तरीत्या गौणकालत्वात्प्रायश्चित्तं कृत्वोत्सर्जनं कृत्वोपाकर्म कार्यं स
र्वैः। एवं च तेषां सकलपद्धतिग्रंथोपि निर्दुष्ट एव एवं चाधुनाश्वलायनादिभिरुक्तमुख्य

© Dharmartha Trust J&K. Digitized by eGangotri

कालेउत्सर्गमकृत्वागौणकालेप्रायश्चित्तंचाकृत्वोपाकर्ममात्रंक्रियतेतत्रएवंछंदोगैरपिद्र
१५४ विडैस्तथैवोक्तप्रायश्चित्तमकृत्वैवशिष्टैस्तैत्तिरीयैश्चक्रियतेतत्रमूलंमृग्यमितिदिक् अथ
विशेषसत्वात् विश्वप्रकाशस्योपाकर्मोत्सर्जनेवुच्यतेपर्वण्यौदपिकेकुर्युःश्रावण्यांतैत्तिरी
यकाः॥बह्वृचाःश्रवणेकुर्युर्ग्रहसंक्रांतिवर्जिते॥उदयेसंगवस्पर्शेश्रुतोपर्वणिचार्कमे॥कु
154 र्युर्नभस्युपाकर्मऋग्यजुःसामगाःक्रमात्॥श्रावणीपौर्णमासीतुसंगवस्पृग्यदाभवेत्॥तदैवौ
दयिकंग्राह्यंनान्यदौदयिकंभवेत्॥कवौगुरौवास्तमयंप्रयातेमासद्वयेयद्युदयोनचास्ति॥
तदापिकुर्वन्तिपवित्रमत्रनैमित्तिकत्वादुतनित्यकत्वात्॥मूढादिदोषोग्रहणंयदिस्यादोष
ध्यभावोयदिकर्कटस्थः॥तत्रद्विजाःश्रावणकर्मकुर्युर्नत्याज्यमाहुर्मुनयोमनीषिणः॥नकु
र्युर्यद्युपाकर्ममूढदोषादिषुद्विजाः॥संवत्सरकृतंकर्मतत्सर्वंनिष्फलंभवेत्॥संग्रहेगुरुक्रमा १५४

© Dharmartha Trust J&K. Digitized by eGangotri

गेवयोर्मौढ्येबाल्येवावार्द्धकेपिवा ॥ तथाधिमाससंपर्कमलमासादिषुद्विजाः ॥ प्रथमोपा
कृतिर्नस्यात्कृतंकर्मविनाशयेत् ॥ वेदोपाकरणेप्राप्तेकुलीरेसंस्थितेरवौ ॥ उपाकर्मनक
र्त्तव्यंकर्त्तव्यंसिंहयुक्तके ॥ नर्मदोत्तरदेशेतुकर्त्तव्यंसिंहयुक्तके ॥ कुलीरेसंस्थितेभानावु
पाकुर्यात्तुदक्षिणे ॥ स्मृतिसमुच्चये ॥ यज्ञोपवीतंकर्त्तव्यंश्रावणेगुरुशुक्रयोः ॥ मौढ्येपि
वार्द्धकेबाल्येनित्यवत्कर्मचोदितं ॥ अथश्रावण्यांपौर्णमास्यामुदयव्यापिन्यांसंगवेवा
महापगासुस्नात्वाशिष्यैःसहकायिकवाचिकमानसिकसांसर्गिकैनोनिर्हरणार्थंसंवत्स
रेकृतैनोनिर्हरणार्थमधीतानांछंदसामुत्सर्जनमध्येष्यमाणानांछंदसामुपाकर्मचक
रिष्यमाणःस्नानविधिनास्नात्वाऋषिपूजनंतर्पणंचकरिष्यइतिसंकल्प्य ॥ अश्वक्रांते०प
देपदे ॥ भूमिर्धेनुर्धर०णीइतिभूमिमभिमंत्र्य ॥ सहस्रपरमा०ग्विनी ॥ इतिदूर्वां ॥ उद्धृता

© Dharmartha Trust J&K. Digitized by eGangotri

सीतिनदीतटाल्लोष्ठमादाय। कांडात्कांडादिति द्वाभ्यां दूर्वामादाय। मृत्तिके हन ॰ इति दूर्वास
१५५ हितं लोष्ठं दक्षिणेकरे प्रतिष्ठाप्यायतइंद्रमयामहे स्वस्तिदा स्वस्तिन इंद्रो वृद्धश्रवा स्त्राता
रमिंद्रमिति प्रतिमंत्रं प्रतिदिशं दूर्वासहितं लोष्ठमुत्सृज्य। ऊर्ध्व ऊषुण ऊतय इत्यूर्ध्वं स्यो
155 नापृथिवीत्यधः गंधद्वारामिति हस्ताभ्यां किंचिदादाय युवं तं जातवेदस मित्यादित्यं दर्शयि
त्वा त्र्यंबकं यजामहे सहस्रशीर्षेति द्वाभ्यां शिरआलिप्य पुनरादाय श्रीर्मे भजत्विति ललाटे
धृत्वाऽलक्ष्मीर्मे नश्यत्विति आत्मानं प्रदक्षिणीकृत्य हस्तस्थं लोष्ठमुत्सृज्य हस्तौ प्रक्षाल्य पु
नरादाय विष्णुमुखा इति मुखे महां ॰ इंद्रो वज्री वा हुरिति वाहू सोमानं ॰ स्वरणमिति कक्षौ
शरीरं यज्ञेति शरीरमोजोग्रीवाभिरिति ग्रीवां विष्णोरराटमसीति पृष्ठं ब्रह्मजज्ञानमि
तिस्तनौ नाभिर्मे इति नाभिमायान्तमन्युरिति कटिं पायुर्मे पचितिरिति पायौ वरुणस्य स्कं १५५

© Dharmartha Trust J&K. Digitized by eGangotri

भनमसीतिमेदूमानेदनंदाविलोडावूरूवोरोजइत्यूरूजंघाभ्यामितिजंघेचरणेपवित्र
मितिचरणाविदंविष्णुरितिपादौत्रीणिपदेतिपादतलेइतिविलिप्पसजोषाइंद्रेतिशेषंदू
र्वासहितंलोष्टंष्टंशिरसिग्रीवायांवानिधायसुमित्रानआपओषधयःसंलितिजलांजली
नुदकेविसर्ज्यदुर्मित्रास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मइतिजलांजलीनुत्तीरे
विसर्जेनू।अथहिरण्यश्रृंगं०इमंमेगंगेप्रजापतेरक्ष्यप्यपत्मारुतमसिःसमुद्रादुदरमं
तरिक्षंसर्वेषुवाएषुलोकेषु॰पवमानःसुवर्जनःआपोहिष्ठामयोभुवःहिरण्यवर्णाःशुचयः
पावकानूमंमेवरुणेत्यादिभिःशिरसिमार्जयित्वापुनरिमंमेगंगेइत्यादिभिर्दक्षिणहस्तांगु
ष्ठेनजलमालोड्य द्रुपदादिवइत्यघमर्षणंकृत्वानासिकांधृत्वाजुंवकायस्वाहेतिनिर्म
ज्यसम्यक्स्नात्वाचम्यतीरेगत्वोपविश्यवेदिंकृत्वानिवीतिनःसर्वेशार्करासुप्रजाप

© Dharmartha Trust J&K. Digitized by eGangotri

ति सोममग्निं विश्वान्देवान् कांडर्षीन् सांहिती र्देवता उपनिषदो याज्ञिकी र्देवता उपनिष
१५६ दो वारुणी र्देवता उपनिषद इत्युपनिषत्त्रयं ब्रह्माणं स्वयंभुवं सदसस्पतिमिति नव कांड
र्षीन् प्रजापतिं कांडर्षिमावाहयामीति क्रमेण षोडशोपचारै रभ्यर्च्य ततः प्रजापतिं कां
156 डर्षिं तर्पयामीति प्रयोगेण तर्पणं कृत्वा तत उपवीती आचम्याह्निकं विधाय शुक्लाणि वस्त्रा
णि धृत्वा तिलकानि कृत्वा ऋषीनादाय गृहमेत्य पुण्याहं वाचयित्वा ऋषीन् संपूज्याग्निप्रति
ष्ठापनादि षट्पात्रप्रयोगा अग्निमुखान्ते । उक्तं चाकर्मस्वोषधिमत्स्वेषु ब्रतेषु हि चतुष्टयीमु
खाहुतिरवश्यं सर्वाचार्यैः सुनिश्चितेति । संध्यावंदनोपासनादिनित्यकर्मलोपप्रायश्चि
त्तार्थं पाहि त्रयोदशाहोमं ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा अग्नये पृथिव्यै महत इ
दं भुवो वायवे चान्तरिक्षाय च महते च स्वाहा वायवे अन्तरिक्षाय महत इदं सुवरादित्याय १५६

© Dharmartha Trust J&K. Digitized by eGangotri

चदिवेचमहतेचस्वाहा।आदित्यायदिवेमहतइदंमभूर्भुवःस्वः।चंद्रमसेचनक्षत्रेभ्यश्च
दिग्भ्यश्चमहतेचस्वाहा।चंद्रमसेनक्षत्रेभ्योदिग्भ्योमहतइदं।पाहिनोअग्नएनसेस्वाहा
अग्नयेएनसइदं।पाहिनोविश्ववेदसेस्वाहा।विश्ववेदसइदं।यज्ञंपाहिविभावसोस्वाहा
विभावसवइदं।सर्वंपाहिशतक्रतोस्वाहा।शतक्रतवइदं।पाहिनोअग्नएकयापाह्युतद्वि
तीययापाह्यूर्जंउततृतीययापाहिगीर्भिश्चतसृभिर्वसोस्वाहा।वसवइदं।पुनरूर्जानिवर्तस्व
पुनरग्नइषायुषापुनर्नःपाहिविश्वतःस्वाहा।अग्नयइदं।सहरय्यानिवर्तस्वाग्नेपिन्वस्व
धारयाविश्वप्स्नियाविश्वतस्परिस्वाहा।अग्नयइदंमम।भूरग्नये०भुवोवायवे०सुवरादित्या
यच०इत्येवंकृत्वानिवातीप्रजापत्यादिकांडर्षिप्रधानहोमंस्रुचाकुर्यात्।त्यागस्तथैवस
र्वत्रज्ञेयः।यथा।ॐप्रजापतयेकांडऋषयेस्वाहा।प्रजापतयेकांडऋषयइदं०।सो०अ०

© Dharmartha Trust J&K. Digitized by eGangotri

वि० सा० ष्ं० या० वा० ब्र० सदसस्पतये स्वाहा। सदसस्पतय इदं। सदसस्पतिमद्भुतं प्रि० ष्ं० स्वा
२५७ हा। पूर्ववत्त्यागः। इयमाहुतिः स्विष्टकृत्स्थानीया। तथा चोक्तं वेदव्रतेषु सर्वेषु तथैवोत्सर्जने
षु च। उपाकर्मणि तद्वच्च स्विष्टकृत्सदसस्पतिः। किं चायदग्निः सदसस्पतिः स्मार्ते कर्मणि
चोदितः। स्विष्टकृद्धोम इत्येवं त्रिविधः कर्मचोदित इति। अथ चतुर्वेदस्य आद्याभिस्त्रिभिरे
157 केकामाहुतिं हुत्वा यज्ञोपवीतमिति मंत्रेण यज्ञोपवीतान्यग्नौ प्रक्षिप्य नवर्षीन्देवान्पि
तॄंश्चोद्दिश्य ब्राह्मणेभ्यो यज्ञोपवीतानि दत्वा स्वयं च धृत्वा ब्रह्मचारी तु उपाकर्मागम्भृतानि
यज्ञोपवीतवस्त्रमेखलाजिनदंडानि धारयेत्। यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि
। तृतीयमुत्तरीयं स्याद्वस्त्राभावे तदुच्यते। रंध्रादिनाभिपर्यंतं ब्रह्मसूत्रं पवित्रकं। न्यूनेरो
गप्रवृत्तिः स्यादधिके धर्मनाशनं। आयुःकामैः सदा धार्यं बहुयज्ञोपवीतकं। पंचभिः २५७

© Dharmartha Trust J&K. Digitized by eGangotri

पुत्रकामीस्याद्धनकामी तथैव च। उपवीतं बटोरेकं द्वे तथेतरयोः स्मृते एकमेव यतीनां
स्यादिति शास्त्रस्य निश्चयः। नैकमंत्रैकसंकल्पं धार्यं यज्ञोपवीतकं। एकस्मिंत्रुटिते सर्वं
त्रुटितं नात्र संशयः। दशमे दशमे वर्षे पुनर्यज्ञोपवीतकं। अधिकं धारयेदेकमकामः कम
एव च। आत्रेता मैत्राः कठाः काण्वाश्चरका वाजसनेयकाः। कंठं दुत्तीर्योपवीतं कुर्युर्वैक्षालनं
द्विजाः। बह्वृचाः सामगाश्चैव ये चान्ये याजुषा द्विजाः। कंठा दुत्तीर्योपवीतं पुनरर्हंति संस्कृ
तिमिति। ततआचम्य दर्भेष्वासीनाद्दर्भान् दूर्वा वा धारयमाणश्चतुरो नुवाकानवेदस्या
घानधीयीरन्। आचार्योदक्षिणोत्तरौ पाणी पादौ कृत्वा सपवित्रावोमिति प्रतिपद्यते शि
रश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य ॐमिति त्रिरुच्चार्य सावित्रीं पच्छोर्धर्चशोनवानं
क्रमेण ह। यथा। ॐ भूः। तत्स०। णि यं। ॐ भुवः। भर्गो०। हि। ॐ स्वुवः। धियो०। त्रा। ॐ भूः। तत्स०

© Dharmartha Trust J&K. Digitized by eGangotri

हि।ॐ भुवः धि॰ तु।ॐ सुवः तत्स॰।तु।पुनस्त्रि व्योहृतिपूर्वां गायत्रीमुक्त्वा ॐ नमो ब्रह्मणे धा
१५८ रणं॰ ष्य ॐ।स्तु ते तपः तत्तपः।स्तु चोत्र क्षरे॰ स ते।महं वृक्षस्परे॰ चतं।यश्छन्द सामृ॰ दोभ्य
श्छन्दाऽं स्या श्छन्द ॐ।ॐ अग्निमीळे॰ इषेत्वो॰ अग्न आयाहि॰ शंन्नोदेवी॰ ब्रह्मसंधत्तं॰ भद्रं
158 कर्णेभिः।अथ शीक्षां प्रवक्ष्यामि।अथातो दर्शी।वृद्धिः।समाम्नायः।गोः ग्मा।मयरस।।पंच संव
त्सरमयं।नारायणेन॰ प्रमाणप्रमेय॰ अथातो धर्मजिज्ञासा।अथातो ब्रह्म॰ योगीश्वरं॰ न
मो ब्रह्मण इति परिधानीयां त्रिरन्वाह।उपाकृता वेदाः।अथ लक्ष्मीप्राप्त्यर्थं सक्तुहोमं कुर्या
त्।तिलांजुहोमि सरसाऽं स॰ रमं तु स्वाहा।सर्वत्र श्रिया इदमिति त्यागः।गावो हि॰ श्रियं च
लक्ष्मिं च॰ प्रजा॰ स्वाहा।तिलाः कृष्णास्तिलाः श्वे॰ पि स्वाहा।चोर॰ तु स्वाहा।श्रीश्च लक्ष्मीश्च
पुष्टी॰ प्रज्ञा तु॰ हा।सक्तूंस्तिलाज्यसमिश्रांस्तिलानित्यादिमंत्रकैः।नवाज्यहोमं कृत्वा तुत १५८

© Dharmartha Trust J&K. Digitized by eGangotri

तो कृत्वा विचक्षणः॥ विमुच्यते सुनिश्चितं समस्तपातकात् द्विजः॥ श्रियं बलादिसंपदं प्रप
द्यते यत्होमकृत्। केचिद्द्विरजाहोमं चेच्छंति। प्राणापानव्या० वाङ्मनश्चक्षु० त्वक्चर्म० शि
रः पाणि पाद० उत्तिष्ठ पुरुषहरित० पृथ्वि व्याप० शब्दस्पर्श० मनो वाक्काय० अव्यक्तभावैः
आत्मा मे० अंतरात्मा मे० परमात्मा मे० क्षुधे० क्षुत्पि० विविध्यै० ऋग्विधा० कषोत्का० क्षु
त्पिपासामला ज्येष्ठा० अन्नमय० इति कृत्वा स्विष्टकृतं च कृत्वा समिधमिध्मसन्नहनं चा
ग्नौ प्रहृत्य जयादि व्युस्ता राष्ट्रभृद नाज्ञातादि प्रायश्चित्तादि कृत्वा बर्हिः सम्मंजनं परिधि
प्रहरणं च कृत्वा प्रत्येकं ब्राह्मणेभ्यो गोभूम्यादि दत्त्वा सर्वं प्रत्येकमाभ्युदयिकं च कृत्वा शान्तो
दान्तः प्रवक्तास्मि ति घोषशांतिं च पठित्वा ब्राह्मणान्भोजयेत्॥ इति श्रावणहोमः॥ अथोत्सर्ज
नं एवमुत्सर्जनं पौष्यां पौर्णमास्यां विधीयते। श्रावण्यां वा सैहे वोपाकर्मणः पूर्वमेव हि।

© Dharmartha Trust J&K. Digitized by eGangotri

अध्यायानामुपाकर्म श्रावण्यां श्रवणेन च। हस्तेनौषधिभावे वा पंचम्यां श्रावणस्य तु॥ प
१५९ र्वण्योदपि के कुर्युः श्रावणीं तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांतिवर्जिते। शुक्र
भार्गवयोर्मौढ्ये वा ल्पे वार्द्धे तथैव च। नैव कुर्यादुपाकर्म उत्सर्जनमथापि वा। अधीतानां
159 छंदसामुत्सर्जनारब्धं कर्म करिष्येदुत्सुपाकर्मवन्तु सर्वमेव कुर्यात्। प्रथममुत्सर्जनहोमं
पश्चादुपाकर्महोमं कुर्यात्। उपाकर्मणि चोत्सर्गे दधिपक्वगुडं घृतं च। एष्वेवाग्निमुखंतं
त्रं स्विष्टकृद्बर्हिरंजनं। परिधिप्रहरणं च कुर्यात्। उभयत्र नियमाः उत्सर्जनब्रह्मयज्ञे
उत्सृष्टा वेदाः। उपाकर्मणि उपाकृता वेदाः त्रिरात्रमनध्यायः॥ मासं प्रदोषे नाधीयीत इति
विश्वप्रकाशस्थोपाकरणोत्सर्जनप्रयोगः॥ अथ सपक्षार्थेन नूतनब्रह्मचारिण उपाकर्म
प्रयोगो लिख्यते॥ यथासंभवं तीर्थे गत्वा स्नात्वाचम्य प्राणा॰ विष्णु॰ थो मम कायिक १५९

© Dharmartha Trust J&K. Digitized by eGangotri

वाचिकमानसिकसांसर्गिकैनोनिर्हरणार्थं संवत्सरकृतैनोनिर्हरणार्थमधीतानां
छंदसामुत्सर्जनमध्येष्यमाणानां छंदसामुपाकर्मकर्तुं स्नानविधिना स्नानं ऋषिपूज
नं तर्पणं च करि० ततः पीठोपरि स्त्रीन्स्थापयित्वा। ॐ अघ० पदे। भू मि० णी। स० नी। उद्ध० कां०
या० म० दक्षिणेरोप्रति० यत्त० स्व० स्व० त्रातार० ऊर्ध्वे० स्यो० गंध० हस्ताभ्यां लोष्टमादाया०
उदुत्यं० श्रीर्मे० ललाटे० अलं० शिरः प्रदक्षि० हस्तौ प्रक्षा० सहस्रा० हस्तप्रक्षालनं सर्वत्र०
विष्णु० ओजो० महां० सोमा० ब्रह्म० धारी० नाभि० आपां० विष्णो० वरुणआनं० ऊरू० जंघा० च
रण० इदं० पादौ लिंपेत्। त्रीणि० तत्पादौ। सजो० लोष्टं शिरसि निधाय। सुमि० दुर्मि० यो०
पं० हिरण्य० इति तीर्थमध्ये गत्वा मार्जनं कुर्यात्। इमं मे गं० प्रजापते रक्ष्य० मारुतमसि०
समुद्रउ० सर्वैषुवा० पवमानः आपोहिष्ठा० हिरण्यव० निधत इमं मे वरुण० यत्किंचि०

© Dharmartha Trust J&K. Digitized by eGangotri

त्रियासः। इत्यादिभिः शिरसि मार्जयित्वा। पुनः इमं मे गंगे॰ तीर्थे अंगुष्ठेन त्रिरालब्ध्वा। द्रुप
१६० दादिव मुंचतु। द्रुप॰ आपः शुंधंतु मैनस इति अघमर्षणं कृत्वा दक्षिणकरेण नासिकां
धृत्वा। जुंवकाय स्वाहा इति मज्जनत्रयं कृत्वा सम्यक् स्नात्वाचम्य तीरे आगत्योपविश्य
160 वेदिं कृत्वा ऋषितर्पणं कुर्यात्। निवीतीभूत्वा प्रजापतिं काण्डऋषिमावाहयामि। सोमं॰
अग्निं॰ विश्वा॰ सांहितीः॰ याज्ञिकीः॰ वारुणीः॰ ब्रह्माणं स्व॰ सदसस्प॰ सर्वान् ऋषीन्
प्रत्येकं षोडशोपचारैः पूजयित्वा प्रत्येकं तर्पणं कुर्यात्। प्रजा॰ र्षिं तर्पयामि। सोमं॰ अग्निं॰
विश्वा॰ सांहितीः॰ याज्ञिकीर्दे॰ वारुणीर्दे॰ ब्रह्माणं स्व॰ सदसस्पतिं तर्पयामि। उप
वीतीभूत्वाचम्य आह्निकं विधाय भुक्तानि धौतवस्त्राणि धृत्वा ऋषीनादाय गृहमेत्य
होमं कुर्यात्। नूतनब्रह्मचारी चेत् आदौ पुण्याहवाचनं कृत्वा पीठे परिब्रह्मचारिणं द १६०

© Dharmartha Trust J&K. Digitized by eGangotri

क्षिणतउपवेश्यस्वयमुत्तरतआसीनोमहंकर्णेभिरितिपठित्वाप्राणानायम्यपूर्वो॰
त्तियोममकायिकवाचिकमानसिकसांसर्गिकैनोनिर्बर्हणार्थंब्राह्मणैःसहकर्मणः
पुण्याहवाचनमहंकरिष्येसोदकेकलशेतंडुलतांबूलपुष्पकेसगुडसपूगीफलंकां
स्यपात्रेनिधायाक्षतपुंजेषुकलशंप्रतिष्ठाप्यब्राह्मणान्प्रार्थयेत।ॐकर्मणःपुण्याहंभ
वंतोब्रुवंतुतेष्वांपुण्याहंकर्मणोस्त्वितिब्रूयुरेवंत्रिः।ॐयत्पुण्यंनक्षत्रं॰नानिवा॰कृते।
ॐकर्मणःस्वस्तिंभवंतोब्रुवं॰तेष्वोंस्वस्तिकर्मणोस्त्वितिब्रूयुःएवंत्रिः।स्वस्तिनइंद्रो॰
ऋष्टो॰स्वस्ति।ॐक॰ऋद्धिंभं॰तेष्वेंकर्मर्ध्यतांऋध्यास्महवैर्नमसोपसद्य॰वी
णि॰स्तुतिमुखसमेकलशमुद्धरेत्।ततःकलशोदकंब्रह्मचारिणांजलौस्वस्तिपुण्या
हसमृद्धिरस्तु॰वर्षशतं॰गोत्राभिवृद्धिरस्तु॰शांतिःपुष्टि॰शिवंॐशिवं॰पुनरपिगो

© Dharmartha Trust J&K. Digitized by eGangotri

ब्राह्मणेभ्यः शुभं भवतु इति वाक्यैर्निनयेत्। ततः तदक्षतमिश्रा० ऋषीन्संपूज्य ततोग्नि
१६१ प्रतिष्ठापनं कुर्यात्। अग्निमुखांते। अग्नये स्वाहेत्यग्निमुखाहुतिं कृत्वा ततः पाहित्रयो
दशहोमं कुर्यात्। संध्यावंदनोपासननित्यकर्मलोपजदोषप्रायश्चित्तार्थं पाहित्र
योदशहोमं करिष्य इति संकल्प्य स्रुचा जुहुयात्। स्रुवेणाज्यमादाय स्रुचि निधाय।
161 ॐ भूरग्नये च पृ० अग्नये पृथिव्यै महत इदं० भुवो वायवे चां० वायवेऽन्तरिक्षाय म
हत इदं। सुवरादित्याच दि० आदित्याय दिवे महत इदं। पाहि नो अग्न एनसे स्वाहा। अग्न
य एनस इदं। पाहि नो विश्ववेदसे० विश्ववेदस इ०। यज्ञं पाहि विभावसो स्वाहा। विभाव
सव इदं। सर्वं पाहि शतक्रतो स्वाहा। शतक्रतव इ०। पाहि नो अग्न एकया० वसो स्वाहा०
वसव इदं। पुनरूर्जा निव० श्चतः स्वा० अग्नय इदं। सहरय्या० परिस्वा० अग्नय इ० १६१

© Dharmartha Trust J&K. Digitized by eGangotri

भूरग्नये च पृ० अग्न० भुवो वायवे चा० वायवे अं० सुवरादित्याय च० आदित्याय दि०
९३ आहुतीर्हुत्वा परिषिंचेत् । निवीती भूत्वा । प्रजापतये कांडऋषये स्वाहा । प्रजापतये
कांडऋषय इदं । सोमाय कां० सो० अग्नये कां० अग्न० विश्वेभ्यो देवेभ्यः कांडऋषिभ्यः स्वा
हा । वि० । सांहितीभ्यो देवताभ्य उपनिषद्भ्य० सांहिती० इदं वारुणीभ्यो दे० वा० ब्रह्मणे
स्वयंभुवे स्वाहा· सदस० ॐ सदसस्पतिमद्भुतं प्रि० सिषं स्वाहा । सदसस्पतय इदं । इषे
त्वा स्वाहा । यजुर्वेदायेदं० अग्निमीळे पुरो० तमं स्वाहा । ऋग्वेदायेदं० । अग्न आयाहि वी०
वर्हिषि स्वाहा । सामवेदायेदं० । शन्नो देवीर० स्रवंतु नः स्वाहा । अथर्वणवे० । यज्ञोपवी
तं परमेष्ठ्युतेजः स्वाहा । इति मंत्रेण सुचा यज्ञोपवीतं जुहुयात् । यज्ञोपवीतात्मन इदं
ब्रह्मचारी । आचम्य प्रा० ममोपात्तदुरि० उत्सर्जनांगभूते यज्ञोपवीत वस्त्रमेखलाजि

© Dharmartha Trust J&K. Digitized by eGangotri

नदंडधारणमहं करिष्ये इति संकल्प्य। यज्ञोपवी० तेजः। रेवती स्त्वा० महित्वने इति वा
१६२ सोमिमंत्र्याया अकं तन्त्र० वासः। परि० ३। जरां० व्ययस्वाहा। इति परिधाय। परीदं वा
सो० जीवन्। इति परिहितमभिमंत्रयते। इयं दु० रिषा मा। इति मौंजीं परिवीय कुमारं वा
162 चयेत्। मित्रस्य० दधे हं इत्यजिनं। सुश्रवः सु० भूया सं इति दंडं स्वपीदेवान् पितृंश्चो
द्दिश्य ब्राह्मणेभ्यो यज्ञोपवीतानि दत्वा आचम्य० प्रा० मम ३० थे ठ त्सर्जनाग भूत ब्रह्म
यज्ञेन पक्ष्यो ॐ विद्युदसि० पेमि। ॐ भूर्भुवः सुवः सत्यं तपः श्रद्धायां जुहोमि। ॐ नमो
ब्रह्म० रोमि। ॐ शांतिः ३ ॐ सचोत्र स्वरेप० दुः। यस्त्व० सते। ॐ मिति त्रिरुच्चार्य। ॐ भूः
तत्सवि० णियं। ॐ भुवः भर्गो दे० हि। ॐ सुवः धियो यो० त्। ॐ भूः तत्स० महि। ॐ भुवः धि
यो० त्। ॐ सुवः। तत्स० दयात्। यश्छंदसामृषभो० यश्छंदोभ्यः छंदां० श्छंद ॐ। ॐ भ १६२

© Dharmartha Trust J&K. Digitized by eGangotri

मो ब्रह्मणे धारणे मे ० ष्य ॐ। ॐ ऋतं तपः सत्यं ० तपः यथा वृक्षस्य ० क्षेत्र ॐ। ॐ अग्नि
मीळे ० तमे। ॐ। ॐ इषे त्वोर्जे त्वा ० न्याहि। यज्ञस्य ० देवं गमम सि ० मुं घध्वे ० रक्षस्व ० क
मे णो वो ० हव्यं रक्षस्व। ॐ। ॐ अग्न आ याहि ० षि। ॐ शन्नो देवीरभि ० नुनः। ॐ। ॐ
ब्रह्म सं धत्तं ० मा जुहोमि। ॐ भद्रं कर्णे ० द धातु। ॐ शांतिः ३ ॐ भद्रं कद धातु। आपमापा ०
सं दृषि। ॐ ऋतं च स्वाध्यायप्रव ० तद्धि तपः। अहं वृक्षस्य ० वेदानुवचनं ० अथ शिक्षां
प्रवक्ष्यामि पाणिनीयं मतं यथा। शास्त्रानुपूर्वं तद्विद्यात यथोक्तं लोकवेदयोः॥१ अथा
तो दर्शपूर्णमासौ व्याख्यास्यामः प्रातरग्निहोत्रं हुत्वान्यमाहवनीयं प्रणीयाग्नीनन्वा
दधाति। वृद्धिरादैचू। धातुके ४ गौः ग्मा। ज्मा। क्ष्मा। क्षितिः। जमरलगसर्संमितं भ्रम
ति वाङ्मयं जगति यस्य ० स जयति पिंगलनागः शिवप्रसादाद्विशुद्धमतिः॥ पंचसंव

© Dharmartha Trust J&K. Digitized by eGangotri

त्सरमयेयुगाध्यक्षे प्रजापतिं। दिनलेयनमासांगे प्रणम्य शिरसा शुचिः। जन्माद्यस्य
१६३ पतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदाय आदिकवये मुह्यंति यत्सूर
यः तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा धाम्ना स्वेन सदा निरस्तकुहकं स
163 त्यं परं धीमहि। नारायणं नमस्कृत्य० येन। प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसि
द्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्थानानां त
त्वज्ञानान्निःश्रेयसाधिगम इति। अथातो धर्मजिज्ञासा० अथातो ब्रह्मजि० योगीश्व
रं याज्ञवल्क्यं संपूज्य मुनयोब्रुवन्। नमो ब्रह्मणे० बृहते करोमि। ॐ शांतिः ३ इति त्रिः
। उत्सृष्टा वै वेदाः। वृष्टिरसि व्यागो। इत्यप उपस्पृश्य। ततश्चाभ्युदयिकं कुर्यात्।
आचम्य प्रा० एवं० तिथौ० उत्सर्जनांगभूतमभ्युदयिकदेवतासमाराधनं करिष्ये। १६३

© Dharmartha Trust J&K. Digitized by eGangotri

प्रपितामही पितामही मातरः नांदीमुखाः वृद्धौ समाराधनीयाः। प्रपितामहपिता
महपितरः। नांदी० धनीयाः। सत्यवसु० नीयः वृद्धप्रमातामहप्रमातामहमातामा
ही नांदी० याः। सत्यवसु०। पीत्वाक्षततोदकं गृहीत्वा। सत्यवसु० देवेभ्यो ब्राह्मणद्वयं भो
जयिष्ये हि। रूपेन वार्त्ताष यिष्ये। उभाभ्यामत्र वृद्धिः। प्रपितामही पितामही मातृभ्यो
नां० स्वेभ्यो ब्राह्म० वृद्धिः। सत्यवसु० प्रपितामहपितामहपितृभ्यो नां० उभाभ्यामत्र
वृद्धिः। सत्यवसु। वृद्धप्रमातामहप्रमातामहमातामहेभ्यो नांदीमु० ब्रा० जीवत्पितृ
कश्चेत्। वृद्धप्रपितामही प्रपितामही पितामही इति कुर्यात्। एवं सर्वत्र। सति मातामह
हे अति वृद्धमातामहे त्यादि। कृत्वाभ्युदयिकं कृत्वा। ततउपाकर्मांगादि कुर्यात्। षट्पा
त्रप्रयोगा। अग्निमुखं ब्रह्मयज्ञं च पूर्ववत्कृत्वा उपाकृताः वै वेदाः वृषिरसि० गां। अ

पउपस्पृश्य। ततस्तिलाज्यमिश्रितान्सक्तूनादाय करेण होमं कुर्यात्। लक्ष्मीप्राप्त्यर्थे स

१६४ क्तू होमं करिष्य इति संकल्प्य। तिलांजुहोमि सरसांः स० रमंतु स्वाहा। श्रिया इदं। गावो

हिरण्यं धनं० श्रिया० श्रियं च लक्ष्मीं च० प्रजाः संददातु स्वाहा। श्रि० तिलाः कृष्णास्ति० म

164 यि स्वाहा। श्रि० चोरस्यान्नं० शमयंतु स्वाहा। श्रीश्च लक्ष्मी० प्रज्ञानु जातवेद० नु स्वाहा।

श्रि० लक्ष्मीप्राप्त्यर्थे विरजाहोमं करिष्य इति संकल्प्य। प्राणापानव्यानोदानसमाना मे

शुध्यं० श्रिया इदं० वाङ्मनश्चक्षुश्रो० श्रि० त्वक्चर्म० श्रिया० शिरःपाणि० श्रि० उत्तिष्ठपु

रुष० श्रि० पृथिव्यापस्तेजोवायुरा० श्रि० शब्दस्पर्शरूप० श्रि० मनोवाक्काय० श्रि० अव्यक्त

भावैरहं० श्रि० आत्मा मे शु० श्रि० अंतरा० श्रि० परमात्मा मे० श्रि० क्षुधे स्वा० क्षुध इदं।

क्षुत्पिपा० क्षुत्पिपासायेदं। विविट्यै स्वाहा। विविट्या इदं। ऋग्विधानाय स्वाहा। ऋग्विधाना १६४

© Dharmartha Trust J&K. Digitized by eGangotri

येदं। कषोत्काय० कषोत्कायेदं। क्षुत्पिपासामलं ज्ये० मे पाप्मानं स्वाहा। क्षुत्पिपासायेइ
दं। अन्नमयप्रा० अन्नमयादिभ्यो देवताभ्य इदं। एकोनविंशत्याहुतीर्हुत्वा० यदस्य कर्म
णो० करोतु स्वाहा। अग्नये स्विष्ट० ततः समिधमिध्म सन्नहनं चाग्नौ प्रहृत्य जयादिहोमं
कुर्यात्। चौलोपनयनस्नानगोदानेषु वृषोत्सवे। वेदव्रतेष्वथ यागेषु व्यस्ताराष्ट्रभृतः स्मृ
ताः॥ अथ जयादयः। अस्मिन्कर्मणि कर्मसमध्यर्थं जयादिहोमं करिष्ये। चित्तं च स्वाहे
त्यादि। अभ्यातानाः। अग्निर्भूतानामित्यादयः। अथ व्यस्तराष्ट्रभृतः। ऋताषाडृत० गं
धर्वीय इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा। ऋतसाहे ऋतधाम्ने० तस्यौषधयोऽप्सरसः ऊर्जो
नाम ताभ्य इदं ब्रह्मक्षत्रं पातु ताभ्यः स्वाहा। ओषधीभ्योऽप्सरोभ्य ऊर्ग्भ्य इदं इत्यादि। व्याहृति
होमान्ते। यदस्य कर्मणोऽत्यरी० अग्नये स्विष्ट० अथ अनाज्ञातादिप्रायश्चित्ताहुतयः। अ

© Dharmartha Trust J&K. Digitized by eGangotri

स्मिन्कर्मणि ज्ञाताज्ञातदोषप्रायश्चित्तार्थं। अनाज्ञातत्रयं कर्मान्तरे न कर्मविपर्यास
१६५ दोषप्रायश्चित्तार्थं त्वन्नः सत्वन्न इत्याहुतिद्वयं यजुर्भ्रेषप्रायश्चित्तार्थं भुव इत्येकाहुतिं न्यू
नातिरिक्तदोषप्रायश्चित्तार्थं यतः स्वस्तीत्याहुतिद्वयं कर्मणः साद्गुण्यार्थं प्रन्न आत्मनो
165 मिंदा पुनरग्निश्चेत्याहुतिद्वयं नियमासनवाग्लोपदोषप्रायश्चित्तार्थं इदं विष्णुस्त्रेंव
कमित्याहुतिद्वयं स्वराक्षरपदवर्णलोपदोषप्रायश्चित्तार्थं आभिर्गीर्भिरित्येका
हुतिं उपघातदोषप्रायश्चित्तार्थं पुनस्त्वेत्येकाहुतिं सर्वप्रायश्चित्तार्थं भूर्भुवः सुवरि
ति व्याहृतिभिः कर्मातिरिक्तहीनदोषप्रायश्चित्तार्थं ब्रह्म प्रतिष्ठेत्येकाहुतिमाज्येन
होष्यामि इति संकल्प्य ॐ अनाज्ञातं० अग्नय इदं। पुरुषसं० अग्नय० यत्पाकत्रा म०
अग्नय० त्वन्नो अग्ने० अग्नीवरुणाभ्यां। सत्वन्नो अग्ने० अग्नीवरुणाभ्यां० भुवः स्वाहा। १६५

© Dharmartha Trust J&K. Digitized by eGangotri


वायवे। यत इंद्रभ० अभयंकरायेंद्राय०। स्वस्तिदा विश० अभयकरायेंद्राय। यन्म
आत्मनो मिंदा० विचर्षणि स्वाहा। अग्नये जातवेदसे विचर्षणाय इदं। पुनरग्निश्चक्षु० अ
ग्नीद्रावृहस्पत्स्पत्यिभ्य इदं। इदं विष्णुर्वि० विष्णव० त्र्यंबकं० मृ ता त्स्वाहा। त्र्यंबकायेदं।
आभिर्गीर्भिर्य० स्याम स्वाहा। इंद्राय हरिवते वर्धमानायेदं। पुनस्त्वादित्या० कामाय स्वा
हा। अग्नये वसुनीथायेदं। भूः स्वाहा। अग्नये। भुवः स्वाहा वायवे। सुवः स्वाहा। सूर्याय०
भूर्भुवः सुवः स्वाहा। प्रजापतय इदं। ब्रह्मप्रतिष्ठ० देवान्स्वाहा। ब्रह्मण इदं। यं द्विष्मः सो०
ताऽं स्वाहा। अग्नये अन्नादे व्याइदं। इति प्रायश्चित्ताहुतीर्हुत्वा वर्हिः समंजनं परिधि
प्रहरणं च कृत्वा। ततः सदसि सन्मे० अक्षितमसि मामे क्षेष्ठा अमुत्रामुष्मिंल्लोके प्रा
च्यां दिशि० मार्जयंतां। इति प्रतिदिशं अंजुलिञ्चा समुद्रं वः प्र० इति कुमारस्यांजलौ अ

© Dharmartha Trust J&K. Digitized by eGangotri

क्र. ६४०२ प. १६६

प्रथम १

न्यब्रह्मणस्यां जलौ वा शेषं भूमौ निनीय। शांतिरस्तु। पुष्टि० तुष्टि० अविघ्नं० आयुष्यं० आ
२९६ रोग्यं० स्वस्ति शिवं० इत्यादिभिः शिरसि मार्जयित्वा। ततो ब्रह्मविसर्जनं। ब्रह्मणे वरं ददामी
ति गोमूल्यानि दत्वा ब्रह्माणं विसृजेत्। ततः सर्वे प्रत्येकं आभ्युदयिकं कुर्युः। उपाकर्मांग
त्वेनाभ्युदयिकदेवतासमाराधनं करिष्ये इति संकल्प्य। आभ्युदयिकं कृत्वा शन्नो वातः
पवतामिति घोषशांतिं पठित्वा ब्राह्मणभोजनं भूयसीं च संकल्प्य कर्मेश्वरार्पणं कुर्यात्
॥ इति श्रीमत्पायगुंडोपाख्यबालंभट्टोन्नीतमुपाकृतितत्त्वं परिपूर्णम्॥ सं १८४८ मि
ति मार्गशिर शुक्लपक्ष सौये य संपूर्णं॥ शुभं भवतु॥ ग्रंथसंख्या २९७०





१९९

© Dharmartha Trust J&K. Digitized by eGangotri